128
―――
3

अथ

"भामती" । Bhamati

वाचस्पति मिश्र प्रणीता ।

प्रथमाध्यायः ।

128/3

यमांजी दीक्षितानां पाय वाचस्पति

शारीभाष्यव्याख्या

भामती

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तये नमः ॥ अनिर्वाच्या विद्याद्वितयसचिवस्य [illegible]
ते विश्वमखिलं जोभवनयः ॥ यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरि[illegible]
ज्ञानममृतं ॥१॥ निःश्वसितमस्य वेदा वीक्षितमेतस्य पंचभूतानि । स्मितमेतस्य चराचरमस्य
महाप्रळयः ॥२॥ बाह्ये रंगे रूपे तापविविधैरप्यपैरपि । शाश्वतायनमस्कुर्मो देवाय[illegible]वायच
[illegible]तै तुनिळकरवामि महागणतीयैन्वयं ॥ विश्ववंद्यान्नमस्यामः सर्वसिद्धिविधायिनम् ॥४॥
त्रकृते नमस्मै वेद व्यासाय वेधसे । ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥५॥ मत्वा विष्णुं हृद
करं करुणाकरं । भाष्यं प्रसंगैर्गंभीरं तत्स्फुर्णीनं विकल्प्यते ॥६॥ आचार्यकृति निवेशन[illegible]
वचोस्मदादीनां । रथ्योदकमिव गंगाप्रवाहपातः पवित्र्यति ॥७॥ अथ पदसंदे[illegible]
त्पेक्षा वस्त्वतिपित्साशोचरो यथ्या समनस्के द्वियस[illegible]स्फीता ळ्ठोकमध्याव[illegible]
तीवात था वेदं ब्रह्मेति व्यापकविरुद्धोपळब्धेः ॥ तथाहि द्रुहत्वाद्द्रुह[illegible]
यते । सर्वाप्यमा कीटपतंगेभ्य आब्रह्म देवर्षिभ्यः प्राणभृन्मात्रस्येदं कारासादेप्योदे[illegible]

हि [illegible]षये योविवेकेनाहमित्यसंदिग्धाविपर्यस्तापरोक्षानुभवोस्ति इति नजिज्ञासास्पदं॥ नहि
कश्चिदत्र संदिग्धे अहमन्नहं वेति न च विपर्यस्यति नाहमेवेति। न चाहं कृशः स्थूलो गच्छामी
त्यादि देहधर्मसामानाधिकरण्यदर्शनाद्देहालंबनोयमहंकार इति सांप्रतं॥ तदालंबनत्वे हिपी
पृ ४ [illegible]ल्येपि तदवस्थाभूवं स एव स्थाविरे प्रण[illegible] नुभवामीति संधानं न भवेत्॥ नहि बालस्थवि प्रति ४
रशरीरयोरस्ति मनागपि प्रत्यभिज्ञानगंधो येनैकत्वमध्यवसीयेत। तस्माद्येषु व्यावर्तमानेषु यदनु
वर्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रं। तथा बाल्यादिशरीरेषु व्यावर्तमानेष्वपि परस्परम
हंकारा[illegible]हमनुवर्तमानं तेभ्यो भिद्यते। अपि च स्वप्ने तेदिव्यं शरीरमेदमास्थाय तदुचितान्
भो[illegible]भुंजान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् नाहं देवो मनुष्य एवेति देवशरीरे बाध्य
माने[illegible]हमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते। अपि च योगव्याघ्रः शरीरे देहेपि आत्मानमभि
न्नमनुभव[illegible]ीति नाहंकारालंबनं देहः। अतएव नेंद्रियाण्यप्यस्यालंबनमिंद्रियनेहेपि योहमद्रा
क्षं स एवे[illegible] स्य हमास्वेंलंबन[illegible]स्य प्रसक्ति ज्ञानात्। किंच येप्यस्वरूपविवेकः स्वेच्छीयाने
[illegible]विमनसो [illegible]णयोरहमितिकर्तृप्रतिभासप्रसक्त्या नालंबनत्वायोगात्। कृशोहमंधोह

ह्यमित्यादि यच्चव्यवहारयोगात् असत्यमपि भेदे कथंचिन्मंत्राः क्रोशंतीत्यादिवदौपचारिका इति युक्तमुत्त
श्यामः। तत्र ... दृश्यकानि स्वदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतरमनुभवगम्य
आत्मासंशयाभावादर्जितास्यरतिसिद्धं॥ अध्यासो ज्ञानत्वाद्ध्यात थाहि संसारनिवृत्तिरपवर्गोदृढ
प्रयोजनं विवक्षितं संसारश्चात्मयाथात्म्यानुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः
सवेद्यमनादिरनादिनात्मयथात्म्यज्ञानेन सहानुवर्तते कुतोस्य निवृत्तिरविरोधात्। कुतश्चात्म
याथात्म्यानुभवः नत्वहमित्यनुभवादन्यदात्मयथात्म्यज्ञानमस्ति। न चाहमितिसर्व... जनैर्नी
स्फुटतरानुभवसमर्पितत्र आत्मा देहेंद्रियादिव्यतिरिक्तः शाक्यउपनिषदां सहस्रैरपि अन्ययपितुमनु
॥५॥ नुभवविरोधात् नत्वागमाः सहस्रमपि घटं पटयितुमीशते तस्मादनुभवविरोधात् उपचारिता ग्यो ॥५॥
एवोपनिषद इति युक्तमुत्तरस्यामरत्याशयवानाशंक्यपरिहरतीति युष्मदस्मत्प्रत्ययगोचरयोरिति॥ अ
त्रव... अदित्यादिर्मिथ्याभवितुं युक्तमित्यंतः शंकाग्रंथः तथापीत्यादिः परिहारग्रंथः तथापीत्यभि
संबंधात् शंकायां यद्यपीति पठितव्यं। इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यंत
भेदोपलक्षणार्थं यथा त्वदहंकारप्रतियोगीत्वंकारो नैवमिदंकारः एतेपवमिमेवयमास्मरति

बुद्धेः प्रयोगदर्शनादिति। चित्स्वभाव आत्मा विषयी जडस्वभावा बुद्धीन्द्रियदेहविषया विषयाः ए
ते हि चिदात्मानं विषिण्वंति अवबध्नंति स्वेन रूपेण निरूपणीयं कुर्वंतीति यावत् परस्परानध्या
सहेतावत्यंतवैलक्षण्ये दृष्टांतस्तमःप्रकाशवदिति। इतरेतरभाव इतरेतरत्वं तादात्म्यमिति या
वत् तस्यानुपपत्ताविति स्यादेतन्मा भूद्धर्मिणोः परस्परभावस्तद्धर्माणां तु जाड्यचैतन्यनित्यत्वा
नित्यत्वादीनामितरेतराध्यासो भविष्यति दृश्यते हि धर्मिणोर्वि [illegible] वेकाग्रहेपि तद्धर्माणामध्यासो
यथा जपाकुसुमाद्भेदेन गृह्यमाणेपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिंबोद्ग्राहि
त्वरूपिणि स्फटिके रक्तस्वरूपविभ्रम इत्यत उक्तं तद्धर्माणामपीति। इतरेतरत्र धर्मिणि धर्माणां भा
वो विनिमयः तस्यानुपपत्तिः अयमभिसंधिः रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यांतरस्य तद्विवे
केन गृह्यमाणस्यापि छायां गृह्णीयात् चिदात्मा तु नीरूपो विषयी न विषयच्छायामुद्ग्रहीतुमर्हति।
यथाहुः शब्दगंधरसानां च कीदृशी प्रतिबिंबतेति तदिह परिशेषाद्विषयविषयिणोरन्योन्यात्मसं
भेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यं तौ च धर्मिणावत्यंतविवेकेन गृह्य
माणौ। भिन्नावसांकेन्याः सुतरां तयोर्धर्माः स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात् तदिदमु
क्तं धर्मतोपि तरेतरभावानुपपत्ताविति ४।

कोऽस्तु नराणामिति तद्विपर्ययेणेति विषयविपर्ययेणेत्यर्थः मिथ्याशब्दोऽपह्नववचनः यदुक्तं भवति। अध्यासो मेद्या
ग्रहे अध्यासस्तद्विरुद्धस्वे हास्ति भेदग्रहः सोऽनुग्रहं निवर्तयंस्तद्ध्यासमध्यासमपि। निवर्तयतीति मिथ्येति
कारिकेतु युक्तं यद्यपि तथापीति योजना। इदमत्राकूतं भवेदेतदेवं अहमित्यनुभवश्चात्मतत्वं प्रकाशेतन
त्वेतद्दर्शित्वे यथा हि समस्तोपाध्यनवच्छिन्नानंतानंदचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्वं श्रुति
स्मृतीतिहासपुराणेषु गीयते। न चैतानि उपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेण दृशात्मतत्व
मिदं ध्वनितत्पराणि संति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुं अभ्यासे हि भूयस्त्वमर्थस्य भवति य
थाहो दर्शनीया हो दर्शनीयेति नाल्पत्वमपि प्रागेवोपचरितत्वमिति। अहमनुभवस्फ प्राहेशिका
॥३॥ नेकविधशोकदुःखादिप्रपंचोपप्लुतमात्मानमादर्शमनु। कथमात्मतत्वगोचरः कथं वानुपप्लुवः ॥३॥
नवज्ञेषु प्रामाणप्रत्यक्षविरोधादागमा। यस्यैव तद्रूपेत्यस्याप्रामाण्यमुपचरितार्थत्वं वेति युक्तं तस्या
पौरुषेयनिरस्तसमस्तदोषाशंकस्य बोधकतया स्वस्वतः सिद्धप्रमाणभावस्य स्वकार्ये प्रमितावदौ
नपेक्षत्वात् प्रमितावनपेक्षत्वेप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुपपत्तिलक्षणमस्याप्रामाण्य
मिति चेत्। नोत्पादकाप्रतिद्वंद्वित्वात्। नत्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहंतियेन

कारणाभावान्न भवेत्। अपि तु तात्त्विकं न च तत्तस्योत्पादकं। अतात्त्विकप्रमाणभावेभ्योपि सांव्यव
हारिकेभ्यः तत्त्वज्ञानोत्पत्तिदर्शनात्। यथा च वर्णे ह्रस्वत्वदीर्घत्वादयोन्यधर्मा अपि समारोपि
तास्तत्त्वप्रतिपत्तिहेतवः नहि लौकिका नाग इति नग इति वा पदात् कुंजरं वा तरुं गिरिं वा प्रतिपाद्यमा
ना भवंति भ्रांताः। न चानन्यपरं वाक्यं स्वार्थ उपचरितार्थं युक्तं उक्तं हि न विधौ परः शब्दार्थ इति। जेवं
त्वं चानपेक्षितस्य बाध्यत्वे हेतुर्न तु बाधकत्वे रज्जुज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बा
धदर्शनात्। तदनपबाधनेन तदपबाधात्मनस्तस्योत्पत्तेरनुपपत्तेः। दर्शितं च तात्त्विकप्रमाणभाव
स्यानपेक्षत्वं। तथा च पारमर्षं सूत्रं। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति। तथा पूर्वात्परबलीय
स्त्वं तत्र नाम प्रतीयतां॥ अन्योन्यनिरपेक्षाणां यत्र जन्माधियां भवेदिति। अपि च ये प्यहंकारस्य देहात्मा
नमात्मीभिजन्तोरप्यस्य न तात्त्विकत्वमभ्युपेतव्यं। अहमिहैवास्मि सदने जानानो इति सर्वव्यापिनः
प्रादेशिकत्वेन ग्रहात्। उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रदैर्घ्यैवाध्यनिर्भा
सप्रत्ययवत्। नेचेदं देहस्य प्रादेशिकत्वमनुभूयते न त्वात्मन इति सांप्रतं। नाहि तदेवं भवत्यहमि
[illegible]गौणत्वेवा न जानान इति अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तत इति यत्र प्रयोक्तृ

प्रतिपत्त्रोः संप्रतिपत्तिः स गौणः सत्र कोऽदृप्रत्ययपुरःसरः। तद्यथा नैयमिकाग्निहोत्रवचनोऽग्निहो
त्रशब्दः प्रकरणांतराद्बंधूतभेदे कुंडपायिनामयनगते कर्मणि मासमग्निहोत्रं जुहोतीत्यत्रसाध्य
सादृश्येन गौणः। माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः। न त्वहंकारस्य मुख्योऽर्थो
निर्लुंठितशरीरतया देहादिभ्यो भिन्नोऽनुभूयते येन परशब्दः शरीरादौ गौणो भवेत्। न चात्यंतनि
रूढतया न गौणोऽपि गौणत्वाभिमानः सार्षपादिषु तैलशब्दवदिति वदितव्यं। तत्रापि स्नेहानुवृत्ति
लभवात् भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वमात्रात् अभिमानो न त्वर्थयोस्तैलसार्षपयो ॥४॥
॥४॥ रभेदाध्यवसायः। तस्मात्सिद्धं गौणत्वमुभयपदार्थानो गौणमुख्याविवेकविज्ञानेन व्याप्तं तदिह व्याप
कं विवेकविज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति। न च बालस्थविरशरीरभेदेऽपि सोऽहमि
त्येकस्यात्मनः प्रतिसंधानाद्देहादिभ्यो भेदेनास्यात्मानुभव इति वाच्यं। परीक्षकाणामय पंकया
न लौकिकानां। परीक्षका अपि व्यवहारसमये न लोकसामान्यमतिवर्तंते। वक्ष्यत्यनंतरमेव हि
भगवान्भाष्यकारः पश्वादिभिश्चाविशेषादिति। तस्मादप्याहुः शास्त्रचिंतकाः खल्वेवं विवेच
यंति न प्रतिपत्तार इति। तस्मादिशेष्याच्चिदात्मगोचरमहंकारमहमिहास्मि सदने जानाना इति

प्रभुत्वान्नो लौकिकः शरीराद्यभेदग्रहात् आत्मनः प्रादेशिकत्वमभिमन्यते नभस इव घटमणिकमल्लि-
काद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः। न चाहंकारसामान्याद्देहादिवदात्मापि प्रादेशिक इति युक्तं।
न ह्यात्मस्वरूपमणुपरिमाणो वा स्याद्देहपरिमाणो वा अणुपरिमाणत्वे स्थूलोऽहं दीर्घ इति न स्या-
त् देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वं प्रसंगः किंचास्मिन्पक्षे अवयवसमुदायो वा चेत-
येत् प्रत्येकं वावयवाः प्रत्येकं चैतन्यपक्षे बहूनां चेतनानां स्वतंत्राणामेकवाक्यताऽभावात् अपर्यायं
विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत अक्रियं वा प्रसज्येत। समुदायस्य तु चैतन्ययोगे तु एकस्मिन्न-
वयवे विनष्टात्मनोप्यवयवोद्धारेति न चेतयेत्। न च बहूनामप्यवयवानां परस्पराविनाभावनियमो
दृष्टः। एवं च यदा विशीर्णस्तदा तदभावे न चेतयेत्। विज्ञानालंबनत्वेप्यहंप्रत्ययस्याभ्रांतत्वं तद्वस्थमेव।
तस्यास्थिरवस्तुनिर्भासित्वात्। अस्थिरत्वाच्च विज्ञानानां। एतेन स्थूलोऽहमंधोऽहं गच्छामीत्यादयोऽप्य-
ध्यासतया व्याख्याताः। तदेवमुक्तेन क्रमेणाहंप्रत्यये पूलिकूस्मांडीकृते भगवती श्रुतिरप्रत्यूहं कर्तृत्व-
भोक्तृत्वसुखदुःखशोकाद्यात्मत्वमहमनुभवप्रसंजितमात्मनो निषेद्धुमर्हतीति। तदेवं सर्वप्रवादिस्मृति-
स्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य स्वरूपनिमित्तफलैरुपाख्यानं। अन्योऽ

न्यस्मिन्नित्यादि। अन्योऽन्यस्मिन् धर्मिण्यात्मशरीरादौ अन्योन्यात्मकतामध्यस्याहमिदं शरीरादीति ।।
इदमिति चायस्ततोनप्रतीतितः लौकिकव्यवहारो लौकिकानां व्यवहारः सचायमहमिति व्यपदेशः इति
आह सूचितस्य शरीराद्यनुकूलं प्रतिकूलं प्रमेयजातं प्रमाय प्रमाणेन तदुपादानपरिवर्जनादिः अ
न्योऽन्यधर्मांश्चाध्यस्य अन्योन्यस्मिन् धर्मिणि देहादिधर्मान् जन्ममरणजराव्याध्यादीन् आत्मनि
धर्मिण्यस्तदेहादिभावे समारोप्य तथा चैतन्यादीनात्मधर्मान् देहादावध्यस्तात्मभावे समारोप्य म
मेदं जरामरणपुत्रपश्वादिकस्यादीति व्यवहारो व्यपदेशः। इति शब्दसूचितश्चातदनुरूपः प्रवृत्त्यादिः अ
।।५।। त्र चाध्यासव्यवहारक्रियाभ्यां प्रः क्त्वान्तीतः समसमानकर्तृत्वेनाध्यस्य व्यवहार इत्यु ।।५।।
पपन्नं। पूर्वकालत्वसूचितमध्यासस्य व्यवहारे कारणत्वं स्फुटयति मिथ्याज्ञाननिमित्त इति व्यवहारं।
मिथ्याज्ञानमध्यासस्तन्निमित्तस्तद्भावाभावानुविधानात् व्यवहारभावाभावयोरित्यर्थः। न दे
वमध्यासस्य स्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह इतरेतराविवेकेनाविवेकाग्रहणे
त्यर्थः। अथाविवेक एव कस्मान्न भवतीत्याचनाध्यास इत्यत आहात्यन्तविविक्तयोर्धर्मधर्मिणोः
परमार्थतो धर्मिणोरत्ताद्वात्म्यं विवेकेन धर्माणां चासंकीर्णताविवेकः स्यादेतत्। विविक्तयोर्वस्तुनो

र्थे ऽग्रहणनिबंधनस्तादात्म्यविभ्रमोपपद्यते शुक्तेरिव रजताद्भेदाग्रहनिबंधनस्तादात्म्यविभ्रमः ।।
एतत्तु परमार्थसतश्चिदात्मनो ऽन्यस्याभेदाग्रहाद्यासिवरक्तं स्यात्तु । ननु कुतश्चिदात्मनो भेदाग्रहः कुतश्च तादात्म्यविभ्र
मः इत्यत आह सत्यानृते मिथुनीकृत्येति विवेकाग्रहाद्ध्यस्येति योजना । सत्यं चिदात्मा अनृतं बुद्धीन्द्रियदे
हादि ते द्वे धर्मिणी मिथुनीकृत्य युगलीकृत्य । न चासंबद्धत्वे परमार्थसतोः पारमार्थिकं मिथुनत्वमस्तीत्य
भूततद्भावार्थस्य च्वेः प्रयोगः । एतदुक्तं भवति । अप्रतीतस्यारोपायोगात् आरोप्यस्य प्रतीतिरुपयुज्यते न वस्तु
सत्तेति । स्यादेतत् । आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः समारोपनिबंधना च प्रतीतिरिति द्वयोरप
रस्पराश्रयत्वमित्यत आह नैसर्गिक इति । स्वाभाविको ऽनादिरयं व्यवहारः । व्यवहारानादितया तत्का
रणस्याध्यासस्यानादितोक्ता । ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्या
सोपयोगत्वस्यानादित्वाद्बीजांकुरवन्न परस्पराश्रयत्वमित्यर्थः । स्यादेतत् । अस्तु पूर्वप्रतीतिमात्रमु
पयुज्यते आरोपे न तु प्रतीयमानस्य परमार्थसत्ता । प्रतीतिरेव त्वत्यंतासतो गगनकमलिनीकल्पस्य
देहेन्द्रियादेर्नोपपद्यते प्रकाशमानत्वमेव हि चिदात्मनोपि सत्त्वं न तु तदतिरिक्तसत्तासामान्यसम
वायो ऽर्थक्रियाकारिता वा द्वैतापत्तेः । सत्ताया अर्थक्रियाकारितायाश्च सत्तांतरार्थक्रियांतरकल्पने

वस्थापातानुप्रकाशमानेतेवसत्ताभ्युपेतव्यातव्यावहेतुहृदपः प्रकाशमानत्वान्नसंतच्छि
द्रात्मवतूअसत्वेनानध्यकाशमानाः तत्कथंसत्यानृतयोर्मिथुनीभावस्तत्रभावेवाकस्यकुतो
भेदाग्रहः तदसंभवेकुतोऽध्यासइत्याशंक्यवानाह आत्राह साकोऽयमध्यासोनामकइत्याक्षेपेसम
धाताव्लोकसिद्धमध्यासलक्षणमाचक्षाणःरबाह्येपं प्रतिक्षिपतिउच्यतेस्मृतिरूपःपरत्रपूर्वदृष्टा
वभासः।अवसन्नोऽवमतोवाभासोऽवभासः प्रत्ययांतरबाधश्चास्यावसादोऽवमानोवाएतावता
मिथ्याज्ञानमित्युक्तंभवती।तस्येदमुपव्याख्यानंपूर्वदृष्टेत्यादि।पूर्वदृष्टस्यावभासःपूर्वदृष्टावभा
सः।मिथ्याप्रत्ययश्चारोपविषयारोपणीयमिथुनमंतरेणनभवतीतिपूर्वदृष्टग्रहणेनानृतमारोपणी
यमुपस्थापयति।तस्यचदृष्टत्वमात्रमुपयुज्यतेभवरूसत्वेतिदृष्टग्रहणं।तथापिवर्तमानंदृष्टं
दर्शननारोपोपयोगीतिपूर्वेत्युक्तं।तच्चपूर्वदृष्टंतैस्यरूपेणसदपिआरोपणीयतयाऽनिर्वाच्यमित्यनृतं।
आरोपविषयस्यसत्यमाहपरत्रेति।परत्रशुक्तिकादौपरमार्थसतितदनेनसत्यानृतमिथुनमुक्तं।स्यादे
तत्।परत्रपूर्वदृष्टावभासइत्यलक्षणमतिव्यापकत्वात्।अस्तिहिस्वस्तिमत्यांगविपूर्वदृष्टस्यगोत्व
स्यपरत्रकाल्वाद्यामवभासः।अस्तिपाटलिपुत्रेपूर्वदृष्टस्यदेवदत्तस्यपरत्रमाहिष्मत्याम

वभासः सतीं समीचीनः। अवभासपदं च समीचीनेऽपि प्रत्यये प्रसिद्धं यथा नीलस्यावभासः पीतस्या
वभास इत्यत आह स्मृतिरूप इति। स्मृतेः रूपमिव रूपमस्येति स्मृतिरूपः। असन्निहितविषयत्वं च
स्मृतिरूपत्वं। सन्निहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः। स्वप्नज्ञा
नस्यापि स्मृतिविभ्रमरूपस्यैवं रूपत्वात्। तत्रापि हि स्मर्यमाणेऽपि ज्ञाते निद्रोपप्लववशात् असंनि
धानापरामर्शे तत्र पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य समारोपः। एवं पीतः शंखः तिक्तो गुड इत्यत्रा
प्येतल्लक्षणं योजनीयं। तथा हि बहिर्विनिर्गच्छद्भिः स्वच्छनयनरश्मिभिः संपृक्तः पित्तद्रव्यवर्त्तिनीं पीततां
पित्तद्रव्यरहितामनुभवन् शंखं च दोषाच्छादितशुक्लिमानं द्रव्यमात्रमनुभवन् पीततायाश्च शंखस्य
संबंधमननुभवन् असंबंधाग्रहणसारूप्येण पीतं तपनीयपिंडं पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सा
मानाधिकरण्यं पीतत्वशंखत्वयोरारोप्याह पीतः शंख इति। एतेन तिक्तो गुड इति भ्रमस्यापि व्याख्या
तः। एवं दिङ्मात्रात् पुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो ग्राहयत् पूर्वदृष्टाभिमु
खादर्शोदकदेशतामनभिमुखं स्वसंयुक्तं मुखं ग्राहयत् दोषवशात्तद्देशतामनभिमुखतां च मुख
स्याग्राहयद् मुखस्यारोपयतीति प्रतिबिंबविभ्रमोऽपि लक्षितो भवति। एतेन द्विचंद्रदिङ्मो

द्याळातचक्रगंधर्वनगरवंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं योजनीयं। ते हि दुःसंभवति न
प्रकाशमानतामात्रं सत्त्वं येन देहेंद्रियादेः प्रकाशमानेतयासत्त्वावोक्तयेत् नाहि सर्पादिभावेन र
ज्जादयो दर्पोदरस्फटिकादयो वा रूप्यादिगुणयोगिनो न प्रतिभासंते प्रतिभासमाना वा भवंति न ह्या
त्मानस्त हि मर्णो व तथा सति मरुषु मरीचीनिचयमुच्चावचमुच्छलत्तुंगतरंगभंगमालोपमम्यर्ण
मवतीर्णमंदाकिनीत्यभिसंधाय प्रवृत्तस्तोयमापी पादिपासामुपशमयेत् तस्मादकामेनाप्यारोपि
तस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयं। न च मरीचिरूपेण सछिळम वस्तुसत् स्व
॥७॥ रूपेण तु परमार्थसदेव देहेंद्रियादि परस्य रूपेणाप्यसंत इत्यनुभवागोचरत्वात्स्वरूपमारोपितर
तिसांप्रतं यतो यद्यत्सन्नानुभवगोचरः कथं तर्हि मरीच्यादीनामसत्तां तोयतयानुभवगोचरत्वं न च ॥७॥
स्वरूपसत्त्वेन तोयात्मनापि संतो भवंति। यदुक्तं स्वतेनाभावो नामभावादन्यः कश्चिदस्ति अपि तु भाव
स्वभावांतरात्मनाऽभावः स्वरूपेण तु भावः। यथाहुः भावांतरमभावो हि कयाचित्तु व्यपेक्षया इति।
तत्स्वभावात्मनोपाख्येयतयाऽस्य युज्येतानुभवगोचरता प्रपंचस्य पुनरत्यंतासतो निरस्त
समस्तसामर्थ्यस्य निरस्तस्पर्शत्वे कुतोऽनुभवविषयभावः कुतो वा विद्यात्मन्यारोपः। न च विषयस्य
समस्तसामर्थ्यविरहे पि द्रष्टानेमे वत नाद्दशं स्वप्रत्यय सामर्थ्यात्साहिता दृष्टांतसिद्ध स्वभावत्वे

दमुपजातमसतः प्रकाशनं। तस्मादसत्प्रकाशनशक्तिरेवास्या विद्येति सांप्रतं तौ ये ये यमसत्प्रकाशन
शक्तिर्विज्ञानस्य किं पुनरस्याः शक्यं अपदिति चेत्। किमेतत्कार्यं आहोस्विदस्या ज्ञाप्यं। न तावत्कार्यं
मसतस्तत्त्वानुपपत्तेः नापि ज्ञाप्यं ज्ञानांतरानुपलब्धेः अनवस्थापाताच्चाविज्ञानस्वरूपमेवासतः
प्रकाश इति चेत्। कः पुनरेषसदसतोः संबंधोऽसदधीननिरूपणत्वं सतो ज्ञानस्यासता संबंध इति चेत्
अहो वत पापमिति निर्दिष्टः प्रत्यय पं तपस्वीयस्मात् सत्यपि निरूपणमापततेन च प्रत्ययस्वताथत्ते किंचित्।
असतु आधारत्वायोगात्। असदंतरेण प्रत्ययो न प्रत्यांतरं निप्रत्ययस्यैव स्वभावो न त्वसदधीनमस्य
किंचिदिति चेत् अहो वतास्यास्तत्वलपातोयदयमतदुत्पात्तिरतद्धात्मा च तदविनाभावनियतः प्रत्यय इति
तस्मादुत्यंतासंतः शारीरेंद्रियादयो निस्तत्वा नानुभवविषया भवितुमर्हंतीति। अत्र ब्रूमः। निस्तत्वं तेन्नानु
भवगोचरस्तात्किमिदानीं मरीचयोऽपितोयात्मनासतत्वाः यदनुभवगोचराः स्फुः। न सतत्वास्तदात्मनामी
मरीचीनामसत्वात्। द्विविधं च वस्तूनां तत्त्वं सत्वमसत्वं च तत्र पूर्वस्यतः परं तु परतः। यथाहुः। स्वरूपपररू
पाभ्यां नित्यं सदसदात्मके। वस्तुनि ज्ञायते किंचिद्रूपं कैश्चित्कदाचनेति। तत्किं मरीचिषु तोयप्रतिभासे
२ति प्रत्यक्षत्व गोचरः तथा च समीचीनमेष्यां नो नापि बाध्येते। अज्ञान बाध्येतयमिदि मरीचीनतोयात्म

त्तत्वानन्तोयात्मना सद्भावात् तोयात्मनानुगन्तुन् कथमभ्रान्तः कथं वाबाध्यः। हन्त तोयाभावात्मनां
मरीचीनां तोयाभावात्मत्वं तावदस्ति तेषां तोयाभावाद्वृद्धे न तोयभावात्मतानुपपत्तेर्नाप्यसत्। वस्त्वंतरमेव
हि वस्त्वन्तरस्याऽसत्त्वमास्थीयते भावान्तरमभावो ऽन्यो न कश्चिदनिरूपणादिति वदद्भिर्न्यवादि। नन्वारोपि
तं रूपं वस्त्वंतरे तद्धि मरीचयो वा भवेतु गंगादितरंगो वा तोयं। पूर्वस्मिन् कल्पे मरीचेयरतिप्रत्ययः स्या
न्न तोयमिति। उत्तरस्मिंस्तु गंगायां तोयमिति स्यान्नपुनरिहेति देशकालाऽस्मरणेपि तोयमित्येवस्यान्न
॥८॥ त्विहेति। नचेदमत्यन्तमसन्नीदृ तिरस्तमस्तस्वरूपमलीकमेवास्त्विति सांप्रतं। तस्मानुभवगोचरत्वा
नुपपत्तेरितमकमथ स्तात्। तस्मान्नसन्नासन्नापि सदसत्परस्परविरोधादित्यनिर्वाच्यमेवारोपणीयंम
रीचिषु तोयमास्थेयं। तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव अतएव पूर्वदृष्टमिव न त्वतस्तु न तोयं न ॥८॥
च पूर्वदृष्टं किन्तु नूतनमनिर्वाच्यं। एवं देहेन्द्रियादिप्रपंचोप्यनिर्वाच्यो ऽपूर्वोपि पूर्वमिथ्याप्रत्ययोपदर्शितर
व परत्र विहातमन्यध्यस्य तदुत्क्रपपन्नमध्यासलक्षणयोगात्। देहेंद्रियादिप्रपंचबाधने चोपपादयिष्यते
विद्यात्मानुकृतिस्मृतीतिहासपुराणगोचरस्तन्मूल तदविरुद्धन्यायनिर्णीतः प्रत्यहं बुद्धमुक्तस्वभावः सत्वे

नैव निर्वाच्यो ऽबाधितस्वप्रकाशितैवास्य सत्ता। सा च स्वरूपमेव विद्यात्मनः। ननु तद्व्यतिरिक्तसत्त्वात्तत्सा
मान्यसमवाये ऽर्थक्रियाकारिता बाधराहित्ये सर्वमेव दृष्टं॥ समवायमेवं लक्षणको ऽध्यासो ऽनिर्वचनीयः सर्वेषा
मेव संमतः परीक्षकाणां तद्भेदे परे विप्रतिपत्तिरित्यनिर्वचनीयतां दृढयितुमाह तं केचिदन्यत्रान्यधर्माध्या
सं वदंति। अन्यधर्मस्य ज्ञानधर्मस्य रजतस्य ज्ञानाकारस्येति यावत्। अध्यासो ऽन्यत्र बाह्ये। सौ
त्रांतिकयेतावत् बाह्यमास्तिस्कं वैसत्। तत्र ज्ञानाकाराध्यारोपः विज्ञानवादिनोपि यद्यपि न बाह्यं वस्तु
सत् तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यं तत्र ज्ञानाकाराध्यारोपः। उपपत्तिश्च यद्यादृशमनु
भवति तद्रूपं तत्तादृशमेवाभ्युपेतव्यमित्युत्सर्गो ऽन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशान्नेदं
रजतमिति च बाधकस्येदंतामात्रबाधे नाप्युपपत्तौ न रजतगोचरतोचितारजतस्य धर्मिणो बाधे हि रज
तं च तस्य धर्मैरिदंतावबाधिते भवेतां। तद्वरं इदं नैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मितयावरज
तं च हि बाधितमन्यं द्यांतरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिद्ध्यतीति केचित्तु ज्ञानाकारस्या
नात्परिज्ञातं तोच वदंति। यत्र यदध्यासस्तद्विवेकाग्रहणनिबंधनो भ्रमः। अपरितोषकारणं चाहुः विज्ञाना
कारतारजताद्येरनुभवाद्यवस्थाप्येत अनुमानाद्वा। तत्रानुमानमुपरिष्टान्निराकरिष्यते। अनुभवो

ऽपि रजतप्रत्ययो वा स्याद्बाधकप्रत्ययो वा। न तावद्रजतानुभवः। स हीदंकारास्पदं रजतमावेदयति नत्वां
तरं रजतमिति हि तद्वास्यात्प्रतिपत्तुः प्रत्ययाद्व्यतिरेकात्। ध्यानं हि विज्ञानस्याकारमेव बाह्यतयाध्यवस्य
ति तथा चनाहंकारास्पदमस्य गोचरः ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत्। हंत बा
धकप्रत्ययमालोचयतेत्यायुष्मान्। किं पुरोवर्त्तिद्रव्यं रजताद्विवेचयत्याहोस्वित् ज्ञानाकारकतामस्य
दर्शयति। न तु ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः। पु
॥५॥ रोवर्त्तित्वप्रतिषेधाद्दर्थात् ज्ञानाकारतेति चेन्मा संन्निधानाग्रहनिषेधाद्दसन्निहितो भवति प्रतिपत्तुः ॥५॥
अत्यंतसन्निधानं त्वस्य प्रतिपत्त्रात्मकं कुतस्त्यं। न ह्येष रजतस्य निषेधो नचेदं ऽतापाः किंतु विवेकाग्रहप्र
संजितस्य रजतव्यवहारस्य। न वर रजतमेव शुक्तिकायां प्रसंजितं रजन। ज्ञानेन हि रजतनिर्भासस्य न शु
क्तिकालंबनं युक्तमनुभवविरोधात्। न खलु सत्तामात्रेणालंबनमिति प्रसंगात् सर्वेषामर्थानां सत्त्वाविशे
षाद्दालंबनत्वप्रसंगात्। नापि कारणत्वेन इंद्रियादीनामपि कारणत्वेन तथात्वप्रसंगात्। तथावभासमान
मेतेवालंबनार्थः। न च रजतज्ञाने शुक्तिकाभासत इति कथमालंबनं भासमानाताभ्युपगमे वा कथं न शु

न्नव विरोधः। अपि चेंद्रियादीनां समीचीनज्ञानोपजननसामर्थ्यमुपलब्धमिति कथमेभ्यो मिथ्याज्ञानसंभ
वः दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेत्। न दोषाणां कार्योपजननसामर्थ्यविघातमा
त्रहेतुत्वात्। अन्यथा दग्धादपि कुटजबीजादंकुरोत्पत्तिप्रसंगात्। अपि च स्वगोचरव्यभिचारे विज्ञाना
नां सर्वत्रानाश्वासप्रसंगः तस्मात्सर्वं ज्ञानं समीचीनमास्थेयं। तथा च रजतमिति इदमिति च द्वे ज्ञाने स्मृ
त्यनुभवरूपे तत्रेदमिति पुरोवर्त्तिद्रव्यमात्रग्रहणं दोषवशात् तद्गतशुक्तित्वसामान्यविशेषस्याग्रहा
त् तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधनक्रमेण रजते स्मृतिं जनयति सा च गृहीतग्रहणस्वभावा
पि दोषवशात् गृहीततत्तांशप्रमोषात् ग्रहणमात्रमवतिष्ठते। तथा च रजतस्मृतेः पुरोवर्त्तिद्रव्यमा
त्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात्। सन्निहितरजतगोचरज्ञानसारूप्येणेदं रजतमि
ति भिन्ने अपि स्मरणग्रहणे अभेदव्यवहारे सामानाधिकरण्यव्यपदेशं च प्रवर्त्तयतः। क्वचित्पुनर्ग्रह
णे एव मिथोऽगृहीतभेदे यथा पीतः शंखइति। अत्र हि बहिर्निर्गच्छन्नयनरश्मिवर्त्तिनः पित्तद्रव्य
स काचस्येवातिस्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते शंखोऽपि दोषवशात् शुक्लगुणरहितः स्वरूपमा
त्रेण गृह्यते तेन द्वयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात् पीततपनीयपिंडप्रत्यक्षाविशेषेणाभेदव्य

ग्यात्र सामानाधिकरण्यव्यपदेशश्चानेदंग्रहप्रसंजिताभेदव्यवहार बाधनाच्च नेदं रजतमिति वि
वेकप्रत्ययस्यबाधकत्वमप्युपपद्यते। तदुपपत्तौ च प्राचीनस्य प्रत्ययस्य भ्रांतत्वमपि लोकसिद्धं सिसि
द्धं भवति। तस्माद्यथार्थाः सर्वे विप्रतिपन्नाः संदेहविभ्रमाः प्रत्ययत्वात् घटादिप्रत्ययवत्। तादृग्दंमुक्तं
यत्र यस्मिन् शुक्तिकादौ परस्य रजतादेरध्यासः इति लोकप्रसिद्धिः। नासौऽन्यथाख्यातिनिबंधना किं
तु तस्य रजतादेस्तत्स्मरणस्य चागृहीततत्तांशप्रमोषेण गृहीतिमात्रस्य यदिदमिति पुरोवस्थि
तात् रूप्यमात्रात् तत्तानाच्च विवेकः न हि ग्रहणनिबंधनोऽत्र मः भ्रांतत्वं च स्मरणग्रहणयोरितरेतर
॥१०॥ सामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति। अन्यत्वेनाप्यपरितुष्यंतो यत्र यदध्यास ॥१०॥
स्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते। अत्रेदमाकूतं। अस्ति तावदिदं रजतमिदमिति
प्रत्ययात् पुरोवर्त्तिनि द्रव्ये प्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनं। तदेतत्तावद्ग्र
हणस्मरणयोः तद्गोचरयोश्च मिथो भेदाग्रहमात्रेण वितुमर्हति ग्रहणनिबंधनौ हि चेतनव्यवहारव्यप
देशौ नाग्रहणमात्रेण। ननूक्तं नाग्रहणमात्रात् किंतु स्मरणग्रहणयोः स्वमिथःस्वरूपतो विषयतश्चा
गृहीतभेदे समीचीनपुरःस्थितरजतविज्ञानसदृशीतद्व्यवहारे सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः

अथ समीचीनज्ञानसादृश्यमनयोः गृह्यमाणं व्यवहारप्रवृत्तिहेतुः। अगृह्यमाणं वा। सत्तामात्रेण गृह्यमा
णत्वेऽपि समीचीनज्ञानसारूप्यमनयोरिदमिति च रजतमिति च ज्ञानयोरिति ग्रहणं। अन्यथा तयोरेव स्वरूपतो
विषयतश्च मिथो भेदाग्रह इति ग्रहणं। तत्र न तावत्समीचीनज्ञानसादृश्यमिति ज्ञानं समीचीनज्ञानवद्व्य
वव्यहारप्रवर्तकं नहि गोसदृशो गवय इति ज्ञानं गवार्थिनं गवये प्रवर्त्तयति। अनयोरेव भेदाग्रह इति तु ज्ञा
नं परास्तं। नहि भेदाग्रहे अनयोरिति भवति अनयोरिति ग्रहणे भेदाग्रहणमिति च भवति। तस्मात्सत्तामात्रेण
भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति वक्तव्यं। तत्र किमयमारोपोत्पादक्रमेण व्यवहारहेतुरस्त्वाहो अनुत्पा
दितारोप एव स्वतंत्र इति। वयं पश्यामः। चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः आरोपज्ञानोत्पादक्रमेणै
वेति ननु सत्यं चेतनव्यवहारोऽज्ञानपूर्वकः किंतु अविदितविवेकग्रहणे स्मरणपूर्वक इति मैवं। नहि रज
तप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते। इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवा
दः। कथं चायमिदंकारास्पदे प्रवर्त्तेत यदि न तदिच्छेत्। अन्यदिच्छत्यन्यत्करोतीत्यैति व्याहतं न चेदंकारा
स्पदं रजतमिति जानीयात्कथं रजतार्थी तदिच्छेत्। यद्यतथात्वेनाग्रहणादिति ब्रूयात्स प्रतिवक्तव्यः। अथ
तथात्वेनाग्रहणात् कस्मान्नोपेक्षत इति सोऽयमुपादानोपेक्षाभ्यामभिन्न आकृष्यमाणश्चेतनोऽव्यव

…दंकारास्पदे रजतसमारोपेणोपादानं एवमवस्थाप्यतरति केचिदाग्रहः समारोप्योत्पादनक्रमेण
…प्रवृत्तिहेतुः। तथाहि। केचिदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य तज्जातीयस्योपकारहेतुभावम
…तज्जातीयतयारदंकारास्पदे रजते तमनुमाय तदर्थी प्रवर्त्तत इति आनुपूर्व्यं सिद्धं। न च तटस्थर
जतनिष्ठतिरिदंकारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति। रजतत्वस्य हेतोः पक्षधर्मता तू। ।
एकदेशादर्शनं खल्वनुमापकं न त्वनेकदेशादर्शनं। यथाहुः ज्ञातसंबंधस्यैकदेशदर्शनादिति। स
मारोपे तु एकदेशदर्शनमस्ति। नासिद्धमेतत्। विवादाध्यासितं रजतादिज्ञानं पुरोवर्त्तिवस्तुविषयं
।१११। रजतार्थिनस्तत्र नियमेन प्रवर्त्तकत्वात् यद्यदर्थिनं यत्र नियमेन प्रवर्त्तयति तत् ज्ञानं तद्विषयं यथोभ
यवादिसिद्धं समीचीनरजतज्ञानं तथा चेदं तस्मात्तथेति। यच्चोक्तमनवभासमानतया न शुक्तिरालंबन ।।१११।
मिति। तत्र भावानुपृष्टो व्याचष्टां। किं शुक्तिकोत्वेरकात्वस्येदं रजतमिति ज्ञानं प्रत्यनालंबनत्वं अहो
द्रव्यमात्रस्य पुरःस्थितस्य सितभास्वरस्य यदि शुक्तिकात्वस्य अनालंबनत्वं अहो उत्तरस्यानालंबनत्वं
ब्रुवाणस्य तवैवानुभवविरोधः। तथाहि रजतमित्यनुभवन्ननुभविता पुरोवर्त्तिवस्त्वंगुल्यानिर्दिशति। ।
दृष्टं बहूनां कारणानामौत्सर्गिककार्यप्रतिबंधेन कार्यान्तरोपजननसामर्थ्यं यदौषधिवाग्निदग्धा
नां वेत्रबीजानां कदलीकाउजननं भस्मकदुष्टचोदर्यस्य तेजसो बहून्नपानपचनमिति प्रत्यक्षे

बाधकापह्नुतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासो दूतवह्न्यनुष्णत्वानुमानवदुपन्यस्तोक्तं मि
थ्याज्ञानस्य पक्षस्य व्यक्तिविचारे सर्वत्रानाश्वासप्रसंग इति तद्बाधकत्वेनस्यतः अप्रामाण्यं नाम किं विचारेणेति स्फु
त्वादृयद्विरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते दिङ्मात्रं चास्य स्मृतिप्रमोषभंगस्यो
क्तं विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगंतव्य इति तदिदमुक्तं। अन्ये तु यत्र यदध्यासस्तस्यैव विपरी
तधर्मत्वकल्पनामाचक्षत इति यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्म
त्वकल्पना रजतत्वधर्मत्वकल्पनामिति योजना। ननु संतु परीक्षकाणां विप्रतिपत्तयः प्रकृते तु कि
मायातमित्यत आह। सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। अन्यस्यान्यधर्मकल्पना
अनृतता सा चानिर्वचनीयेत्यधस्तादुपपादितं। तेन सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्म
कल्पनाऽनिर्वचनीयाऽवश्यंभाविनीति अनिर्वचनीयता सर्वतंत्रसिद्धांत इत्यर्थः। अख्यातिवादि
किरिकाभ्यामपि सामानाधिकरण्यो व्यपदेशप्रवृत्तिनियमस्तेहादिदमभ्युपेतव्यमिति भावः। न केव
[illegible]मन्यतौ ते परीक्षकाणां सिद्धा अपि तु लौकिकानामपीत्याह तथा च लोकेऽनुभवः शुक्तिका
[illegible]जतवदवभासत इति। ननु नारजतमिदमिति निषेधः स्यादेतत्। अन्यस्यान्यात्मनाविभ्रमो लोके
सिद्धः एकस्य त्वभिन्नस्य भेदविभ्रमो न दृष्ट इति कुतश्चिदात्मनोऽभिन्नानां जीवानां भेदविभ्रम

तत्र कुतूहलकश्चञ्चुः सद्वितीयं वदिति। पुनरपि विदात्मन्यध्यासमाक्षिपति कथं पुनः प्रत्यगात्मन्यवि-
षये अध्यासो विषयधर्माणां। अयमर्थः। चिदात्मा प्रकाशते न वा। न चेत्प्रकाशते कथमस्मिन्नध्यासो विष-
यधर्माणां। न खलु अप्रतिभासमाने पुरोवर्त्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवति।
प्रतिभासे वा न तावदयमात्मा जडो घटादिवत् पराधीनप्रकाश इति युक्तं। न खलु स एव कर्म च कर्ता च
भवति विरोधात्। परसमवेतक्रियाफलशालि हि कर्म न च ज्ञानक्रिया परसमवायिनीति कथमस्यां
कर्म न च तदेव स्वं च परं च विरोधात्। आत्मान्तरसमवायाभ्युपगमे तु तस्यैवास्यात्मनोऽनात्मत्वप्रसं-
गः एवं तस्यैत्यनवस्थापातः। स्यादेतत्। अनात्मा जडोपि सर्वार्थज्ञानेष्ववभासमानोऽपि कर्तैव न कर्म
।१२५। परसमवेतक्रियाफलशालित्वाभावात् चैत्रवत्। यथाहि चैत्रसमवेतक्रियया चैत्रनगरप्राप्तावुभय-
समवेतायामपि क्रियमाणायां नगरस्यैव कर्मता परसमवेतक्रियाफलशालित्वात् न तु चैत्रस्य ॥१२५॥
क्रियाफलशालिनोऽपि चैत्रसमवायाद्गमनक्रियाया इति। तन्न श्रुतिविरोधात्। श्रूयते हि सत्यं
ज्ञानमनन्तं ब्रह्मेति उपपद्यते च। तथाहि योयमर्थप्रकाशः फलं यस्मिन्नर्थश्चात्मा च प्रथेते स किं
जडः स्वयंप्रकाशो वा जडश्चेद् द्वितयात्मानावपि जडाविति कस्मिन् किं प्रकाशेताविशेषात्। आन्ध्य-
मशेषस्य जगतः। तथा चाभाणकः। अंधस्येवांधलग्नस्य विनिपातः पदे पदे न च विच्छीनमेव

विज्ञानं अर्थात्मानौ ज्ञापयति चक्षुरादिवदिति वाच्यं ज्ञापनं हि ज्ञानजननं जनितं च ज्ञानं जडं सन्तो
त्के दूषणमतिवर्तेतेति एवमुत्तरेष्वपि ज्ञानानि जडानीत्यनवस्था तस्मादपराधीनप्रकाशा
संविदुपेतव्या तथापि किमायातं विषयात्मनोः स्वभावजडयोः एतदायातं यतयोः संविदा जडेति
तात्किं पुत्रः पंडित इति पितापंडितोऽस्तु स्वभाव एव संविदः स्वयंप्रकाशत्वमाः यदर्थात्मसंबंधितेति
से तु । हंत पुत्रस्यापि पंडितस्य स्वभाव एव यत्किं तु संबंधिता इति समानं । सहार्थात्मप्रकाशेन संवि
त्प्रकाशो न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेन्न तत्किं संविदो लिंगिनौ संविदात्मार्थप्रका
शेतया च न स्वयंप्रकाशासंक्य विनून च संविदर्थात्मप्रकाश इति । अन्य संविदर्थात्मप्रकाशौ न सं
विद्योलिंगेन संविद्देवतौ एवं चेन्न यावदुक्तं भवति संविदात्मार्थौ सहेति तावदुक्तं भवति संविदर्था
त्मप्रकाशौ सहेति तथा च न निवह्निता र्थसिद्धिः । न चातीतानागतार्थगोचरायाः संविदोऽर्थसहभा
कोपि तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेन्न । न अर्थसंविदोरेव हानादिबुद्धी
नामपि तद्विषयत्वानुपपत्तेः । अर्थविषयहानादिजननाद्धानादिबुद्धीनामर्थविषयत्वं अर्थविषय
हानादिबुद्धिजननाच्च अर्थसंविदस्तद्विषयत्वमिति चेन्न तत्किं देहस्य प्रयत्नवदात्मसंयोगो देहप्र
वृत्तिनिवृत्तिहेतुरर्थे इत्यर्थप्रकाशो ऽस्तु ज्ञाद्या देहात्मसंयोगो नार्थप्रकाश इति चेन्न । नन्वयं स्वयं

प्रकाशोऽपि स्यादात्मन्येव स्वद्योतत्वप्रकाशार्थैर्नुन्नत्वरूपपादितं न च प्रकाशस्यात्मनो विषयाः। ते
हि दिक्कालस्थूलह्रस्वदीर्घतयाऽनुभूयन्ते प्रकाशस्त्वापमान्तरोऽस्थूलो नाऽणुरह्रस्वोऽदीर्घश्चेति प्र
काशते। तस्मादिदंऽनुभूयमानः स्वद्वितीयश्चायं ममाः प्रकाशादन्योऽनिर्वचनीय एवेति युक्त
मुत्पश्यामः न त्वात्मस्य प्रकाशस्याज्ञानतः स्वलक्षणत्वेनानुभूयते न चानिर्वाच्योऽर्थभेदः प्रकाश
निर्वाच्यभेदनुमर्हति अतिप्रसंगात् न चानर्थानामपि परस्परभेदः समीचीनज्ञानपद्धतिमध्या
स्तरत्स्फटिकपरिदृष्टेषु रूपपादापेक्ष्यते। तद्रूपं प्रकाशस्य एव स्वरूपं प्रकाशः एकः कूटस्थो नित्यो निरंशः
प्रत्यगात्माऽशक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्य आत्मनं प्रतीपं निर्वचनीयमनेति जनो विना नीतिप्र
॥१७॥ त्यक्षस्वाभासावात्मेति प्रत्यगात्मा स्वचापराधीनज्ञानप्रकाशत्वादनंशत्वाच्च विषयः तस्मिन्नध्या ॥१७॥
सो विषयधर्माणां देहेन्द्रियादिधर्माणां कथं किमर्थं क्षेपेऽत्र युक्तोऽयमध्यासस्तस्माक्षेपः। कस्माद्युक्त
इत्यत आह सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यतीति तद्युक्तं भवति। यत्पराधीनप्रकाशम
शावच्छिन्नत्सामान्याशग्रहे करणदोषाच्च विशेषाग्रहेऽन्यथाप्रकाशते प्रत्यगात्मा त्वपराधीन
प्रकाशः तथास्य ज्ञाने कारणानपेक्षतेपेन तदाश्रमे दोषे दूष्यते न चांशावानूपेन काश्चिदस्यांशो
गृह्यते कश्चिन्न गृह्यते न हि तदेवत्तदानीमेव तेनैव गृहीतमगृहीतं च संभवतीति न स्वयं प्रकाशपक्षे

ध्यासः सदृतेनप्यप्रकाशे पुरोवस्थितत्वस्यापरोक्षत्वस्याभावाभाध्यासः नहि शुक्त्यावपुरःस्थिता
यां रजतमध्यस्यतीदं रजतमिति तस्माद्दत्यंतग्रहेऽत्यंताग्रहे नवाध्यासइति सिद्धं। स्यादेतत् अविष
यत्वेविद्दात्मनो नाध्यासोविषयएवनुविद्दात्मा अस्मत्प्रत्ययस्य तत्कथं नाध्यासइत्यत आह युष्मा
त्प्रत्ययापेतस्य चप्रत्यगात्मनोऽविषयत्वं ब्रवीषि विषयत्वे हि चिदात्मनोऽन्योविषयीभवेत् नाप्यावा
त्रपोविषयीसएवचिदात्माविषयः स्यात् ततोऽन्योयुष्मत्प्रत्ययगोचरोऽभ्युपेयः। तस्मादनात्मत्वप्रसंगा
नवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वं अतएव अविषयत्वमात्मनोवक्तव्यं तत्त्वावनाध्यासइत्यर्थः।
परिहरति। उच्यते नतावदयमेकांतेनाविषयः। कुतः। अस्मत्प्रत्ययविषयत्वात्। अयमर्थः। सत्यं प्रत्य
गात्मा स्वप्रकाशत्वादविषयः अनंशश्च तथाप्यनिर्वचनीयाऽनाद्यविद्यापरिकल्पितबुद्धिमनः सू
क्ष्मस्थूलशरीरेंद्रियावच्छेदेनाऽनवच्छिन्नोपि वस्तुतोवच्छिन्नइवाऽभिन्नोपिभिन्नइवाकर्तापिक
र्तेवाभोक्तापिभोक्तेवाविषयोप्यस्मत्प्रत्ययविषयइवजीवभावमापन्नोऽवभासते नभइवघटमणि
रकमल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मकमिवेति। नहि चिदेकरसस्यात्मनश्चिदंशेगृहीते
गृहीतं किंचिदस्ति नस्वच्छत्वानंदनित्यत्वविभुत्वादयोऽस्यचिद्रूपाद्वस्तुतोभिद्यंते येनतद्ग्रहेन
येरन्। गृहीताएवतुकल्पितेनकोशैर्विनोवेष्टिताइत्यगृहीताइवाभांति नचात्मनो

इभ्यो भेदस्तात्त्विको येन चिदात्मानिगृह्यमाणोपि गृहीतो भवेत् बुद्ध्यादीनामनिर्वाच्यत्वेना
त्तिविक्तस्वरूपानिर्वचनीयत्वात् तस्माच्चिदात्मनः स्वयंप्रकाशस्यैवानवच्छिन्नस्यावच्छिन्नेभ्यो बुद्ध्या
ऽदिभ्यो निर्वाच्यत्वेनान्येभ्यो बुद्ध्यादिभ्यो भेदाग्रहात् तदध्यासेन जीवभाव इति तस्य चानिदमिदमात्म
नोऽस्मत्प्रत्ययविषयत्वमुपपद्यते। तथा हि कर्ता भोक्ता चिदात्माहंप्रत्यये प्रकावभासते न चोदासीन
स्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति यस्य च बुद्ध्यादेः कार्यकरणसंघातस्य क्रियाभोगशक्ती न
तस्य चैतन्यं तस्माच्चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः स्वयंप्रकाशोऽ
१४८ पि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च जन्तुरिति च क्षेत्र
इति चाख्यायते न खलु जीवश्चिदात्मनो भिद्यते तथा हि श्रुतिः अनेन जीवेनात्मनेति तस्माच्चिदात्मनो ॥१४८॥
ऽव्यतिरेकात् जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेन कर्तृत्वभोक्तृत्वपायव्यवहारयोग्यः क्रियत इत्यहंप्रत्य
याळंबनमुच्यते न बाध्यासे सति विषयत्वं विषयत्वे वाध्यास इत्यन्योन्याश्रयमिति सांप्रतं बीजांकुर
वदनादित्वात् पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादित्युक्तं
नैसर्गिकोऽयं लोकव्यवहार इति भाष्यग्रंथेन तस्मात्सुष्ठूक्तं न तावदयमेकांतेनाविषय इति जीवो

हिचिदात्मतयास्वयंप्रकाशात्तयाऽविषयोप्यौपाधिकेनरूपेणविषयइतिभावः।स्यादेतत् नवयमपराधीनप्रकाशतया
ऽविषयत्वेनाध्यासंस्मत आहापरोक्षत्वाच्चप्रत्यगात्म।प्रसमपाकुर्मः किंतुप्रत्यगात्मानस्वतोनापिपरतःप्रथ
तइत्यविषयइतिब्रूमः तथातस्याऽपरोक्षत्वस्यसर्वथा अप्रथमानेप्रत्यगात्मनिकुतोध्यासस्त्यतआहापरोक्षत्वा
च्चप्रत्यगात्मप्रसिद्धेः।प्रतीचआत्मनःप्रसिद्धिःप्रथातस्याअपरोक्षत्वात् यद्यपिचप्रत्यगात्मनिनान्याप्रथा
स्तितथापिभेदोपचारोयथापुरुषस्यचैतन्यमिति एतदुक्तंभवति अवरूपंविद्यात्माऽपरोक्षोऽभ्युपेयःत
दप्रथायांसर्वस्याप्रथनेनजगदांध्यप्रसंगादित्युक्तंश्रुतिनिश्चात्रभवतितमेवभांतमनुभातिसर्वंतस्यभा
सासर्वमिदंविभातीतितदेवंपरमार्थपरिहारमुक्त्वाऽभ्युपेत्यापिचिदात्मनःपरोक्षतांप्रौढिवादितयापरिहा
रांतरमाहानचायमस्तिनियमःपुरोवस्थितएवविषयेविषयांतरमध्यसितव्यं कस्मादयंनानियम
स्यतआहअप्रत्यक्षेऽपिह्याकाशेबालास्तलमलिनताद्यध्यस्यंतिहियस्मादयंनभोहिद्रव्यंसत्रूपस्य
र्शविरहान्नबाह्येंद्रियप्रत्यक्षंनापिमानसंमनसोऽसहायस्यबाह्येऽप्रवृत्तेः तस्मादप्रत्यक्षंअथचतत
त्रबालाअविवेकिनःपरदर्शितदर्शिनः कदाचित्पार्थिवच्छायांश्यामतामारोप्यकदाचित्तैजसंशुक्लत्वमारो
[illegible]लोत्पलपलाशश्यामलमितिवाराजहंसमालाधवलमितिवाविवर्णयंतितत्रापिपूर्वदृष्टस्यतैजस

अ॰ १

स्य वा तामसस्य वानूपस्य परत्र नभसि स्मृतिरूपोऽवभास इति एवं तादेवतल्लक्षणमध्यस्यंति अवाङ्मुखी भूत
महेंद्रनीलमणिमयमिव महाकटाहकल्पमित्यर्थः। उपसंहरति एवमुक्तेन प्रकारेण सर्वाक्षेपपरिहारदृढविरूढः
प्रत्यगात्मन्यप्यनात्मनां बुद्ध्यादीनामध्यासः। ननु सति सत्यस्याध्यासः तत्किमर्थमेषमयमेवाध्यास आ
क्षेपसमाधानाभ्यां कल्प्यते न। अध्यासमात्रमिष्यत आह तमेतमेवं लक्षणकमध्यासं पंडिता अविद्येति मन्यं
ते अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धं तदुच्छेदाय च वेदांताः प्रवृत्ता इति वक्ष्य
॥१५॥ ति प्रत्यगात्माध्यास एव सर्वानर्थहेतुः न पुना रजतादिविभ्रम इति स एवाविद्या तत्स्वरूपं च अविज्ञातं न ॥१५॥
शक्यं छेत्तुमिति तदेव कल्प्यते नाध्यासमात्रं अत्र च एवं लक्षणमित्येव रूपमपाऽनर्थहेतुतोक्ता। यस्मात्प्र
त्यगात्मन्यज्ञानापादिरहिते अज्ञानापाद्यपेतांतःकरणादितादात्म्यारोपणं प्रत्यगात्मानमदुःखं दुःखाकरोति त
स्मादनर्थहेतुः न चैवं पृथग्जना अपि मन्यंतेऽध्यासं येन न कल्प्येत इत्यत उक्तं पंडिता मन्यंत इति नन्विय
मनादिरविनिरूढनिबिडवासनासनानुबद्धाऽविद्या न शक्या निरोद्धुमुपायाभावादिति यो मन्यते तं प्रति तन्निरो
धोपायमाह। तद्विवेकेन च वस्तुस्वरूपावधारणं निर्विचिकित्सं ज्ञानं विद्यामाहुः पंडिताः। प्रत्यगात्मनि खल्वत्यं
तविविक्ते बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः तत्र श्रवणमननादिभिर्यद्विवेकज्ञानं तेन

विवेकाग्रहे निवर्त्तिते अध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्यां विदुस्तत्स्वरूपं स्वरूपेण्यवतिष्ठ
तरत्यर्थः । स्यादेतत् अतिनिरूढनिविडवासनानुबद्धाऽविद्या विद्ययापबाधिताऽपि स्ववासनावशा=
त्पुनरुद्भविष्यति प्रवर्त्तयिष्यति च वासनादिकार्यं स्वोचितमित्यत आह तत्रैवं सति एवंभूतवस्तुतत्त्वावधा
रणे सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वाणुमात्रेणापि स न संबध्यते अंतःकरणादिदोषेणाशनायादि
नाविद्यात्माविद्यात्मनो गुणेन चैतन्यानंदादिना अंतःकरणादि न संबध्यते एतदुक्तं भवति तत्त्वावधारणा
भ्यासस्य हि स्वभाव एव स तादृशो यदनादिमपि निरूढनिविडवासनमपि मिथ्याप्रत्ययमपनयति तत्त्व
पक्षपातो हि स्वभावो धियां । यदाहुर्बाह्या अपि निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधोऽयत्न
वत्वेऽपि बुद्धेस्तत्पक्षपातत इति । विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यात्यंतांतरंगस्य कुतोऽनि
र्वाच्यया ऽविद्यया बाध इति यदुक्तं तस्मान्नृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमिति लोकव्यव
हार इति तत्र व्यपदेशलक्षणो व्यवहारः लोक इति शास्त्रसूचितं लोकव्यवहारमादर्शयति तमेतमविद्याख्य
मिति निगदव्याख्यातं । आक्षिपति कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि । तत्त्वपरिच्छेदो
हि प्रमा विद्या तत्साधनानि प्रमाणानि कथम् अविद्यावद्विषयाणि नाविद्यावंतं प्रमाणान्याश्रयंतीति तत्कार्य

स्यविद्या[illegible]विरोधित्वादितिभावः संनुवा प्रत्यक्षादीनि संवृत्तापि मिथ्या तथा शास्त्राणि नु पुरुषहि
तान[illegible]यविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हंतीत्यत आह शास्त्राणि चेति।
समा[illegible]नेत्युच्यते देहेंद्रियादिष्वहंममाभिमानहीनस्येत्यादिना तस्य न द्व अध्यासहीनस्य प्रमातृत्वानुपप
त्तेः। अयमर्थः प्रमातृत्वं हि प्रमां प्रति कर्तृत्वं न चाख्यातं स्वं स्वातंत्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य सम
स्तकारकप्रयोक्तृत्वं तद् अनेन प्रमाकरणं प्रमाणं प्रयोजनीयं न च तस्य व्यापारमंतरेण करणं प्रयोक्तुमर्हति
न च कूटस्थनित्यश्चिदात्माऽपरिणामी स्वतो व्यापारवान् तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासात् व्या
पारवत्तया प्रमाणमधिष्ठातुमर्हतीति एवम् अविद्यावत्पुरुषविषयत्वं अविद्यावत्पुरुषाश्रयत्वं प्रमाणा
॥१६॥ नामिति। अथ मा प्रवर्तिषत प्रमाणानि किं नः न्नमित्यत आह न हींद्रियाण्यनुपादाय प्रत्यक्षादि ॥१६॥
व्यवहारः संभवतीत्यवद्धियतेऽनेनेति व्यवहारः फलं प्रत्यक्षादीनां प्रमाणानामित्यर्थः इंद्रियाणीति
इंद्रियलिंगादीनीति द्रष्टव्यं द उ नो गच्छंतीतिवत् एवं हि प्रत्यक्षादीन्युपपद्यते। व्यवहारक्रियया च व्य
वहार्याक्षेपात् समानकर्तृकता अनुपादाय यो व्यवहार इति योजना। किमिति पुनः प्रमातोपादत्ते प्र
माणानि अथ स्वयमेव कस्मान्न प्रवर्तंत इत्यत आह न चानधिष्ठानमंतरेणेंद्रियाणां व्यापारः प्रमाणा

नाव्यापारः संभवति न जातु करणान्यनधिष्ठितानि कर्त्रा स्वकार्ये व्याप्रियंते मा भूत् कुविंदरहितेभ्यो वेमा
दिभ्यः पटोत्पत्तिरिति। अथ देहाद्यधिष्ठाता कस्मान्न भवति कृतमत्रात्माध्यासेनेत्यत आह नचाऽनध्यस्ता
त्मभावेन देहेन कश्चिद्व्याप्रियते। सुषुप्तेऽपि व्यापारप्रसंगादिति भावः। स्यादेतत् यथाऽनध्यस्तात्मभा
वं वेमादिकं कुविंदो व्यापारयन् पटस्य कर्त्ता एवमनध्यस्तात्मभावं देहादिकं व्यापारयन् भविष्यतीत
दभिसः प्रमातेऽनध्यस्तात्मभावुत्य नत आह न चैतस्मिन् सर्वस्मिन्नितरेतराध्यासे इतरेतरधर्माध्या
से वाऽसति आत्मनोऽसंगस्य सर्वथा सर्वदा धर्मधर्मिविमुक्तस्य प्रमातृत्वमुपपद्यते व्यापारवंतो हि कु
विंदादयो वेमादीनधिष्ठाय व्यापारयंति। अनध्यस्तात्मभावस्य तु देहादिषु आत्मनो न व्यापारयोगो
ऽसंगत्वादित्यर्थः। अतश्चाध्यासाश्रयाणि प्रमाणानीत्याह नचेति प्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति
प्रमायां स्वबुफलत्वे स्वतंत्रः प्रमाता भवति अंतःकरणपरिणामभेदस्य प्रमेयप्रवणः कर्तृस्थ चित्स्वभा
वः प्रमा। कथं चेतनोऽस्यांतःकरणस्य परिणामश्चिद्रूपो भवेत् यदि चिदात्मा तत्र नाध्यस्येत कथं चैव चिदा
त्मकर्तृको भावत् यद्यंतःकरणं व्यापारवच्चिदात्मनि नाध्यस्येत। तस्मादितरेतराध्यासात् चिदात्मकर्तृ
स्थ प्रमाफलं सिद्ध्यति नान्यथेति नास्तिह्यतो न च प्रमातृत्वं तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः। प्रमातृत्वेन च प्र

ऽपलब्धस्य ते प्रमापाः फलस्याभावे प्रमाणं न प्रवर्तेत तथा च प्रमाण प्रमाणं स्यादित्यर्थः। उपसंहरति
तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि। स्यादेतत् भवतु प्रथमज्ञानामेवं। आगमोपप
त्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां कृतसन्न्यासानामपि पुंसां प्रमाणप्रमेयव्यवहारो दृश्यत इति कथमविद्या
वद्विषयाण्येव प्रमाणानीत्यत आह पश्वादिभिश्चाऽविशेषादिति इदं तु नामागमोपपत्तिभ्यां
देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानं प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मतां नातिवर्तते यादृ
शो हि पशुशकुन्तादीनां अविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यते
॥१७॥ तेन न तत्सामान्यात् तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयं। चशब्दः समुच्चये। उक्तशङ्कानिवर्त ॥१७॥
न सहिता पूर्वोक्तोपपत्तिश्चाविद्यावत्पुरुषविषयत्वं प्रमाणानां साधयतीत्यर्थः। एतदेव विभजते यथा
हि पश्वादय इति अत्र च शब्दादिभिः श्रोत्रादीनां संबन्धे सतीति प्रत्यक्षं प्रमाणं दर्शितं शब्दादिविज्ञाने
इति तत्फलमुक्तं प्रतिकूल इति चानुमानफलं। तथा हि शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकू
लतामनुस्मृत्य तज्जातीयततोपलभ्यमानस्य प्रतिकूलतामनुमिमीत इति उदाहरति यथा दण्डेति
शेषमतिरोहितार्थं स्यादेतत् भवतु प्रत्यक्षादीनामविद्यावद्विषयाणि शास्त्रं तु ज्योतिष्टोमेन स्वर्गका

मो यजेतेत्यादि न देहाद्यात्माऽध्यासेन प्रवर्त्तितुमर्हति अत्र च खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते।
तथा च पारमार्षं सूत्रं। शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यादिति न च देहादि भस्मीभूतं पा
रलौकिकाय फलाय कल्पत इति देहाद्यतिरिक्तं कं चिद्विद्वांसमधिकारिणमाक्षिपति शास्त्रं तदेवगमश्च विद्येति क
न्यमविद्यावद्विषयं शास्त्रमित्याशंक्याह शास्त्रीये त्विति तु शब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति शास्त्रीयं अधिकार
शास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबंधं विना न निर्वहतीति तावन्मात्रमेवाक्षिपेत् न त्वस्याऽसंसा
रित्वमपि तस्याधिकारेऽनुपयोगात् प्रत्युत औपनिषदस्य पुरुषस्याकर्तुरभोक्तुरधिकारविरोधात् प्र
योक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवतीति तत्र कथमकर्ता प्रयोक्ता कथं
वाऽभोक्ता कर्मजनितफलभोगभागीति तस्मादनाद्यविद्याध्यस्तकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरम
धिकृत्य विधिनिषेधशास्त्रं प्रवर्त्तते। एवं वेदान्ता अपि अविद्यावत्पुरुषविषया एव न हि प्रमात्रादिविभागा
दृते तदर्थाधिगमः ते ह्यविद्यावंतमनुशासतो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपेऽवस्थापयतीति
एतावान् तेषां विशेषः तस्मादविद्यावद्विषयाण्येव शास्त्राणीति सिद्धं। स्यादेतत्। यद्यपि विरोधानुपयोगाभ्या
मौपनिषदः पुरुषोऽधिकारे नापेक्ष्यते तथाप्युपनिषद्भ्योऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुं तथा च

परस्परपराहतार्थत्वेन कृत्स्नोऽपि वेदः प्रामाण्यमपजह्यादित्यत आह प्राक् च तथाभूतात्मेति सत्यमोप
निषद्पुरुषार्थिगमोऽधिकारविशेषी तस्मात्पुरस्तात्कर्मविधयः स्थोचितं व्यवहारजनि निर्वर्त्तयंतो नानु
पजाते न ब्रह्मज्ञानेन शक्या निरोद्धुं न च परस्परपराहतिः विद्याऽविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः य
थान हिंस्यात्सर्वाभूतानीति साध्यांश निषेधेऽपि श्येनेनाभिचरन् यजेतेति शास्त्रप्रवर्त्तमानं न हिंस्यादित्यने
न विरुद्ध्यते न तत्कस्य हेतोः पुरुषभेदादिति अवजित क्रोधारातयः पुरुषाः निषेधे धिक्रियंते क्रोधारातिवशी
कृतास्तु श्येनादिशास्त्रेइति। अविद्यावत्पुरुषयत्वं नातिवर्त्तत इति यदुक्तं तदेवस्फोरयति तथा हीति वर्णा
॥१८॥ ध्यासः राजाराजसूयेन यजेतेत्यादिः आश्रमाध्यासः गृहस्थः सदृशीं भार्यां विंदेतेत्यादिः वयोध्यासः कृष्ण
केशोग्नीनादधीतेत्यादिः अवस्थाध्यासोऽप्रतिसमाधेय व्याधीनां जलादिप्रवेशेन प्राणत्यागइत्यादिः ॥१८॥
आदिग्रहणं पातकोपपातकसंकरीकरणीपात्रीकरणमालिनीकरणाद्यध्यासोपसंग्रहार्थं तदेवमात्मानात्
२ मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य प्रमाणप्रमेयव्यवहारवर्तनेन च दृढीकृत्य
तस्यानर्थहेतुतामुदाहरणप्रपंचेन प्रतिपाद्य विषयं तत्स्वरूपमुक्तं स्मारयति अध्यासोनाम तस्मिंस्तद्बु
द्धिरिति वोचाम स्मृतिरूपः परत्र पूर्वदृष्टावभासइत्यस्य संक्षेपाभिधानमेतत्। तत्राह मितिधर्मितो

द्रात्म्याध्यासमात्रं भवेत्त्वनुपपादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेवममकारं साक्षादशेषानर्थ
संसारकारणमुदाहरणप्रपंचेनाह तद्यथा पुत्रभार्यादिष्विति देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्र
कलत्रादिस्वाम्यं च देहेऽध्याह अहमेव विकलः सकल इति स्वीयस्य पुत्रादेरित्यर्थः स्वस्वत्वत्साकल्येन
स्वाम्यस्साकल्यात् स्वामीश्वरः सकलः संपूर्णो भवति तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो
विकलोऽसंपूर्णो भवति। वा सधर्माधिवैकल्यादयः स्वाम्यप्रणाडिकया संचारिताः शरीरेनानात्मन्यध्यस्य
तीत्यर्थः यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्ये इयं गतिः तदा कैव कथाऽनौपाधिकेषु देहधर्मेषु कृशत्वादि
ष्विति आशयवानाह तथा देहधर्मानिति देहाद् व्यंतरंगाणामिंद्रियाणामध्यस्ततादात्म्यभावानां धर्मान् मूक
त्वादीन् अनंतरंगस्यांतःकरणस्याध्यस्तात्मभावस्य धर्मान् कामसंकल्पादीनात्मन्यध्यस्यतीति योजना
तदनेन प्रपंचेन धर्माध्यासमुक्त्वा तस्य मूलं धर्म्यध्यासमाह। एवमहं प्रत्ययिनं अहंप्रत्ययो अहं वृत्तिर्य
स्मिन् अंतःकरणादौ सोऽयमहंप्रत्ययी तं स्वप्रचारसाक्षिणि अंतःकरणप्रचारसाक्षिणि चैतन्योदासीनताभ्यां
प्रत्यगात्मन्यध्यस्य तदनेन कर्तृत्वभोक्तृत्वे उपपादिते। चैतन्यमुपपादयति तं च प्रत्यगात्मानं सर्वप्रचारसाक्षिणं
तद्विपर्ययेणांतःकरणादिविपर्ययेणांतःकरणाद्यचेतनं तस्य विपर्ययश्चेतनं तेनरस्त्वं भूतल्लक्षणात्तृतीया।
अंतःकरणादिष्वध्यस्यति। तदनेनांतःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्य

कारणद्वयाधारोऽहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः तदुपादा
नश्चाध्यास इत्यनादित्वात् बीजांकुरास्पदं संसारी सर्वानर्थसंभाउवन्नेतरेतराश्रयत्वमित्युक्तं भवति।
प्रमाणप्रमेयव्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाध्यासं सुदृढी
करोति एवमयमनादिरनंतः तत्वज्ञानमंतरेणाशक्यसमुच्छेदः अनाद्यनंतत्वे हेतुरुक्तो नैसर्गिक इति
मिथ्याप्रत्ययरूपो मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तदस्यास्तीति तथोक्तः अनिर्वचनीयपर इत्यर्थः। प्रकृ
तमुपसंहरति अस्यानर्थहेतोः प्रहाणाय विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमित्यत उक्तम् आत्मैकत्वविद्या
॥१५॥ प्रतिपत्तय इति प्रतिपत्तिः प्राप्तिः साक्षात्कारस्तस्यै न तु जपमात्राय नापि कर्मसु प्रवृत्तये आत्मैकत्वं विगलितनिखिलप्रपं ॥१५॥
चत्वमानंदरूपस्य सतः तत्प्रतिपत्तिं निर्विचिकित्सां संभावयंतो वेदांताः समूलघातमध्यासमुपघ्नंतीति त
दुक्तं भवति अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वात् निःप्रयोजनत्वाच्च न जिज्ञा
स्यात् तदभावेन न ब्रह्मज्ञानाय वेदांताः पठ्येरन् अपि त्वविवक्षितार्था जपमात्रे उपयुज्येरन् न हि तद्दोषनि
बंधनप्रत्ययः प्रमाणतामश्नुते न चासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्वभोक्तृत्वाद्यात्मनोऽपनोदितु
मर्हति। आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते न तु वास्तवमतत्वज्ञानेन न हि रज्ज्वा रज्जुत्वं सहस्रमपि सर्प

धाराप्रस्ययाः अपवदितुमुक्तं हं तेमिथ्याज्ञानप्रसंजितं तद्रूपं शक्यं तत्त्वज्ञानेनापवदितुं मिथ्याज्ञानसंस्का
रश्च सुदृढो ऽपि तत्त्वज्ञानसंस्कारेणापहर्तुं निरन्तरदीर्घकालतत्त्वज्ञानाभ्यासजन्मनेति। स्यादेतत्तु प्राणाद्युपा
सना अपि वेदान्तेषु बहुलमुपलभ्यन्ते तत्कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनमर्थ इत्यत आह यथा
चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः। शरीरमेव शरीरकं तत्रनि
वासी शारीरको जीवात्मा तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतया या मीमांसा सा पादयता
कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायग्राह्यवाच्यानां फलवदर्थावबोधपरत्वमापादितं। य
यद्यपि चाविशिष्टस्त्वात्मा कार्य इतिन्यायात् मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकं यद्यपि च वेदान्तेभ्य
श्चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निःप्रपंच एकः प्रत्यगात्मा चावगम्यते। तथापि कर्तृत्वभोक्तृत्व
दुःखशोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरुध्यमाना वेदान्ताः स्वार्थ
तु प्रत्यक्षतानुपचरितार्था वा जपमात्रोपयोगिनो वेत्यादिविकल्पिताः। तथाच तदर्थविचारात्मिका चतु
र्लक्षणी शारीरकमीमांसा नारब्धव्या न च सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो वा येन जि
ज्ञास्यः स्यान्न विचारं प्रयुंजीतेति पूर्वपक्षः। सिद्धान्तस्तु भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणं। तस्य तूक्तेन क्रमेण

श्रुत्यादिबाधकत्वानुपपत्तेः। श्रुत्यादिभिर्विश्वसमस्तौतीर्थैकरैश्वर्यप्रामाण्यानभ्युपगमात्॥ अध्यासत्वं च
सर्वे दांताः नापि वक्ष्यितार्था नाप्यफपवरितार्था। किंतु अकच्छ्रक्षणः प्रत्यगात्मैव तेषां मुख्योर्थः तस्यैव व
क्ष्यमाणेन क्रमेणासंदिग्धत्वात् प्रयोजनवत्वाच्च युक्ता जिज्ञासा रत्या॥ शयवान् सूत्रकारः तज्जिज्ञासा
मस्यूपैत्रेन॥ अथातो ब्रह्मजिज्ञासेति। जिज्ञासासम्पासं देहप्रयोजनेसूचयति तत्र सास्त्रादिष्ठायो व्याप्यत्वा
त् ब्रह्मज्ञानं कर्णोक्त प्रयोजनं न च कर्मज्ञानात् पराधीनमनुष्ठानमिव ब्रह्मज्ञानात्पराधीनं किंचिदस्ति
येन एतदेवां तरप्रयोजनं न वेत् किंतु ब्रह्ममीमांसारब्धमनकेति कर्तव्यतानुज्ञातविषये वेदांतैः ज्ञा
॥२०॥ हितनिर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानंदैकरसं परं नः प्रयोजनं तमर्थमाधिकृ ॥२०॥
त्य हि प्रोक्षावंतः प्रवर्तेन्नेतरां तच्चप्राप्तमप्यनाद्यविद्यावशात् अप्राप्तमिवेति प्रेप्सितं भवति यथा स्वग्रीवा
गतमपि ग्रैवेयं कुतश्चित् भ्रमात् नास्तीति मन्यमानः परेण प्रतिपादितमप्राप्तमिवाप्नोति जिज्ञासानुसं
ज्ञायस्य कार्यमिति स्यकारणसंशयं सूचयति संशयश्च मीमांसारंभं प्रयोजयति। तथा च शास्त्रे प्रेक्षावत्प्र
वृत्तिहेतुसंशयजनसूचनात् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह भगवान् भाष्यकारः वेदांतमीमां
सा शास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं। पूजितविचारवचनो मीमांसाशब्दः

परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलत्वाच्च विचारस्य पूजितत्वात्तस्या मीमांसायाः शास्त्रंसाख्य
नेनाशेषविशेषेभ्योपयावत्प्रतिपाद्यत इति। सूत्रं च बहुर्थसूचनाद्भवति। यथाहुः। लघूनि सूचि
तार्थानि स्वल्पाक्षरपदानि च सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिण इति। तदेवं सूत्रतात्पर्यं व्याख्याय
तस्य प्रथमपदमथेति व्याचष्टे तत्रायं शब्द आनंतर्यार्थः परिगृह्यते तत्र तेषु सूत्रपदेषु मध्ये योऽयमथश
ब्दस आनंतर्यार्थ इति योजना नन्वधिकारार्थोऽप्ययं शब्दो दृश्यते यथा अथैष ज्योतिरिति वेदे यथा च लोके अ
थ शब्दानुशासनं अथ योगानुशासनमिति तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह नाधिकारार्थः
कुतः ब्रह्मजिज्ञासाया अनाधिकार्यत्वात्। जिज्ञासा तावदिह सूत्रे ब्रह्मणस्तु ज्ञाना[illegible]शब्दतः प्रथा
न प्रतीयते न च यथा दण्डी प्रैषानन्वाहेत्यत्र प्रधानमपि दण्डः शब्दार्थो विवक्ष्यते एवमिहापि ब्रह्म तज्ज्ञा
ने सति युक्तं ब्रह्ममीमांसाशास्त्रप्रवृत्तिप्रसंगसंशयप्रयोजनसूचनार्थत्वेन। जिज्ञासैव विवक्षितत्वात्
तद्विवक्षायां तु तदिदं सूत्रमनेन काकदंतपरीक्षाप्रायामिव ब्रह्ममीमांसायां न प्रेक्षावंतः प्रवर्तेरन्। नहि
तदानीं ब्रह्म वा तज्ज्ञानं वाभिधेयप्रयोजने भवितुमर्हतः अन्यथ्यस्याहंप्रत्ययविरोधेन वेदांता
नामेवं विधेर्थे प्रामाण्यानुपपत्तेः कर्मप्रवृत्त्युपयोगितयोपचरितार्थानां वा जपोपयोगिनां वाद्भुमितेव

ादीनामपि विवक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य समत्वात् तस्मात् संदेहप्रयोजनसूचनी जिज्ञा
सेतुपदत्तौ वाक्यतस्थप्रधानं विवक्षितत्वान्न च तस्या अधिकार्यत्वमप्रस्तूयमानत्वात्। येन तत्समभिव्याहृतोऽथ
शब्दोऽधिकारार्थः स्यात्। जिज्ञासाविशेषणं तु ब्रह्म तान्न अधिकार्यमेवेन च दृष्यन्यथशब्दे न संबध्यते। प्राधान्याभा
वात्। न च जिज्ञासामीमांसा येन योगानुशासनवदधिक्रियेत नानात्वं निपात्य माऽथाने द तस्माद्दामानपूर्वाया
मित्यस्माद् धातोर्मानबधेत्यादिना निष्कार्थे सनि व्युत्पादितस्य मीमांसापदस्य पूजितविचारवचनत्वात् स्वा
२१॥ नेष्ठावासक्त्वात् तु जिज्ञासापदस्याप्रवर्तिकात्वे मीमांसायाऽजिज्ञासास्यात् तस्मात्सूष्ठुक्तं जिज्ञासाया अन
धिकार्यत्वादिति। न च प्रवर्त्यप्रवर्तकयोरैक्यमेकत्वे तद्भावानुपपत्तेः न च स्वार्थपरत्वास्योपपत्तौ सत्यामन्या ॥२१॥
र्थपरत्वकल्पनायुक्तातिप्रसंगात् तस्मात्सूष्ठुक्तं जिज्ञासाया अनधिकार्यत्वादिति। अथ मंगलार्थोऽथश
ब्दः कस्मान्न भवति तथा च मंगलहेतुत्वात् प्रत्यूहं ब्रह्मजिज्ञासेति सूत्रार्थः संपद्यते। स्यात् तदाह मंगल
स्य च वाक्यार्थे समन्वयाभावात् उपदर्शितवाक्यार्थे समन्वीयते स च वाच्यो लक्ष्यो वा न चेह मंगल
मथशब्दवाच्यं लक्ष्यं वा किंतु मृदंगध्वनिवदथशब्दश्रवणमात्रकार्यं न च कार्यतयाप्यर्थे समन्वयः
शब्दे व्यवहारे दृष्टचरस्य चः। तत्कि सिद्धान्ती मंगलार्थोऽथशब्दस्तेषु प्रयोगेषु न प्रयोक्तव्यः तथा च

कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कंठं भित्वा विनिर्यातौ तस्मान्मांगलिकावुभौ इति स्मृतिव्याको
पः स्यत आह अर्थांतरप्रयुक्त एव ह्यथशब्दः श्रुत्या मंगलप्रयोजनो भवति अर्थांतरेषु आनंतर्या
दिषु प्रयुक्तोऽथशब्दः श्रुत्या श्रवणमात्रेण मात्रेण वेणुवीणाध्वनिवन्मंगलं कुर्वन् मंगलप्रयोजनो भ
वति अन्यार्थं नीयमानोदकुंभदर्शनवत् तेन न स्मृतिव्याकोपः न चेहानंतर्यार्थस्य सतो न श्रवणमात्रेण मं
गलार्थतेत्यर्थः स्यादेतत् पूर्वप्रकृतापेक्षोऽथशब्दो भविष्यति विनैवानंतर्यार्थत्वं तद्यथेममेवाथशब्दं
कृत्वेत्थं विमृश्यते किमयमथशब्द आनंतर्येऽर्थेऽधिकारे इत्यत्र विमर्शवाक्येऽथशब्दः पूर्वप्रकृतमथशा
ब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षांतरोपन्यासे न चास्यानंतर्यमर्थः पूर्वप्रकृतस्य प्रथमपक्षोपन्यासे
न व्यवाधात् न च प्रकृतानपेक्षस्य तदनपेक्षस्य तद्विषयत्वात् भावेनासमान।विषयतया विकल्पानुपपत्तेः नहि जातु
भवति किं नित्य आत्मा अथानित्या बुद्धिरिति तस्मादानंतर्यं विना पूर्वप्रकृतापेक्ष इहाथशब्दः कस्मान्न भवतीत्यत
आह पूर्वप्रकृतापेक्षायाश्च फलत आनंतर्याव्यतिरेकात्। अस्यार्थः न वयमानंतर्यार्थतां व्यसनितयाश्र
यामहे किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये सा च पूर्वप्रकृतार्थापेक्षत्वेऽप्यथशब्दस्य सिद्ध्यतीति
आनंतर्यार्थत्वावधारणाग्रहोऽस्माकमिति तदिदमुक्तं फलत इति। परमार्थतस्तु पक्षांतरोपन्या

सेपूर्वप्रकृतं पेक्षा न चेह कश्चांतरोपन्यासः इति पारिशेष्यात् आनंतर्यार्थ एवेति युक्तं भवत्वानंतर्यार्थः कि
मेकेवसानं तीत्यत आह सति आनंतर्यार्थत्वे सति। न तावद्यस्य कस्यचिदत्रानंतर्यमिति वक्तव्यं तस्याभिधान
मंतरेण प्राप्तत्वात् अवश्यं हि पुरुषः। किंचित् कृत्वा किंचित् करोति न चानंतर्यमात्रस्य दृष्टं प्रयोजनं पश्या
मः तस्मात् तस्यानंतर्यं वक्तव्यं। यद्विना ब्रह्मजिज्ञासा न भवति यस्मिन्सति भवंतीभवत्येव तदिह मुक्तं यत्पूर्व
वृत्तं नियमेनापेक्षत इति। स्यादेतत्। धर्मजिज्ञासायाः एव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायानंतर्यं धर्म
॥२२॥ वत् ब्रह्मणोप्याम्नायैकप्रमाणगम्यत्वात्। तस्य चागृहीतस्य स्वविषये ज्ञानजननात्। ग्रहणस्य च स्वाध्या
योध्येतव्य इत्य~~ध्ययनेनैवावि~~ध्ययनेनैव नियतत्वात्। तस्माद्वेदाध्ययनानंतर्यमेव ब्रह्मजिज्ञासाया अप्यवश्या
मं द्यार्थत्वेत आह स्वाध्यायानंतर्यं तु समानं धर्मब्रह्मजिज्ञासयोः। अत्र च स्वाध्यायेन विषयेण तद्विषयमध्य ॥२२॥
पनं लक्षयति न त्वाचाथातो धर्मजिज्ञासेत्यनेनैव गतमिति नेदं सूत्रमारब्धव्यं धर्मशब्दस्य वेदार्थमात्रो
पलक्षणतयाऽधर्मवत् ब्रह्मणोऽपि वेदार्थत्वाविशेषेण वेदाध्ययनानंतर्योपदेशसाम्यादित्यर्थः चोद
यति नन्विह कर्मावबोधानंतर्यं विशेषो धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः अस्यार्थः विविदिषंति यज्ञेनेति यं
ज्ञेन तयाम्नस्याय ज्ञादीनामंगत्वेन ब्रह्मज्ञाने विनियोगात् ज्ञानस्यैव कर्मतया इच्छां प्रति प्रधानसंबंधा

च्या प्रधानानां पदार्थानां तत्राणां तत्रापि न च वाक्यार्थज्ञानोत्पत्तौ अंगभावो यत्नादीनां वाक्यार्थज्ञानस्य वाक्यभे
दोत्पत्तेः। न च वाक्यं सहकारितया कर्माण्यपेक्षत इति युक्तं अकृतकर्मणामपि विदितपदतदर्थसंगती
नां समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकांक्षासंनिधियोग्यतानुसंधानव
तां अप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः। अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरि
वर्जनाभावप्रसंगः। तद्बोधतस्तत्तदनुष्ठानपरिवर्जने परस्य शास्त्रं यत्तस्मिन् सति तदर्थानुष्ठानपरि
वर्जनं तत एव तद्बोध इति न चैवेदांतवाक्यानामेव स्वार्थप्रत्यापने कर्मापेक्षा न वाक्यांतराणामिति सांप्र
त विशेषहेतोरभावात्। तत्त्वमसीत्यादिवाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्ध
बुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मना ऐक्यमसंकीर्णं दागित्येव इति यत्तु मा यानतो ऽशुद्धसत्त्वैः
योग्यताविरहनिश्चयात् यज्ञतपोदानतत्कृतानां तत्त्वैकार्थ्यात् विशुद्धसत्त्वाः श्रद्दधानयोग्यतावगमपुरः
सरं [illegible] तमवगमिष्यंतीति चेत् तार्किं इदानीं प्रमाणकारणं योग्यतावधारणं अप्रमाणात् कर्मणो वकु
मध्यवसा[illegible] प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणं वेदांताविरुद्धं तन्मूलन्यायलब्धेन तु योग्यतावधा
रणे कृतं कर्म[illegible] तस्मात् तत्त्वमसीत्यादिः श्रुतिमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया

वाचाऽ॰

ञोपपत्त्या वस्तुतस्तदुपासनायां भावनापराभिधानं। यां दीर्घकालनैरंतर्यवत्यां ब्रह्मसाक्षात्कारफ द्र
लप्रयत्नादीनामनुपयोगः यथाहुः स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिरिति ब्रह्मचर्य
तपःश्रद्धाप्रयत्नादयश्च सत्कारः ~~प्रयत्नादीनाम~~ अत एव श्रुतिः तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति
विज्ञाय तत्त्वोपकरणेन शास्त्रेण प्रज्ञां भावनां कुर्वीतेत्यर्थः अत्र च प्रयत्नादीनां श्रेयःपरंपर्येकळ्वष
निर्वहणद्वारेणोपयोग इति केचित् पुरुषसंस्कारद्वारेणेत्यन्ये न प्रयत्नादिसंस्कृतो हि पुरुषः आदरनैरं
तर्यदीर्घकालैरासेवमानो ब्रह्मभावनाप्रनाद्यावासनां समूलकाषं कषति ततोऽस्य प्रत्यगात्मा प्रस
न्नः केवलो विशदीभवति अत एव स्मृतिः। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः। यस्यैते चत्वारिंशत्सं ॥२३॥
॥२३॥१ स्कारा इति च अपरे तु ऋणत्रयापाकरणेन ब्रह्मज्ञानोपयोगं कर्मणामाहुः आम्नाहि स्मृतिः ऋणानि त्री
ण्यपाकृत्य मनो मोक्षे निवेशयेदिति अन्ये तु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेनेत्यादिश्रु
तिभ्यस्तत्तत्फलायचोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यंगभावमाहुः अतेकत्वर्थ
स्येव खादिरत्वस्य वीर्यार्थतामेकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायात् अत एव पारमर्षं सूत्रं। सर्वापे
क्षा च यज्ञादिश्रुतेरश्ववदिति। यज्ञतपोदानादि सर्वं तदपेक्षा ब्रह्मभावनेत्यर्थः तस्माद्यद्यपि श्रुत्या

पः॥ प्रमाणं यद्विचापारमार्थं सूत्रं सर्वथाप्य यज्ञादिकर्मसमुच्चिता ब्रह्मोपासनाविशेषेण त्रयवल्लभ्याद्य विद्याद्
ह्मसनासमुच्छेदक्रमेण ब्रह्मसाक्षात्कारपमोक्षपर्यन्तोपकारकत्वमतः इति तदर्थं कर्माण्यनुष्ठेयानि। नन्वेता
नि दृष्टादृष्टसामवायिकाराद्युपकारहेतुभूतोपादेशिकातिदेशिकक्रमपर्यन्तां गग्रामसहितपरस्परमिति
न्नकर्मस्वरूपतदधिकारिकोद्दपरिज्ञानं विना शक्यान्यनुष्ठातुं नन्वथ धर्ममीमांसां सापरिशीलनं विनात
त्वरिज्ञानं तस्मात्तत्साधूक्तं कर्मावबोधानन्तर्यं विशेष इति। कर्मावबोधेन वा बोधे नहि कर्मानुष्ठानसाहित्यं
भवति ब्रह्मोपासनापारस्पर्यं। तद्वेतान्निराकरोति। न। कुतः कर्मावबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञा
सोपपत्तेः। इदमत्राकूतं ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्ते इत्युक्तं तत्र ब्रूमः किं पुन
रस्याः कर्मापेक्षा किं कार्यरूपायामेयादीनां परमापूर्वे चिरभाविफलानुकूल्ये जननीयत्वे सामिध्यद्यपेक्षा
स्वरूपे वा यथा तेषामेव बर्हिरवघातपुरोडाशादिद्रव्याद्यपदिदेवताद्यपेक्षा न तावत्कार्ये तस्य विकल्पासहत्वात् त
प्तात् ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः स चोत्पाद्यो वा स्यादथवा संवर्ध्येन स्य पि उः वि
च ... बाधयत्वात् उदयानस्य श्रीरूपः संस्कार्यो वाप्यर्थानोक्तं प्रोक्षणस्य उकूर्चव्रीहयः आप्यो वा यथा गोदोहनस्य प
यः। न तावदुत्पाद्यः न खलु घटादिवत् साक्षात्कार एव तत् उत्स्वभावे भवः पटादिभ्यो भिन्नः इन्द्रियाद्याधेयो ब्रह्म
साक्षा... शोभावनाथेयः संभवति ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तस्याभाव्येन नि

त्वदयोरसंद्यत्वानुपपत्तेः न तो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रातिभप्रत्ययवत् संशयापाक्रान्ततया
प्रामाण्यायोगात्। नहि धूमस्य तत्सामग्रीकस्य वह्नित्वव्यभिचारोपलब्धेः न स्यत्व्यनुमानविधुत्वं वह्निर्भावप
तः शीतातुरस्याग्निशिशिरभङ्गमंथरतरकायकांडस्य स्मृ तत्काष्ठाजटिलानलसाक्षात्कारः प्रामाण्यं
तरेण संवादाने विसंवादस्य वदुष्ठमुपलब्भात् तस्मात् प्रामाणिकसाक्षात्कारलक्षणकार्याभावात् नोपासा
नापाञ्चस्याद्वैकेर्मापेक्षा। न च कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः संभ
वंतिस्यादेतत् मा भूद्ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः संस्कार्यस्तु अनिर्वचनीयानाद्यविद्या
॥२४॥ द्वयापिधानापनयनेन भविष्यति प्रतिसीरापिहितानर्त्तकीव प्रतिसीरापनयनद्वारा रंगव्यापृतेन तत्रत्य
कर्मण्यमुपयोगः एतावांस्तु विशेषः प्रतिसीरापनयनेन पार्षदानां नर्त्तकीविषयः साक्षात्कारो भवति इह तु अ ॥२४॥
विद्यापिधानापनयनमात्रमेव नापरमुत्पाद्यमस्ति ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेनानुत्पा
द्यत्वात्। अत्रोच्यते कापुनरियं ब्रह्मोपासना किं शाब्दज्ञानमात्रसंततिः आहो निर्विचिकित्सशाब्द ज्ञानसंत
तिः प दिशाब्दज्ञानमात्रसंततिः किमेभिरयमभ्यस्यमानापि अविद्यामुच्छेत्तुमर्हति। तत्वविनिश्चयस्तदभ्यासोवा
सवासनं विपर्यासमुन्मूलयेत् न संशयाभ्यासः सामान्यमात्रदर्शनाभ्यासो वा न हि स्थाणुर्वा पुरुषो वेति

वारोऽहंपरिणामवत् दृश्यमिति वा शान्तशोऽपि ज्ञानमभ्यस्यमानं पुरुषं वेति निश्चयापदपर्याप्तमृते विशेष
दर्शनात्। ननूक्तं श्रुतिमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन व्यवस्थापयेति तस्मा
न्निर्विचिकित्सज्ञानाद्यज्ञानसंततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः। न चासावनुत्पादि
तब्रह्मानुभवा तदुच्छेदाय पर्याप्ता साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते
ननु परोक्षावभासे न दिङ्मोहालातचक्रवल्लद्विभ्रम मरुमरीचिसलिलादिविभ्रमेषु अपरोक्षावभासिषु अ
परोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैः निवृत्तिदर्शनात्। नो खल्वाप्तवचनलिङ्गादिविनिश्चितदिगादि
तत्त्वानां हि दिङ्मोहादयो निवर्त्तन्ते। तस्मात् त्वंपदार्थस्य तत्पदार्थसाक्षात्कार एवखिलतमः एतावता हि त्वंप
दार्थस्य दुःखित्वशोकित्वादिसाक्षात्कारनिवृत्तिर्नान्यथा। न चैवं साक्षात्कारो मीमांसासहितस्यापि शब्दस्य
प्रमाणस्य फलमपि तु प्रत्यक्षस्यैव तत्फलत्वनियमात् अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसं
ङ्गात् तस्मान्निर्विचिकित्सो वाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपा
ध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तं। न चायमनुभवो ब्रह्मस्वभावो येन न जन्येत अपि
तदन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयो न चैतावता ब्रह्मणो नापराधीनप्रकाशता न हि शाब्दज्ञान

वाक्यम्

विषयं
प्रकाशरूपं ब्रह्मस्वरूपं प्रकाशं न भवति। सर्वोपाधिविहीनं हि स्वयंज्योतिरिति गीयते न उपहितमपि य
च्चाहस्म भगवान् भाष्यकारः नायमेकांतेनाविषय इति। न चांतःकरणवृत्तावपि अस्य साक्षात्कारे स
र्वोपाधिनिर्मोकः तस्यैव तदुपाधेर्विनश्यद्वस्तुस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात् अन्यथा तु चै
तन्यच्छायापत्तिं विनांतःकरणवृत्तेः स्वयमचेतनायाः प्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात्। न चानु
मितभावितवह्निसाक्षात्कारवत् प्रतिभात्वेनास्याप्रामाण्यं। तत्र वह्निस्वलक्षणस्य परोक्षत्वात्। इह
ब्रह्मस्वरूपस्योपाधिकलुषितस्य जीवस्यापि अपरोक्षत्वात्। न हि शुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यंते जीव
॥२५॥ एव नु तत्तदुपाधिरहितः शुद्धबुद्धत्वादिस्वभावो ब्रह्मेति गीयते न च तत्तदुपाधिविरहोऽपि ततोऽतिरि ॥२५॥
च्यते तस्माद्यथा गांधर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवश्रोत्रेंद्रियेण षड्जादिस्वरग्राममू
र्छनास्वरभेदमध्यक्षमनुभवति अनुभवत्येवं वेदांतार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभा
वमंतःकरणेनेति। अंतःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्येऽस्ति दुपासनायाः कर्माक्षेपेति। नांत
स्याः कर्मानुष्ठानसहभावाभावे न तत्सहकारित्वानुपपत्तेः न खलु तत्त्वमसीत्यादेर्वाक्यान्निर्विचिकि
त्सं शुद्धबुद्धोदासीनस्वभावमकर्तृत्वाद्यपेतं अपितब्राह्मणत्वादिजातिदेहाद्यतिरिक्तमेकमात्मा

नं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हतीति चेन्न तर्ह्यस्य कथं कर्त्ता वाऽधिकृतो वा । पद्यस्येत निश्चितेऽपि
तत्त्वेऽपि पर्यासनिबंधनो व्यवहारोऽनुवर्त्तमानो दृश्यते । न यथा गुडस्य माधुर्ये विनिश्चयेऽपि पित्तोपहत
तं द्विमाणां तिक्तावभासानुवृत्तिरास्वाद्य थूकृत्य त्यागात् तस्मात् अविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं
तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते । नच कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति कर्मणो वा
तदुच्छेदकस्य कुतउच्छेद इति वाच्यं सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः यथा पयः पयो
न्तरं जरयति स्वयं च जीर्यते तथा विषं विषान्तरं शमयति स्वयं च शाम्यति यथा वा कतकरजो रजोन्तराविले
पाथसि प्रक्षिप्तं रजोन्तराणि भिंदत् स्वयमपि भिद्यमानमनाविलं पाथः करोति एवं कर्माविद्यात्मकमपि अ
विद्यान्तराण्यपगमयत् स्वयमप्यपगच्छतीति । अत्रोच्यते । स त्वं सदेव सोम्येदमग्र आसीदित्युपक्रमात् त
त्त्वमसीत्यंतात् शास्त्रात् ब्रह्ममीमांसोपकरणात् असकृदभ्यस्तात् निर्विचिकित्सेऽनाद्यविद्योपादान
देहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्त्या वानुवर्त्तन्ते सांसारिकाः प्रत्ययाः
तद्व्यवहाराश्च तथापि तानप्ययं व्यवहारप्रत्ययान्मिथ्येति मन्यमानो विद्वान् न श्रद्धत्तेऽपि पित्तोपहतं
द्विपरवगुडं थूकृत्यन्नपि न तस्य तिक्ततां । तथा वाऽयं क्रियाकर्त्तृकरणेतिकर्त्तव्यताफलप्रपंचमता

वाव
१

त्वेक विनिश्चिन्वन्तं तद्विद्वस्य मानरहितं वद्धानभिमतः कर्मकाण्डे अत एव भगवान् अविद्वद्विषयत्वं शास्त्र
वर्णयांबभूव भाष्यकारः । तस्माद् ध्यायाश द्विजातीयानि मानि कर्तृके वै राजसूयेन विप्र वैश्यजातीया
भिमानिनो ऽधिकारः एवं द्विजाति कर्तृ क्रिया करणादि विभागाभिमानि कर्तृके कर्माणि न तद्रनाभिमानिनो
ऽधिकारः न ता नाधिकृते न समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते वैश्यस्तोमद्वयब्राह्मणराजन्याभ्यां
तेन दृष्टार्थेषु कर्मसु अज्ञः प्रवर्तमानः प्राप्नोतु फलं दृष्टत्वात् । अदृष्टार्थे पुरुषार्थैकसमाधिगम्यं
।२८।। फलं अनधिकारिणि न युज्यते इति नोपासनायाः कार्यैक कर्मापेक्षा । स्यादेतत् मनुष्याभिमानवदा ।।२८।।
धिकारिके कर्माणि विधीयन्ते यथा तदभिमानरहितस्य नाधिकारः एवं निषेधविधयोपि मनुष्या
धिकारा इति तदभिमानरहितैः स्तेयाद्यपि नाधिक्रियते पश्वादिवत् तथा चापं निषिद्ध मनुतिष्ठन्नप्र स
वेपापतिपनगादिवदिति भिन्न कर्मनापातः । मैवं । नस्वल्पयं सर्वथा मनुष्याभिमानराहितः । किंत्वविद्या
संस्कारानुवृत्त्या स्वप्रमात्रया तदभिमानो ऽनुवर्तते । अनुवर्तमानमभिमानं नाभिध्येति मन्यमानो न स्यादितर
तत्कर्म किमतो यद्येवं । एतदक्तो भवति । विधिषु आग्रहो ऽधिकारी नाग्रहो तनश्च मनुष्याद्यभिमानं न श्र

कृत्यमाधिकृतो नाम विदुषो न त्वधिकारे ऽन्यथा पश्वशूद्रादीनामप्यधिकारो दुर्वारः स्यात् क्रियाकर्त्रादि द्विस्वरूपविभागं ।।१२।।

वेधि शास्त्रेणाधिक्रियते। तथा च स्मृतिः। अश्रद्धया हुतं दत्तमित्यादिकानि वैध शास्त्रं नु नश्च
ने अपि तु निषिध्यमानः क्रियमाणो मुमुक्षो न रक्तस्येव प्रवर्तते तथा च सांसारिक रव शाद्वा वगत प्रमत
शास्त्रमनुमतिक्रम्य प्रवर्तमानः प्रत्यवैती तीर्थं नाकि न्न कर्म लाभ फ परमः तस्मात् न्नोपासनमा
ज्ञान एव नोपासौ न्यायस्वरूपोत्पत्तावपि निर्विघ्नि। किं ज्ञानशब्दस्य ज्ञानो त्पत्त न रकारणमर्थ
भाव विविदिषन्ति यज्ञेनेत्यादि) त्युक्तं तथा च श्रुतिः न कर्मणा न प्रजया धनेन त्यागेनै
। नान्ति मिहानीं अनुपयोग एव सर्वस्येह कर्मणां तथा च विविदिषन्ति यज्ञेनेत्यादाः श्रु
विरुद्धे रत्न आश ह्रुपकारक कत्वात् कर्मणां यज्ञादीनां तथाहि तमेतमात्मानं वेदानु
येन ब्राह्मणा विविदिषन्ति वेदितुमिच्छन्ति न तु विदन्ति वक्तनः प्रधानस्यापि वेदन
तो गुणत्वादिच्छायाश्च प्रत्ययार्थे तथा प्राधान्यात् प्रधानेन च कार्यसंप्रत्ययात्
वस्तुतः प्रधानमपि राजापुरुष विशेषणतया शब्दत उपसर्जन आनीयते अ
प्रधान्यात् एवं वेदानुवचनस्येव यज्ञस्यापीच्छा साधन तयाविधानं एवं तपसो
न शानमेव तपः। इति तमितमेव ध्यायिनो हि ब्राह्मणी विविदिषन्ति वति न तु सर्वथा

।वांड्यायणादिस्तपः शीलस्य धातुवैषम्यापत्तेः एतानि च नित्यान्यपात्तदुरितनि
तथा च स्मृतिः महा वा ज्ञानमपा ज्ञीयो वेदेदं मेने नांगं संक्रियतेऽरदं मेऽनेनां
नेनेति। हि प्रकृतं यज्ञादि परामृश्यते स्मृतिश्च। यस्यैतेऽष्टचत्वारिंशत्संस्कारा
नप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एवोत्पन्नविविदिषस्य ज्ञानोत्पत्ति
तेः विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इति। स्मृतिश्च ज्ञानमुत्पद्यते
कर्मणाऽस्यादिकाकुर्मेनैव च नित्यानां कर्मणां नित्येहितेनोपात्तदुरितनिबर्हणे ॥२७॥
ज्ञानोत्पत्तावंगभावोपपत्तेर्न संयोगपृथक्त्वेन साक्षादंगभावो युक्तः कल्मनागौर
दु नित्यकर्मानुष्ठानाद्धर्मोत्पादः ततः पाप्मा निवर्तते सत्यनित्याशुचिदुःखरूपे संसारे नित्य
ति लक्षणे नाविपर्यासेन चित्तसत्त्वं मलिनयति अतः पाप्मनिवृत्तौ प्रत्यक्षोपपत्ति प्रवृत्ति
सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्याशुचिदुःखरूपतामवगत्य तद्विमुक्त्यनुभवबुद्ध्या ततोऽस्या
गौ इति संन्यस्य प्रमुपजायते तत्र जिज्ञासोपाव र्तते ततो ज्ञानोपायं पर्यवेक्षते पर्यवमाणश्च
ज्ञानस्योपायमर्थं पश्यन् तज्जिज्ञासुस्ततः श्रवणादिक्रमेण तज्ज्ञानातीत संसारादुपकार

वत्वं तत्वज्ञानोत्पादं प्रति चित्तसत्वशुद्ध्या कर्मणामुक्तं। एतमेवार्थमनुवदति भगवद्गीता। आरुरुक्षोर्मुने
र्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते। एवं चाननुष्ठितकर्मापि प्राक्तनीय
कर्मवशात् यो विशुद्धसत्वः संसारसारतादर्शननिष्पन्नवैराग्यः कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पा
प दृष्टोपयोगिनां प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः। एतमेव च पुरुषं धीरे यमधिकृत्य प्रवर्तते श्रुतिः। य
दि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति। तदिदमुक्तं कर्मावबोधादनन्तरमप्यधीतवेदांतस्य ब्रह्मजिज्ञासोप
पत्तेरिति। अत एव च ब्रह्मचारिण आप्यानि सन्ति येन तदुपाकरणार्थं कर्मानुतिष्ठेत्। एतदनुरोधाच्च जायमा
नो ह वै ब्राह्मणस्त्रिभिरृणैरृणवा इति गृहस्थः संपद्यमान इति व्याख्येयं। अन्यथा यदि वेतरथा ब्रह्म
चर्यादेवेति श्रुतिर्विरुध्येत गृहस्थस्यापि तदृणापाकरणं सत्वशुद्ध्यर्थमेव जरामर्यं वा ह्येतस्मात्
तावाद्दृश्यकर्मजडानविदुषः प्रति न त्वात्मतत्वविदः प्रतिज्ञानात्। तस्माच्च कर्मावबोधनं न धर्मेऽत्राप्यथशब्दार्थो
यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवत्येव न चैतच्च कर्मावबोधः। तस्मान्न कर्माव
बोधानन्तर्यमत्राथशब्दार्थ इति सर्वमवदातं। स्यादेतत् मा भूदग्निहोत्रयवागूपाकवदार्थः क्रमः श्रौ

तस्मात्तस्यानन्तर्यमथशब्दार्थो यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवतीति॥२

क्रमं विवक्षति गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेदिति जाबालश्रुतिः। गार्हस्थ्येपि न दृष्टस्याद्यनु
ष्ठानं सूचयति स्म रतिवत्। अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेश
येत्। इति। इति वचनेऽनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्य
धः इति। अत आह यथा वेत्यादि यद्यपि वचनानामानन्तर्यनियमः कुतः। इदं यस्याप्येवयानि अथ जिज्ञासाः अथ
वक्तुः स इति अन्वयेशब्दाभ्यां क्रमस्याविवक्षितत्वात् न तत्रैव क्रमनियमो विवक्षितः श्रुत्यन्तरेण वानियम
स्य दर्शितत्वात् यदहरेव विरजेत् तदहरेव प्रव्रजेत् गृहाद्वा वनाद्वेति। एतावता हि वैराग्यमुपलक्ष
॥२८॥ यति अत एव यदहरेव विरजेत् तदहरेव प्रव्रजेत् इति श्रुतिः निंदावचनं वाविशुद्धसत्त्वपुरुषाभिप्रायं ॥२८॥
अविशुद्धसत्त्वो हि मो ~~क्षमिच्छन्नत एव~~ मिच्छन्नाश्रमस्थस्यात्तु पापेऽप्रवर्तमानो गृहस्थधर्ममपि नित्य
नैमित्तिकं त्यक्त्वा चरन् प्रतिक्षणमुपचीयमानपापभारोऽधो गच्छतीत्यर्थः स्यादेतत् मा भूत् श्रौत अर्थो वा
क्रमः। पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न भवतीत्यत आह शेषशास्त्रे प्रमाणाभावात् शे
षाणां समिदादीनां शेषिणां चाग्नेयादीनां एकफलवदुपकारोपनिबद्धानां एकफलावच्छिन्नानां।

एकप्रयोगवचनोपगृहीतानामेकाधिकारिकैककर्तृकाणामेकपौर्णमास्यमावास्याकालसंबद्धानां
युगपदनुष्ठानाशक्तेः सामर्थ्यात्क्रमप्राप्तौ तद्विशेषापेक्षायां पाठादयः तद्भेदनियमाय प्रभवंति यत्रानु
नशेषनियमे प्रमाणं त्रिविधाभावेनाप्येकाधिकारावच्छेदो यथा सौर्यार्यमणप्राजापत्यादीनां तत्र क्रमभेदापे
क्षाभावात् न पाठादिः क्रमविशेषनियमे प्रमाणं अवर्जनीयतया तस्य तत्रावगतत्वात् न न वेदधर्मब्रह्मलाभि
लासायोः शेषशेषिभावे पि क्रमनियमो दृष्टो यथा गोदोहनस्य पुरुषार्थस्य दार्शपौर्णमासिकैरंगैः सह प्र
यावद्दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति दर्शपूर्णमाससोमयोश्शेषशेषिणोरित्यत आह अधि
कृताधिकारे वा प्रमाणाभावादिति यो ज्ञानसुवर्गकामस्य हि दर्शपूर्णमासाधिकृतस्य पशुकामस्य सतो दर्श
पूर्णमासक्रत्वर्थोपप्रणयनाश्रिते गोदोहनेधिकारः स्यत्तु दोहनं द्रव्यमव्याप्रियमाणं साक्षात्पशून्
भावयितुमर्हति । न च व्यापारांतराविद्धं श्रूयते पतस्तदंगक्रममतिपतेत् प्रणयनाश्रितं तु प्रतीयते एव
मसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति समभिव्याहारात् योग्यत्वाच्चास्यापां प्रणयनं प्रति । तस्मा
त्क्रत्वर्थोपप्रणयनाश्रितत्वात् गोदोहनेनैवैतस्य तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सि
द्धं श्रुतिनिराकरणे त्वष्टिसोमक्रमवदपि क्रमोऽप्यस्तो वेदितव्यः शेषशेषित्वाधिकृताधिकाराभावे

पि क्रमो विवक्ष्येत यथेह रूपस्यावच्छेदो भवेत् यथाग्नेयादीनां षण्णामेकस्वर्गस्य फलावच्छिन्नानां यदि
वा जिज्ञास्यस्य ब्रह्मणोंशो धर्मः स्यात् यथा चतुर्लक्षणीस्याद्यं ब्रह्म केनचित् केनचिदंशेनैकै
केन लक्षणेन प्रतिपाद्यते तत्र चतुर्णां लक्षणानां। जिज्ञास्याभेदेन परस्परसंबंधे सति क्रमो विवक्षितः।
तन्नेहाप्येक। जिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत न त्वेतदुभयमप्यस्तीत्याह फलजि
ज्ञास्यभेदाच्च। फलभेदं विवृणुते। अभ्युदयफलं धर्मज्ञानमिति। जिज्ञासायाः वस्तुतो ज्ञानतंत्रत्वा
त् ज्ञानफलं जिज्ञासाफलमिति भावः। न केवलं स्वरूपतः फलभेदः तदुत्पादनप्रकारभेदादपि तद्भेद
॥२५॥ स्याह। न ज्ञानानुष्ठानापेक्षं ब्रह्मज्ञानं वनानुष्ठानांतरापेक्षं। शास्त्रज्ञानाभ्यासाज्ज्ञानानुष्ठानांतमपेक्षते नि ॥२५॥
त्यनैमित्तिककर्मानुष्ठानसहभावस्यापात त्वादिति भावः। जिज्ञास्यभेदमात्यंतिकमाह। भव्यश्च धर्म
इति भवितव्यं भवे कर्तरि कृत्यः। भाविता च भावकव्यापारनिर्वर्त्यतया तं भजतीति नतः प्राक् ज्ञानकालेना
स्तीत्यर्थः। भूतं सत्यं सदेकांततः न ह्यकदाचिदसदित्यर्थः। न केवलं स्वरूपतो जिज्ञास्ययोर्भेदो ज्ञापकप्र
माणप्रवृत्तिभेदादपि भेद इत्याह चोदनाप्रवृत्तिभेदाच्च चोदनेति वैदिकं शास्त्रमाह विशेषेण सामा
न्यस्य लक्षणात्। प्रवृत्तिभेदं विवृणुते। याहि चोदना धर्मस्येति आज्ञादीनां पुरुषाभिप्रायभेदानां

मसंगबात् अपौरुषेयवेदे चोदनोपदेशः ततैदर्थीननिरूपणत्वात् प्रत्यय —नस्य भावनायाः। प्रवृत्तंथन
रत्मस्यधातोर्विषयपदं क्रपत्तेः भावनायास्तद्वारेणचयागादेरपि। ज्ञिनोपायतामवगमयंती तत्रैवोपहार
मुखेनपुरुषं। नियुज्जानैवयागादिधर्ममवबोधयति नान्यथा ब्रह्मचोदनातुपुरुषमवबोधयत्येव केवलं
न तु प्रवर्त्तयंत्यवबोधयतिकुतः अवबोधस्य प्रवृत्तिरहितस्य चोदनाजन्यत्वात्। नन्वात्माज्ञातव्य इत्येन
द्विधिपरैर्वेदांतैरत्र देकवाक्यतया ऽवबोधे प्रवर्त्तयद्भिरेव पुरुषो ब्रह्मावबोध्यत इत्यस्मानत्वं धर्मचोद
नाभिर्ब्रह्मचोदनानामित्यत आह। पुनैरुषो ऽवबोधे नियुज्यते। अयमभिसंधिः। नतावद्ब्रह्मसाक्षात्कारे पुरु
षोनियोक्तव्यस्तस्य ब्रह्मस्वाभाव्येन। नित्यत्वादकार्यत्वात् नाप्युपासनायां तस्याअपिज्ञानप्रकर्षहेतु
भावस्यान्वयव्यतिरेकसिद्धतया ऽप्राप्तत्वेनाविधेयत्वात् नापि शाब्दे बोधे तस्याप्यर्थीतवेदस्य पुरुषस्य वि
दितपदतदर्थस्य समाधिगतशाब्दन्यायतत्वेतेस्याप्रत्यूहमुत्पत्तेः अत्रैव दृष्टांतमाह यथा ज्ञार्थेतिदृष्टौ
ति केवलं भवति तद्वदिति। अपिचात्मज्ञान विधिपरेषु वेदांतेषु नात्मतत्वविनिश्चयः शाब्दः स्यादहित
त्वात् तत्त्व न स्यात् किंतु तत्त्वज्ञानविधिपराः परंपराश्च ते तदेव तेषामर्थाः न च बोधस्य बोध्यानिष्ठत्वात् अ
पेक्षितत्वात् अन्यपरेऽस्योपि बोध्यतत्वविनिश्चयः समारोपेणापि तदुपपत्तेः। तस्मान्नबोध्यविधिपरा वेदां

ताद्रशजिज्ञासाहेतुप्रकरणमुपसंहरति। तस्मात्किमपि वक्तव्यमिति। यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति
तु भवत्येवेत्यर्थः तदाह उच्यते नित्यानित्यवस्तुविवेक इत्यादि नित्यः प्रत्यगात्मा अनित्या दे
हेन्द्रियविषयादयः। तद्विषयश्चेत्तु विवेको निश्चयः कृतमस्य ब्रह्मजिज्ञासया ज्ञातत्वात् ब्रह्मणः।
अथ विवेको ज्ञानमात्रं न निश्चयः तथा सत्ययं विपर्यासाद्वैद्व्यः संशयः स्यात् तथा च न वैराग्यं भावये
त्तु अभावयन्नु कथं ब्रह्मजिज्ञासाहेतुः तस्मादेवं व्याख्येयं नित्यानित्ययोर्वस्तुनीति नित्यानित्यवस्तुनि
तद्धर्मौ। नित्यानित्ययो धर्मिणोस्तद्धर्माणां च विवेकः नित्यानित्यवस्तुविवेकः एतदुक्तं भवति भाष्यकृद्धि
॥३०॥ दं तद्दृष्टं नित्यं इदं तद्दृष्टमनित्यमनृतमिति धर्मिविशेषयोर्विवेकः। धर्ममात्रयो नित्यानित्ययोस्तद्ध ॥३०॥
र्मयोश्च विवेकं निश्चिनोत्येवं नित्यत्वं सत्यत्वं तद्धस्यास्ति ता नित्यं सत्यं तथावाच्छागोचरः अनित्यत्व
मसत्यत्वं तद्यस्यानित्यादनित्यत्वं मेतं तथावत्ताच्छागोचरः तदेतेष्वनुभूयमानेषु सुखदस्मोत्सस्य गो
चरेषु विषयविषयिषु यद्दृष्टं नित्यं सुखं दैव्यवस्थास्यन्तत्तदाच्छागोचरो न विद्यति यत्स्वनृतमनित्यं दुःखैरवं
त्त विद्यतितापत्रयपरीतं न तूत्पद्यत इति सोयं नित्यवस्तुविवेकः प्राक्भवीयादैहिकादाकर्मणो विशुद्धसत्त्वस्य
भवत्यनुभावोपपत्तिभ्यां। न खलु सत्यं नाम न किंचिदस्तीति वाच्यं तदभावे तदवधिस्थानस्यानृतस्याप्य=

नुपपत्तेः शून्यवादिनामपि शून्यतायाः सत्त्वात् । अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यां एवं सुनि
२ पुणं निरूपयतः आवसत्यलोकाद्वा ब्रह्मवीजैर्जापिस्यचिप्रियस्येति विपरिवर्तमानं क्षणमुहूर्तयामाहोरात्रार्द्ध
मासमासर्त्वयनसंवत्सरयुगचतुर्युगमन्वन्तरप्रलयमहाप्रलयपरम्परासु वानैतरसर्गैः संसारसाग
रोर्मिभिस्तिरश्चीनं शमुह्यमानं तापत्रयपरीतमात्मानं जीवलोकं च अवलोकयन् अस्मिन् संसारमण्डले ऽनित्याशुचिदुः
खात्मकं प्रसंख्यानमुपावर्त्तते ततो ऽस्येह शास्त्रिस्यानित्यवस्तुविवेकलक्षणात् प्रसंख्यानादिहामुत्रा
र्थभोगे विरागो भवति अर्थ्यते प्रार्थ्यत इत्यर्थः फलमिति यावत् तस्मिन् विरागो ऽनात्मनि गात्मिको पेक्षा
बुद्धिः ततः शमदमादिसाधनसंपत् । रागादिकषायमदिरामत्तं हि मनस्तेषु विषयेषु द्यववाग्निद्रियाणि प्रव
र्तयन् विविधाश्च प्रवृत्तीः पुण्यपुण्यफलाः भावयन् पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसार
कुहरे निमज्जयतीति प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकजन्मनः रागादिसारख्यायते कषायमदिरामदं तु
मनः पुरुषेणावजीयते वशीक्रियते सो ऽयमस्य वैराग्यहेतुकोमनोविजयः शम इति च वशीकारसंज्ञकं इति
चारव्यायते । ये जितं मनस्तत्त्वविषयविनियोगयोग्यतां नीयमानं सेपमस्यपोग्यतादृमः । यथा दान्तो यं वृष
भः पुरुषात्महलन्यकलादिवहनयोग्यः कृतः इति गम्यते आदिग्रहणेन च विषयतितिक्षा तदुपरमता लब्धाः सं
गृह्यन्ते । अनन्तरं श्रुतिः तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्स

र्वमात्मनि पश्यतीति। तद्धेतस्य शमदमादिरूपस्य साधनस्य संपत् प्रकर्षः शमदमादि साधनसंपत्तत
तोऽस्य संसारबंधनात् मुमुक्षा भवति इत्याह मुमुक्षुत्वं च। तस्य च नित्यशुद्धबुद्धस्वभावब्रह्मज्ञानं
मोक्षस्य कारणमित्यपश्यत जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्द्ध्वं च तस्मात्तेषामेवानंतर्यं न धर्म
जिज्ञासाया इत्याह तेषु हीति। न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह ज्ञातुं चेति उपसंहरति त
स्मादिति। क्रमप्राप्तमतः शब्दं व्याचष्टे अत इति शब्दो हेत्वर्थः तमेवाह। शब्दस्य हेतुरूपमर्थमाह यस्माद्वेद एवे
ति अत्रैवं परिचोद्यते सत्यं यथोक्तसाधनसंपत्त्यनंतरं ब्रह्मजिज्ञासा भवति सैव त्वनुपपन्ना इहामु
।७१।। त्रार्थभोगविरागस्यानुपपत्तेः अनुकूलवेदनीयं फलमिष्टलक्षणत्वात् फलस्य न चानुरागहेतावस्य वै ।७१।।
राग्यं भवितुमर्हति। दुःखानुषंगदर्शनात् सुखेऽपि वैराग्यमिति चेत् हंत भोः सुखानु गतदुः
खेप्यनुरागो न कस्माद्भवति तस्मात् सुखउपादीयमाने दुःखपरिहारे प्रयतितव्यं अवर्जनीयतया दुः
खमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते तद्यथा मत्स्यार्थी सशल्कान् सकंटकान् मत्स्यानुपा
दत्ते स यावदादेयं तावदादाय निवर्त्तते यथा वा धान्यार्थी सपलालानि धान्यान्याहरति स यावदा
देयं तावदादाय निवर्त्तते तस्मात् दुःखभयान्नानुकूलवेदनीयमैहिकं वामुष्मिकं वा सुखं परित्यक्तुं

मार्गिर्त्तं न हि मृगाः संतीति शालयो नोप्यंते न हि भिक्षुकाः संतीति स्थाल्यो नाधिश्रीयंते। अपि च दृष्टं
सुखं चंदनवनितादिसंगजन्म क्षयितालक्षणेन दुःखेनाघ्रातत्वात् अतिस्वीस्थाज्येष्टस्य तापिन
त्वामुष्मिकस्वर्गादिनस्यापि विनाशित्वानुमीयते हि अपाम सोमममृता अभूमेति तथा चाक्षय्यं ह
वै चातुर्मास्ययाजिनः सुकृतं भवतीति न च कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति नरशि
रःकपालशौचानुमानवद् आगमबाधितविषयत्वात्। तस्माद्यथोक्तसाधनसंपत्त्यभावान्न ब्रह्मजिज्ञा
सेति प्राप्त एवं प्राप्ते आह भगवान् सूत्रकारः। अतः इति। तस्यार्थं व्याचष्टे भाष्यकारः यस्मादे इ
त्येतिअपमल्लिसंधिः सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः दुःखं त्वेन
[illegible]धाने ककारणसंपातजपमशक्यपरिहारे। अंततः साधनपारतंत्र्यक्षयिताल्लक्षणयोः दुः
खयोः समस्तकृतकसुखाविनाभावनियमात् न हि विषसंपृक्तमन्नं विषं परित्यज्य मधुमिश्रं शा
क्य[illegible]वृत्तेणापि लोकुं। क्षयितानुमानं नोपोद्बलितं च तद्यथेहेत्यादिवचनं क्षयिताप्रतिपादकं
अपाम सोमेत्यादिकवचनस्य मुख्यार्थसंभवे जघन्यवृत्तितामापादयति। यथाह पौराणिकाः।
आभूतसंप्लवं स्थानममृतत्वं भाष्यत इति अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्थापितः सत्यपोग्य
त्वात् तद्यथेह कर्मजितः इत्यादिः अत इति सर्वनाम्ना परामृश्य हेतुपंचम्या निर्दिश्यते। स्यादेतत्

वा॰वा॰कृ॰
१

यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषंगः तथा ब्रह्मणोपीत्यत आह तथा ब्रह्मविज्ञानाद
पीति। तेनायमर्थः अतः स्वर्गादीनां क्षयिताप्रतिपादकात् ब्रह्मज्ञानस्य परमपुरुषार्थताप्रति
पादकात् आगमात् यथोक्तसाधनसंपत् ततश्च ब्रह्मजिज्ञासेति। सिद्धं ब्रह्मजिज्ञासापदव्या
ख्यानमाह ब्रह्मण इति। षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञा
सेति चतुर्थीसमासः पराक्तो वेदितव्यः तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्यमिति कात्या
यनीयवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्। अप्रकृति
॥७२॥ विकारभूत रथ्येवमादौ तन्निषेधात् अश्वघासादयः षष्ठीसमासा भविष्यंतीत्यश्वघासादिषु ॥७२॥
षष्ठीसमासप्रतिविधानात्। षष्ठीसमासेऽपि च ब्रह्मणो वास्तव प्राधान्योपपत्तेरिति। स्यादेतत् ब्रह्म
णो जिज्ञासेत्युक्ते तज्ज्ञाने कार्यत्वात् शब्दस्य संशयः कस्य ब्रह्मणो जिज्ञासेति अस्ति ब्रह्मशब्दो विप्र
त्वे जातौ यथा ब्रह्महत्येत्यादि अस्ति च वेदे यथा ब्रह्मो   इति अस्ति च परमात्मनि यथा ब्रह्मवेद ब्र
ह्मैव भवति नमिमं संशयमपाकरोति ब्रह्म च वक्ष्यमाणलक्षणमिति। यतो ब्रह्मजिज्ञासां प्रतिज्ञा
यते तत् ज्ञापनाय परमात्मलक्षणं प्रणयति ततो वगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वादिजा

ति जिज्ञासेत्यर्थः । ननु षष्ठीसमासपरिग्रहेपि नेयं कर्मषष्ठी किंतु शेषलक्षणा संबंधमात्रं च शेष इति
ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबंधिनी जिज्ञासेत्युक्तं भवति तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधन
प्रयोजनवज्जिज्ञासाः सर्वा ब्रह्मजिज्ञासयावरुद्धा भवंति साक्षात्पारंपर्येण ब्रह्मसंबंधात्कर्मषष्ठ्यां
नु ब्रह्मसूक्ष्मार्थः कर्मस्तव स्वरूपमेवेति न त्प्रमाणादयो नावरुध्येरन् तथा चाप्रतिज्ञातार्थचिंताप्रमा
णादिषु भवेदिति ये मन्यंते तान्प्रत्याह ब्रह्मण इति कर्मणीति अत्र हेतुमाह जिज्ञास्येति इच्छायाः प्रतिपत्त्य
नुबंधित्वात् प्रथमं जिज्ञासा कर्मैवापेक्षते धो ज्ञानं ज्ञानस्य च ज्ञेयप्रत्येष्टनोरथव्युज्ञानं ज्ञेयं विना
निरूप्यते न च जिज्ञासानर्थिनेति प्रतिपत्त्यनुबंधात् प्रथमं जिज्ञासा कर्मैवापेक्षते न तु संबंधिमात्रं
तदंतरेण । अपि सति कर्मणि तन्निरूपणात् न हि वंशमसमादिष्टं वोपलभ्य कस्यायमिति संबंध्यन्वे
षणा भवति भवतु ज्ञानमित्युक्ते विषयान्वेषणा किं विषयमिति तस्मात् प्रथममपेक्षितत्वात् कर्मतये
व ब्रह्म संबध्यते न संबंधितामात्रेण तस्य जघन्यत्वात् तथा च कर्मणि षष्ठीत्यर्थः । ननु सत्यं न जि
ज्ञास्यमंतरेण जिज्ञासा निरूप्यते जिज्ञास्यांतरत्वस्याभाविष्यति ब्रह्मनु शेषे जितपासंभंस्यत इत्यत
आह । जिज्ञास्यांतरेति । निरूढाकि प्राप्य श्रोत्रियतिन ननु शेषषष्ठीपरिग्रहेपीति सामान्यसंबंधस्यवि

ज्ञानसंबंधाविरोधेन कर्मतायोऽविद्यातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः। निगूढाभिप्राय एव दूषयति
एवमपि प्रत्यक्षं ब्रह्म पद्यत इति। वाच्यस्य कर्मत्वस्य जिज्ञासायां प्राथम्यमपेक्षितं तस्य च प्रथमसंबंधार्ह
स्यैव ज्ञानान्वयपरित्यागेन पश्चात्कथंचिदपेक्षितस्य संबंधिमात्रस्य संबंधो जघन्यः प्रथमः प्रथमस्तु
जघन्य इति सुव्यवस्थितं न्यायतत्त्वं प्रत्यक्षपरोक्षाभिधानं जघन्यप्राथम्यस्फुटत्वास्फुटत्वाभि
प्रायं बोद्धकः स्वाभिप्रायमुद्घाटयति। न च शब्दोऽब्रह्मज्ञानाश्रिताशेषेति व्याख्यातमेतदर्थस्यात् समाधानाभ्या
भिसंधिमुद्घाटयति। न च प्रधानं परिग्रहरति वास्तवं प्राधान्यं ब्रह्मणः शेषसंनिदर्शनमतिरोहिता
॥३३॥ न्यैश्वर्यमनुगमश्चातिरोहित इति तः तदेवमभिमतं समासं व्यवस्थाप्य जिज्ञासापदार्थमाह ज्ञातुमि
च्छेति स्यादेतत् न ज्ञानमिच्छाविषयः सुखदुःखावाप्तिपरिहारौ तावदुपायो वा तद्द्वारेण गोचरः ॥३३॥
न चैवं ब्रह्मज्ञानं न खल्वेतदनुकूलमिति वा प्रतिकूलनिवृत्तिरिति वानुभूयते नापि तयोरुपायः
तस्मिन्सत्यपि सुखभेदस्यादर्शनात्। अनुवर्तमानस्य दुःखस्य चानिवृत्तेः न सूत्रकारमोत्रवव
नादिषि कर्मता ज्ञानस्येत्यत आह। अवगतिपर्यंतमिति न केवलं ज्ञानमिष्यते किं त्वं गवेति साक्षा
त्कारं कुर्वदवगतिपर्यंतस्य नूवाच्या पार्श्वयाः कर्म कस्मात् फलविषयत्वादिच्छायाः तदुपायं फ
लपर्यंतं गोचरयतीच्छेति शेषः ननु भवत्ववगतिपर्यंतं ज्ञानं किमेतावतापीदं भवति नश्च

न्येक्षणीयविज्ञपमवगतिपर्यन्तमपि ज्ञानमिष्यते इत्यत आह ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म
भावतु ब्रह्मविषयावगतिः एवमपि कथमिष्टेत्यत आह ब्रह्मावगतिर्हि पुरुषार्थः किमस्मकृद्यपः । नाके
नु निःश्रेयसं विगलितनिखिलदुःखानुषङ्गपरमानन्दघनब्रह्मावगतिर्हि ब्रह्मणः स्वभाव इति सैव
निःश्रेयसं पुरुषार्थ इति स्यादेतत् न ब्रह्मावगतिः पुरुषार्थः पुरुषव्यापारव्याप्यो हि पुरुषार्थः न चास्या
ब्रह्मभावस्य तामात्रत्वान्निविकास संस्कारव्याप्यः संभवतीति भासति अनित्यत्वेन तत्स्वाभाव्यानुपपत्तेः
न चोत्पत्त्याद्यभावे व्यापारव्याप्यता तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह निःशेषसंसारबीजा
विद्याद्यनर्थनिबर्हणात् सत्यं ब्रह्मावगतौ ब्रह्मभावेनोत्पत्त्यादयः संभवन्तीति भाष्यानिर्वचनीयानाद्य
वि[illegible]वशात् ब्रह्मस्वभावोऽपराधीनप्रकाशोऽपि प्रतिनपि न प्रतिभातीव पराधीनप्रकाश इव देहेन्द्रि
यादिभ्यो भिन्नोऽप्यभिन्न इव भासत इति संसारबीजाविद्याद्यनर्थनिबर्हणात् प्रागप्राप्त इव तास्मिं
न्सति प्राप्त इव भवतीति पुरुषेणार्थ्यमानत्वात् पुरुषार्थ इति युक्तं । अविद्यादीत्यादिग्रहणेन तत्संस्कारो
वरुध्यते । अविद्यादिनिवृत्तिरुपासनाकार्यं इतः करणवृत्तिजेन्द्रात् साक्षात्कारादिति द्रष्टव्यं । उ
पसंहरति तस्माद्ब्रह्म जिज्ञासितव्यं मुमुक्षुणेति मुमुक्षुणा न खलु तत्त्वज्ञानं विना सवासनविवि
धदुःखनिदान मविद्योच्छिद्यते न च तदुच्छेदमन्तरेण विगलितदुःखानुषङ्गानन्दघनब्रह्मतासाक्षा

२०

त्काराली विमर्शो जीवस्य तस्मान्नं द्वैध्यान ब्रह्मनाभिज्ञतानतु पाधोह्लातं मे खितव्यं तद्धुन केवलेभ्यो
वेदांतेभ्यो ऽपि तु ब्रह्ममीमांसोपकरणेभ्य इती छानि भेन ब्रह्ममीमांसापां प्रवर्त्यंते न तु वेदांतेषु त
दर्थविवक्षापां वा तत्र फलवदर्थावलक्षणत्वेनार्थावबोधपरतां स्वाध्यायाध्ययनविधेः सूत्रयता
अथातो ब्रह्मजिज्ञासेत्यनेनैव अवर्त्तितां त्वा तु। धर्मग्रहणस्य वेदार्थोपलक्षणत्वेना धर्मवत् अब्र
ह्मणोप्युपलक्षणत्वानूपपद्यपि तथ धर्ममीमांसा वद्वेदार्थमीमांसया ब्रह्ममीमांसाप्याक्षेप्तुं शक्या
तथापि प्राच्यामीमांसया न तद्धुल्यालब्धेय तेनापि ब्रह्ममीमांसा यावदध्ययनमात्रानंतर्यमिति। ब्रह्ममी
।।७४।। मांसा ~~[struck]~~ रंभायां नित्यानित्यविवेकाद्यानंतर्यप्रदर्शनाय वेदं सूत्रं आरंभणीयमित्य ।।७४।।
पौनरुक्त्यं। स्यादेतत् एतेन सूत्रेण ब्रह्मज्ञानं प्रकल्पयता मीमांस्या याः प्रतिपाद्य तदस्य कोनहेतव
पुक्तो विकल्प्या सत्र त्वोदिति बोदयति तत्स्तु नब्रह्मेति। वेदांतेभ्यो ऽपौरुषेयतया स्वतःसिद्धप्रमाण
भावेभ्यः प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं वेदांतवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतं ततो
न जिज्ञासितव्यं। निष्पादितक्रिये कर्मणि अविशेषाधायिनः साधनस्य साधनन्यायपातितया तदु अ
थाप्रसिद्धं वेदांतेभ्यस्तर्हि न तद्वेदांताः प्रतिपादयंतीति सर्वथाऽप्रसिद्धं नैव शक्यं जिज्ञासितुं अननु
भूतो हि प्रियेत्तवतीच्छा न तु सर्वथाननुभूतपूर्वे नचेष्यमाणमपि शक्यं ज्ञातुं प्रमाणाभावात्

शाद्वौ। हि तस्य प्रमाणं वक्तव्यः यथा वक्ष्यति शास्त्रयोनित्वादिति। स चेन्नावबोधयति कुतस्तस्य तत्र प्रामाण्यं न च
प्रमाणान्तरं ब्रह्मणि। क्रमते तस्मात्प्रसिद्धस्य ज्ञातुं शक्यस्यापि अजिज्ञासनात् अप्रसिद्धस्येच्छापात्रविषय
त्वात् अशक्यज्ञानत्वाच्च न ब्रह्मजिज्ञास्यमित्याक्षेपः। परिहरति। उच्यते। अस्ति तावत् ब्रह्म नित्यशुद्धबुद्ध=
मुक्तस्वभावं। अयमर्थः अधीतमीमांसा यः पूर्वमधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलनविदि
तपदतदर्थसंबंधस्य सदेव सोम्येदमग्र आसीदित्युपक्रमात् तत्त्वमसीत्यन्तात् संदर्भात् नित्यत्वाद्युपे
तब्रह्मस्वरूपावगमस्तावदापाततो विचारादिनाप्यस्ति। अत्र तब्रह्मेत्यादिनाऽवगम्येन तद्विषयवैभेगमं
लक्षयति। तदास्तित्वस्य सति विमर्शे विचारात् प्रागनिर्णयात् नित्येतिक्षिपित्वा लक्षणं दुःखमपाच्छिपति शुद्धे
ति हि ...उपाधिकमपि दुःखमपाकरोति बुद्धेति अपराधीनप्रकाशमानानन्दात्मतां दर्शयति आनन्दप्रका
शयोरभेदात् स्यादेतत् मुक्तोऽस्त्यास्य तेभ्युद्धत्वादयः प्रत्यन्तेनात तस्क्रप्राग्देहाद्यभेदेन तद्धर्मजन्मजरा
मरणादिदुःखयोगात् इत्यत उक्तं मुक्तेति सदैव मुक्तः सदैव केवल्यो ऽनाद्यविद्यावशात् भ्रान्त्या तथा ना
वभासमर्थः तदेव मनोपाधिकं ब्रह्मणो रूपं दर्शयित्वा ऽविद्योपाधिकं रूपमाह सर्वज्ञं सर्वशक्तिसम
न्वितं तद्दर्शनेन जगत्कारणत्वमस्य दर्शितं शक्तिज्ञानभावाभावानुविधानात् कारणत्वभावाभावयोः॥
कुतः पुनरेवं भूतब्रह्मस्वरूपावगतिरित्यत आह ब्रह्मशब्दस्य ही इति। न केवलं सदेव सोम्येत्यादीनां

वाक्यानां पौर्वापर्यपर्यालोचनया इत्थंभूतब्रह्मरूपावगतिः अपितु ब्रह्मपदमपि। निर्वचनसामर्थ्यादिम
मेवार्थं स्वतः स्वरूपेणैवेति चेत्। निर्वचनमात्रं हृदृतो दृतोरर्थानुगमात्। बृहि कर्मादि बृहतिरिति शब्दने वर्तते बृंहते
इमाति ज्ञापनमनवच्छिन्नं नरूपान्तरावगमितं नित्यशुद्धबुद्धत्वाद्यस्याक्ष्यन्तु ज्ञानातीत्यर्थः तदेवं तत्पदार्थस्य
शुद्धत्वादेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वस्यपां
सुलमादस्य तार्किकस्यापि ब्रह्मास्तित्वप्रसिद्धिः। कुतः। आत्मत्वात्। एतदेव स्फुटयति सर्वोऽपीति प्रतीति
मेवाप्रतीतिनिराकरणेन दृढयति नने ति। न नप्रत्येष्यहमस्मीति। किंतु प्रत्येमेवेति यो जना। नन्वहमस्मीति
॥३५॥ नाऽस्यति मा च नासीदात्मा नाभिस्य तआह यदीति। अहमस्मीति न प्रतीयते। अहंकारस्येदं हि जीवात्मानं ॥३५॥
चान्तप्रतीयादहमिति न प्रतीयादित्यर्थः। ननु प्रत्येतु सर्वो जनआत्मानमहंकारस्येदं ब्रह्मापि तु किमायया
तमित्यत आह चब्रह्मतदहंस्वभासामानाधिकरण्यात्। तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतः त्वंपदार्थ
स्यजीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य त्वंपदार्थस्य ब्रह्मभावावगमः
तत्वमसीति वाक्यादुपपद्यत इति भावः। आक्षेप्ता प्रथमकल्प्याश्रयं दोषमाह यदि तर्हि लोक इति अध्या
पकाध्येतृपरंपरा लोकः तत्वमसीति वाक्यात् यदि ब्रह्मात्मत्वेन प्रसिद्धमस्ति आत्मा ब्रह्मत्वेनेतिव

क्व्ये ब्रह्मात्मत्वेन त्वभेदविषयस्य यागमपि तत्त्वं। परिहरति। न कुतः। न हि विशेषं प्रति विप्रतिपत्तेः। तद्दने न विप्रति
पत्तिः साधकबाधकप्रमाणाभावे सति संशयपक्षीजमुक्तात तत्त्वस्य संशयात् जिज्ञासोपपद्यत इति भावः। विवा
दाधिकरणं धर्मीसिद्धं तंत्रसिद्धोभ्युपगमः अन्यथा अनाश्रयानिन्नाश्रयाद्वा विप्रतिपत्त्योनस्फः विरुद्धा हि प्रति
पत्त्योः विप्रतिपत्तयः नचानाश्रयाः प्रतिपत्तयो भवंति अनालंबनत्वापत्तेः। न च भिन्नाश्रया विरुद्धाः नत्व
नित्यावुद्धिर्नित्य आत्मेति प्रतिपत्तीर्विप्रतिपत्ती। तस्मात्तदर्थस्यप्रभुद्भवुद्भत्वाद्देवैर्दृष्टं तेभ्यः प्रतीतिस्तत्त्वं पदार्थस्य
च जीवात्मनोऽलोकतः सर्वतंत्रसिद्धांतः तद्दाभासत्वानाभासत्वेन त। द्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मा
त्स्वामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपन्नो पुरुषस्तद्विशेषेषु संशयः। तत्र त्वंपदार्थे तावद्विप्रतिप
त्तीर्द्व ... देहमात्रमित्यादिना लोकैव केवलं न कर्तृत्वं तेन। अत्र देहेंद्रियमनः प्राणिकविज्ञान चैतन्य
पक्षेषु न तत्पदार्थनित्यत्वाद्दयः त्वंपदार्थेन संबध्यंते योग्यताविरहात् शून्यपक्षेपि सर्वोपारव्यारहितोऽ
पदार्थः कथं तत्त्वमोर्गोचरः कर्तृत्वोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसंगतिरेव। अकर्तृ
त्वेपि भोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसंगतिरेव अभोक्तृत्वेऽपि नानात्वे नावच्छिन्नत्वा
त्स्वरूप नित्यत्वादि प्रसक्तेः अद्वैतहानाच्च तत्पदार्थासंगतिस्तदवस्थैव। त्वंपदार्थे विप्रतिपत्त्यावत्तत्पदा
र्थेऽपि विप्रतिपत्तिर्द्दृशिता वेदाप्रामाण्यवादिनो हि लोकायतिकादयः तत्पदार्थं प्रत्यक्षमिच्छंति मन्यंते वेद

प्रामाण्यवादिनो व्योपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्तइति। तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्प
दार्थे विप्रतिपत्तिं सूचयित्वा साक्षात् तत्पदार्थे विप्रतिपत्तिमाह अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्ति
रितिकेचित् तदिति जीवात्मनः परामृशति न केवलं शरीरादिभ्यो जीवात्मभ्योपि व्यतिरिक्तः स च सर्वस्यैव ज
गत ईष्टे ऐश्वर्यसिद्ध्यर्थं भाविकमस्य रूपद्वयमुक्तं सर्वज्ञः सर्वशक्तिरिति अस्यापि जीवात्मभ्योपि व्यतिरेकात्
तत्वंपदार्थेन सामानाधिकरण्यमिति। स्वमतमाह आत्मा स भोक्तुरित्यपरे भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य
स ईश्वरः तत्पदार्थ आत्मा अत ईश्वराद्भिन्नो जीवात्मा परमाकाशादिव घटाकाशादित्यर्थः विप्रतिपत्तीरुप
॥३६॥ संहरन् विप्रतिपत्तिबीजमाह एवं बहवइति। युक्तियुक्त्याभासवाक्यवाक्याभाससमाश्रयाः सन्तइति योजना। न ॥३६॥
नु सन्तु विप्रतिपत्तयः तन्निमित्तश्च संशयः तथापि किमर्थं ब्रह्ममीमांसा आरभ्यतइत्यत आह तत्राविचार्येति। तत्व
ज्ञानाद्धि निःश्रेयसाधिगमो न तत्वज्ञानादृते भवितुमर्हति। अपि च अतत्वज्ञानान्नास्ति कोप्यनर्थप्राप्तिरित्य
र्थः। सूत्रतात्पर्यमुपसंहरति। तस्मादिति। वेदान्तमीमांसा तावत्तर्क एव तद्विरोधिनश्च ये न्येऽपि तर्का अध्वरमी
मांसायां न्याया एव वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषु तेऽउपकरणं यस्याः सा तथोक्ता तस्मात्परमनिःश्रेयस
साधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसा आरब्धव्येति। तदेवं प्रथमसूत्रेण मीमांसारंभमुपपाद्य ब्रह्ममीमां

स्यारंभमुपपाद्य ब्रह्मतत्त्वमीमांसामारभते। जन्माद्यस्य यतः। एतस्य सूत्रस्य पातनिकामाह भाष्यका
रः ब्रह्मजिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्मेति अत्र च यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधा
नस्य प्रतिज्ञया तदंगान्यपि प्रमाणादीनि प्रतिज्ञातानि तथापि स्वरूपस्य प्राधान्यात् तदेवादौ प्रथमं
समर्थ्यते। तत्र यद्यावदनुभूयते तत्सर्वं परिमितं अविशुद्धमबुद्धं विध्वंसि न तेनोपलक्षेन तद्विरुद्ध
स्य नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुं नहि जातु कश्चित् कृतकत्वेन हेतु
नानित्यत्वं लक्षयति। ननु तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते तस्यानुपलब्धुरेवत्वात् प्रसिद्धं हि लक्षणं
भवति नात्यंताप्रसिद्धं एवं च न शास्त्रेऽप्यत्र क्रमते अत्यंताप्रसिद्धतया ब्रह्मणः पदार्थस्य वाक्यार्थत्वप्र
संगात् तस्मात् लक्षणाभावात् न ब्रह्मजिज्ञासितव्यमित्याक्षेपाभिप्रायः तमिममाक्षेपं भगवान्
सूत्रकारः परिहरति जन्माद्यस्य यत इति। माभूदनुभूयमानं जगत् तद्धर्मतया तादात्म्येन वा ब्रह्मणो ल
क्षणं तदुत्पत्त्या तु भाविष्यति देशांतरप्राप्तिरिव सवितुर्व्यापार इति तात्पर्यार्थः सूत्रावयवान् वि
भजते जन्मोत्पत्तिः आदिरस्येति। लाघवाय सूत्रे कृता जन्मादीति नपुंसकप्रयोगः कृतः तदुपपादना
य समासमाह जन्मादीति भंगमिति जन्म नश्चेत्यादिः करणनिर्देशः स्यं तः संदेहो निगद व्याख्या

स्यादेतत् अथानां कालग्रहं छ्लोकपालक्रियाय द्दृष्टसौख्यपस्य भावाभावेषु उपप्लवमानेषु सत्सु सर्वस्य
शक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह अस्य जगत इति अत्र ना
मरूपाभ्यां व्याकृतस्येति चेतनभावकर्तृकत्वं संभावनया प्रधानाद्यचेतनकर्तृत्वं निर्गुपास्य कर्तृत्वं र
सम्भोसेधनिय स्वयं सुनाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टं यथा घटादि विवादाध्यासि
तं नामरूपाभ्यां व्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते चेत नौहि बुद्धावालिखितनामरूपे। घटइ
तिनाम्ना रूपेण च कंबुग्रीवादिना बाह्यं घटं निष्पादयति अत एव घटस्य निर्वर्त्यस्यापि अंतःसंक
ल्पात्मनासिद्धस्य कर्मकारकभावो घटं करोतीति यथाहुः बुद्धिसिद्धं तु तदसदिति। तथा चाचेतनो बु ॥२७॥
॥२७॥ द्धावनालिखितं करोतीति न शक्यं संभावयितुमिति भावः स्यादेतत् अचेतनाग्रहालोकपालावाना
मरूपे बुद्धावालिख्य जगदुत्पादयंति कृतमुत्कस्य भावेन ब्रह्मणेत्यत आह अनेककर्तृभोक्तृ
संयुक्तस्येति। केचित्कर्तारो भवंति यथा सूददार्विगादयो न भोक्तारः केचित्तु भोक्तारो यथा श्राद्ध
वैश्वानरीयेष्ट्यादिषु पितापुत्रादयो न कर्तारः तस्मादुक्तम्य ग्रहणं देशकाल। निमित्तक्रियाफला
नीतिरतरेतरद्वंद्वः देशादीनि च तानि प्रतिनियतानि चेति विग्रहः तदाश्रयो जगत्तस्यात् केवित्व

प्रतिनियतदेशोत्पादाः यथा कृष्णमृगादयः केचित्प्रतिनियतकालोत्पादा यथा कोकिलालापादयः
केचित्प्रतिनियतनिमित्ता यथा नवांबुदध्वानादिनिमित्ता बलाकागर्भादयः केचित्प्रतिनियतक्रिया
यथा ब्राह्मणानां याजनादयो नेतरेषां एवं प्रतिनियतफला यथा केचित्सुखिनः केचिद्दुःखिनः
एवं परत्र सुखिनः एते च दुःखिनः सर्वमेतदाकस्मिकत्वापरनाम्नि यादृच्छिकत्वे स्वाभाविकत्वे वा
सर्वज्ञस्य सर्वशक्तेः कर्तृत्वे च न घटते परिमितज्ञानशक्तेर्निग्रहलोकपालादिति सर्वज्ञस्तु कर्तृत्वाच्छाक
त्वात्‌ तदिदमुक्तं मनस्यपि चित्तस्य रचनारूपस्येति। एकस्या अपि शरीररचनायाः नूनं मनसो नश्व
लिंचयतुं कर्तावित्प्रागेव जगद्रचनायाः। किमंग पुनः कर्तुमित्यर्थः सूत्रवाक्यं पूरयति तद्धीति वाक्यं
नेतः स्यादेतत्‌ कस्मात्पुनर्जन्मस्थितिलक्षणमात्रमिहादिग्रहणेन गृह्यते तेन तुष्टे हि परिणामाप
ह्रासा अपीष्यत आह अन्येषामपि भावविकाराणां वृद्ध्यादीनां त्रिष्वेवान्तर्भाव इति वृद्धिस्तावदव
यवोपचयस्तेनाल्पावयवादयं पटविनोद्धितं तु कार्यैरन्य एव महान्पटो जायत इति उत्पत्तिरेव वृद्धिः
परिणामोऽपि त्रिविधो धर्मलक्षणावस्थालक्षण उत्पत्तिरेव धर्मिणो हि हाटकादेर्धर्मलक्षणः।
कटकमुकुटादिरूपेण तदुत्पत्तिः। एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षणपरिणाम उत्पत्तिः। एवं

कूटकादेरपि प्रत्यक्षत्वन्नुमवस्थापरिणामो न वपुराणत्वाद्युत्पत्तिः। उपलक्षणस्यावयव   सो नाश एव
तस्माज्जन्मादिषु यथास्वमंतर्भावात् वृद्ध्यादयः पृथक्कृतो न्नाकस्यर्थः अथैते वृद्ध्यादयो न जन्मादि
ष्वंतर्भवंति तथाप्युत्पत्तिस्थितिभंगमेवोपादानं तथासति हि तत्प्रतिपादके यतो वा इमानि भू
तानीति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति। अन्यथा तु उत्पत्तेस्तिवृद्धि
तत्त्वादीनां ग्रहणेन तत्प्रतिपादकनिरुक्तवाक्यं बुद्धौ भवेत् तत्र च न मूलकारणप्रतिपादनपरं महा
॥२४॥ सगाद्यहं स्थितिकालेपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेरिति शंकानिराकर ॥२४॥
णार्थं वेदोक्तजन्मस्थितिभंगग्रहणमित्याह यास्कपरिपठितानां त्विति। नन्वेवमप्युत्पत्तिमात्रं सूच्यतां।
तन्नांतरीयकतया तु स्थितिभंगग्रहणम्पतद इत्यत आह योत्पत्तिर्ब्रह्मणः कारणादिति।त्रि।निरस्योपादानत्वं
सूच्यते उत्पत्तिमात्रं तु निमित्तकारणसाधारणमिति नोपादानत्वं सूचयेत्। तदिदमुक्तं तत्रैवेति। पूर्वोक्तानां
कार्यकारणविशेषणानां प्रयोजनमाह न यथोक्तेति। तदनेन प्रबंधेन प्रतिज्ञाविषयस्य ब्रह्मस्व
रूपस्य लक्षणद्वारेण संभावनोक्ता तत्र प्रमाणं वक्तव्यं यथा नैयायिकाः। संभावितः प्रतिज्ञायां प

पक्षः साध्ये तद्धेतुना। न तस्य हेतुभिः स्वरूपमुत्पन्नेवपोह्यतः। यथाच वंध्याजननीत्यादिः। इत्थं ना
म जन्मादि संभवनाद्धेतुः यदन्ये वैशेषिकादयः इतरवानुमानादीश्वरविनिश्चयमिच्छंतीति संभावो
नाद्धेतुतां इदमपि तु माहरतद्देवति। बोद्धमानि नन्विहापीति। एतावता नाधिकरणार्थसमन्वेव स्य
प्रमाणाधिकरणार्थेवदन्नसुत्वद्भावेन परिहरति नयेद्वांते तिवेदांतवाक्यकुसुमग्रथनार्थतामेवदर्श
यति वेदांते तिविचारस्याध्ययसानं स्ववासनाऽविद्याद्वयोच्छेदः ततो हि ब्रह्मावगतेर्निर्वृत्तिरात्माविर्भावः।
तत्किं ब्रह्मणि शास्त्राद्दृते न मानांतरमनुसरणीयं तथा च कुतो मननं कुतश्च तदनुभवसाक्षात्कार
इत्य[illegible]राह सत्यं तु वेदांतवाक्योक्तिरिति। अनुमानं वेदांताविरोधि तदुपजीवि चेत्सपि द्रष्टव्यं शास्त्राविरो
धित्वात्तदुपजीवित्वाच्च युक्त्या विवेचनं मननं युक्तिश्चार्थापत्तिरनुमानं वास्मादेतत् यथा धर्मेनि
पुरुषबुद्धिसाहाय्यं एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह न धर्मजिज्ञासामिवेति श्रुत्यादयः
तिस्मृतीतिहासपुराणस्मृतयः प्रमाणमनुभवोंतःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारस्तस्याविद्याने
दृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलं तच्च फलमिव फलमिति गमयितव्यं यद्यपि धर्मजि
ज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः तथापि साक्षान्नास्ति ब्रह्मजिज्ञासायां तु साक्षाद

मुमुक्षोर्वादीनासंभवो ऽनुभवार्थीत्व ब्रह्मजिज्ञासेत्याह अनुभवावसानत्वात् ब्रह्मानुभवो ब्रह्मसा
क्षात्कारः परः पुरुषार्थो निर्मृष्टनिखिलदुःखपरमानंदरूपत्वादिति। ननु भवतु ब्रह्मानुभवार्थी
जिज्ञासा तदनुभवस्य वक्तुं शक्यो ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह भूतवस्तुविषयत्वा
च्च ब्रह्मविद्या नस्यव्यतिरेक साक्षात्कारस्य विकल्पो विषयविषयिभावः। न त्वेवं धर्मज्ञानमनुभवाव
सानं तदनुभवस्य स्वयमपुरुषार्थत्वात् तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य अनुष्ठानस्य च विनाप्यनु
॥७९॥ भवं शब्दज्ञानमात्रादेव सिद्धेरित्याह कर्तव्ये हीत्यादिना न चायं साक्षात्कारविषयतायोग्यो प्रवर्तमा
नत्वाद्वर्तमानश्चानवस्थितत्वादित्याह पुरुषाधीनेति पुरुषाधीनत्वमेव लौकिकवैदिककार्ययोराह ॥७९॥
कर्तुमकर्तुमिति लौकिकं कार्यमनवस्थितमुदाहरति यथाश्वेनेति लौकिके नोदाहरणे नस्यादिति वै
दिकमुदाहरणं समुच्चिनोति तथाऽतिरात्र इति। कर्तुमकर्तुमित्यस्येदमुदाहरणमुक्तं कर्तुमन्यथा
वा कर्तुमित्यस्योदाहरणमाह उदितेति। स्यादेतत् पुरुषस्वातंत्र्यात्कर्तव्ये विधिप्रतिषेधौ समान
र्थक्यं अतत्त्वे धीदेनत्वा पुरुषप्रवृत्तिनिवृत्त्योरित्यत आह विधिप्रतिषेधाश्चात्रार्थवंतः स्युः।
गृह्णातीति विधिर्न गृह्णातीति प्रतिषेधः उदितानुदितहोमयोर्विधीएवनारास्थिस्पर्शननिषेधो

अस्य ह्यश्वतद्धारणविधिरित्येवंजातीयका विधिप्रतिषेधा अर्थवंतः। कुत इत्यत आह विकल्प
णापि वा ह्यश्वोदिते तो यस्मात् ग्रहणाग्रहणयोरुदितानुदितहोमयोश्च विरोधात् समुच्चयासंभवे तु विक
ल्पतया ब्रवीप्यनर्थकभावाभावे सत्यगत्या विकल्पः नारास्थिस्पर्शननिषेधनद्धारणयोश्च विरुद्ध
योरतुल्यबलतया न विकल्पः किंतु सामान्यशास्त्रस्य स्पर्शननिषेधस्य धारणविषयेण विशेषशास्त्रे
ण बाधः। एतदुक्तं भवति विधिप्रतिषेधैरेवं सतादृशो विषयोऽनागतोत्पाद्य नूत्पनीतो पेन्पुरुषस्य
विधिनिषेधाधीनप्रवृत्तिनिवृत्तिरपि स्यात् तं स्यं भवतीति भूते वस्तुनि तु नेयमस्ति विधेत्याह न तु वस्त्वेवं
नैवमिति। तदनेन प्रकारविकल्पो निरस्तः। प्रकारिविकल्पं निषेधति अस्ति नास्तीति स्यादेतत् भूतेऽपिव
स्तुनि विकल्पो दृष्टः यथा स्थाणुर्वा पुरुषो वेति तत्कथं न वस्तु विकल्प इत्यत आह विकल्पनास्त्विति
पुरुषबुद्धिरंतःकरणं तदपेक्षा विकल्पनाः संशयविपर्यायाः सवासनमनोमात्रयोनयो वा यथास्य संस
र्गास्मने [illegible] द्रिय मनोयोनयो वा यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः पुरुष एवेति विपर्यासः न तु पुरुष
तत्त्वं स्थाणुतत्त्वं वा अपेक्ष्यंते समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात् तस्माद्यथा वस्तु वो विकल्प
[illegible] वस्तु विकल्पयंति वा अन्यथयं निवेस्पर्थः तत्त्वज्ञानं तु न बुद्धितंत्रं किंतु वस्तुतंत्रं अतस्तत्तो वस्तु

विनिश्चयो पुष्कलो न तु दिक्संमूढस्यापरत्वाहनवस्कन्न तत्रैव संसतीति अत्र बोद्धयति यथात्मेति। एवमुक्तेन प्र
कारेण भूतवस्तुविषयाणां ज्ञानानां प्रमाण्यस्य वस्तुतंत्रतां साध्यज्ञानस्य वस्तुतंत्रमोतीहत
त्रैवं संसतीति अत्र बोद्धयति ननु भूतेति यत्किंचिद्भूतार्थवाक्यं न तत्प्रमाणांतरगोचरार्थं तथाऽनुवादकं दृष्टं
यथा नद्यास्तीरे फलानि संतीति तथा च वेदांताः तस्माद्भूतार्थतया प्रमाणांतरदृष्टमेवार्थमनुवदेयुः उक्तं च ब्र
ह्मणि अग्न्यादिहेतुकमनुमानं प्रमाणांतरं। एवं च मौलिकं तदेव परकृणीय न तु वेदांतवाक्यानि तदर्थी
सत्यत्वानीति कथं वेदांतवाक्यग्रथितार्थता सूत्राणामित्यर्थः परिहरति नेंद्रियाविषयत्वादिति। कस्मात्तु
॥४०॥ नेंद्रियाविषयत्वं प्रतीचः इत्यत आह स्वभावत इति अत एव श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मा ॥४०॥
त्पराङ्पश्यति नांतरात्मन्निति। प्रत्यगात्मनस्त्वविषयत्वमुपपादितं यथा च सामान्यतो दृष्टमप्यनुमा
नं ब्रह्मणि न प्रवर्तते तथोपरिष्टान्निपुणतरमुपपादयिष्यामः। उपपादितं चैतदस्माभिर्विस्तरेणान्याय
कणिकायां न च भूतार्थतामात्रेणानुवादता त्वपरिष्टादुपपादयिष्यामः तस्मात्सर्वमवदातं युतिर्यतो वे
ति जन्म दर्शयति। येन जातानि जीवंतीति जीवनं स्थिति तिः यत्प्रयंतीति तत्रैव लयं। अत्र च प्रथा नादि
संशये निर्णयवाक्यं आनंदाद्ध्येवेति। एतदुक्तं भवति यथा रज्ज्वज्ञानसहितरज्जूपादाना सर्पधारा

रज्ज्वां सत्यामेवास्ति रज्ज्वामेव प्रलीयते एवमविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव प्रलीय
त इति सिद्धं। सूत्रांतरमवतारयितुं पूर्वसूत्रसंगतिमाह जगत्कारणत्वप्रदर्शनेनेति। शास्त्रयोनित्वात्।
न केवलं जगद्योनित्वादस्य ब्रह्मणः सर्वज्ञता शास्त्रयोनित्वादपि बोद्धव्या। शास्त्रयोनित्वस्य सर्वज्ञता
साधनत्वं समर्थयते महत ऋग्वेदादेः शास्त्रस्येति। चातुर्वर्ण्यस्य चातुराश्रम्यस्य यथायथं। निषेकादि
श्मशानांतासु ब्राह्मणदूतोपक्रमप्रद्योजपरिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मतत्त्वे
चाशिष्याणां शासनाच्छास्त्रमृग्वेदादि अत एव महाविषयत्वान्महत् न केवलं महाविषयत्वेनास्य महत्त्वं
अपि तु अनेकांगोपांगोपकरणतयापीत्याह अनेकविद्यास्थानोपबृंहितस्य पुराणन्यायमीमांसादयो
दश विद्यास्थानानि तैस्तया तया द्वारा कृतस्य तदनेन समस्तशिष्टजनपरिग्रहेणाप्रामाण्याशंकाप्यपा
कृता। पुराणादिप्रणेतारो हि महर्षयः शिष्टास्तैस्तया तया द्वारा वेदानू व्याचक्षाणैस्तदर्थं चादरेणानुति
ष्ठद्भिः परिगृहीतो वेदराशिर्न चायमनवबोधको नाप्यन्यथाबोधको येन न प्रमाणं स्यादित्याह प्रदीपवत्सर्वा
र्थावद्योतिनः सर्वमर्थं ज्ञातं सर्वथाबोधयन्नानवबोधको नाप्यन्यथाबोधक इत्यर्थः अत एव सर्वज्ञकल्प
स्य सर्वज्ञसदृशस्य सर्वज्ञस्य सादृश्यं ज्ञानं सर्वविषयं शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यं तदेव

मन्वयमुक्त्वा व्यतिरेकमाह न हीदृशस्येति। सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रं अस्यापि सर्ववि
षयत्वात् उक्तमर्थं प्रमाणयति यद्यपि विस्तारार्थं शास्त्रं यस्मात्पुरुषविशेषात् संभवति स पुरुषविशेषस्ततो
ऽपि भूयस्तरविषयमधिकतरविज्ञान इति योजना। अद्यत्वेऽप्यस्मदादिभिर्यत्स्वीकीनार्थविषयं शास्त्रं विरच्यते तत्रास्मा
कं वक्तृणां वाद्यपात् ज्ञानमधिकविषयं। नहि ते ते असाधारणधर्माः अनुभूयमाना अपि शक्या वक्तुं न स्व
क्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुं विस्तारार्थमपि वाक्यं न वक्तृज्ञानेन तुल्य
॥४१॥ विषयं इति कथ्यापि नु विस्तरस्य ग्रहणं सोपनयं निगमनमात्रं किमु वक्तव्यमिति। वेदस्य यस्मान्महतो भूतात् योनेः ॥४१॥
संभवः तस्य महतो भूतस्य अलक्षणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना अत्र चानेक
शाखाभेदभिन्नस्य वेदस्येत्यादि संभवरत्नं तदुपनयः तस्येत्यादि सर्वशक्तित्वं चेत्यंतं निगमनं अप्रयत्ने
नैवेति ईषत्प्रयत्नेन। यथाअल्पवणाप्यवागूरितिदे वर्ष पोन्हि महापरिश्रमेणापि यत्रात्राक्रास्त्रद यमीष
त्प्रयत्ने नव्हीळ्ये व करोतीति निरतिशयस्यस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति अप्रयत्नेनास्य वेदक
र्तृत्वे श्रुतिरुक्ता अस्य महतो भूतस्येति येपि तावद्वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्य
त्वमभ्युपेतव्यं। आनुपूर्वीभेदवंतो हि वर्णाः पदं पदानि चानुपूर्वीभेदवंति वाक्यं तेषां व्यक्तिधर्मश्चानु

पूर्वीन वर्णधर्मः वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्ययोगात् व्यक्तिश्चानित्येति कथं तदु
पगृहीतानां नित्यानानामपि पदतानि त्यपदानि त्यतयाव वाक्यादीनामप्यनित्यता व्याख्याता तस्मान्न त्रा
नुकरणवत् पदानुकरणं। यथाहि पादशंगात्रवलनादिन नर्तकः करोति तादृशमेव शिक्ष्यमाणः नुकरो
ति नर्तकीन तु तदेव व्यनक्ति एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशी
मेवानुकरोति माणवको न तु तामेवोच्चारयति आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् तस्मान्नित्या
नित्यवर्णवादिनां न लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः केवलं वेदवाक्ये पुरुषस्वातंत्र्यास्वा
तंत्र्ये ... प्रतिपत्तिः यथाहुः यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतंत्रतेति। तत्रसृष्टिप्रलयमनिच्छंतो जैमिनीयाः।
वेदा... नंप्रति अस्यादृशगुरुशिष्यपरंपरामविच्छिन्नामनादिमाचक्षते वैयासिकं तु मतमनुवर्तमानाः श्रु
तिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेण अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नि
त्यस्य वेदानां योनेरपि न तेषु स्वातंत्र्यं पूर्वपूर्वसर्गानुसारेण तादृशानुपूर्वीविरचनात्। यथाहि यागादिब्रह्म
हत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गांतरे विपरीयंति नहि जातु कश्चित्सर्गे ब्रह्महत्यार्थहे
तुश्चाश्वमेधो भवति अग्निर्वा क्लेदयति आपो वा दहंतीति तद्वत् यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्यु
दयनिःश्रेयससंहेतुरन्यथा तद्वदेवाग्नवज्ञतयानर्थहेतुः एवं सर्गांतरेष्वपीति तदनुरोधात् सर्वज्ञो

मि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचयन्नस्वतंत्रः पुरुषास्वातंत्र्यमात्रं चापौरुषेयत्वं रोच
यंते जैमिनीया अपि तच्चास्माकमपि समानमस्वतंत्रान्नित्यवेदात् नचैकस्य प्रतिभानेऽनाश्वास इति युक्तं
नहि बहूनामप्यज्ञानां विज्ञानां वा आरोपदोषवतां प्रतिभाने युक्त आश्वासः। तत्त्वज्ञानवतस्त्व
अपास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त आश्वासः। सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञान
वैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणं नत्वद्यत्वे नचार्वाचीनानामपि तत्र संप्रत्ययः। द्
[illegible] ब्रह्मणः शास्त्रयोनित्वं शास्त्रस्य चापौरुषेयत्वं प्रामाण्यं चेति। वर्णकांतरमारभते अथवेति।
॥४१॥ पूर्वाधिकरणे न ब्रह्मस्वरूपलक्षणासंभवाशंकां व्युदस्य लक्षणसंभव उक्तः तस्यैव तु लक्षण
स्यानेनानुमानत्वाशंकामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तं अक्षरार्थस्त्वतिरोहितः ॥४२॥
शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेण तदनेन सूत्रेणोपपादनीयमिति तत्सूत्रं पूर्वपक्षमारचय
ति भाष्यकारः। कथं पुनरिति। किमाक्षेपे शुद्धबुद्धोदासीनस्य भावतयोपेक्षणीयं ब्रह्म कृतमा[illegible]तां वेदां
तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेः कृतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवा
क्यवत्तद्यर्थवादकत्वे नाप्रामाण्यप्रसंगात्। न खलु लौकिकानि वाक्यानि प्रमाणांतरविषयमर्थमवबोधयंति

स्यतःप्रमाणानां एवं वेदान्ता अपीस्यनपेक्षत्वलक्षणंअप्रामाण्यमेषां स्यादिह नेतनवैतैरप्रमाणैर्भवितुं युक्तं नचा
प्रयोजनैः स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात् तस्मात्तद्विहितकर्मापेक्षितकर्तृ
देवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वं यादृत्वसंनिधानात्तत्परत्वेन शेषपं तेततः नि हितोप्य-
मन्त्रादिक्रियापरत्वं वा वेदान्तानामेवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतयाप्रामाण्यं च प्रयोजन
वत्त्वं चाभिहितमिति तात्पर्यार्थः पारमर्षसूत्रोपन्यासः स्फुटपूर्वपक्षद्योतनाय। आनर्थक्यं चाप्रयोजनत्वं
सापेक्षतया प्रमानुत्पादकत्वं वा अनुवादकत्वादिति। अतः स्यादिवान्तग्रहणवाक्यं अस्य विभागभाष्यं
नर्ही स्याद्युपपन्ना वेत्यन्तं। स्यादेतत् अक्रियार्थत्वेपि ब्रह्मस्वरूपविधिपरा वेदान्तास्तद्विध्यन्तितत्थावविं
धि एकवाक्यत्वादिति शङ्कातसूत्रमनुगृहीष्यते न स्वव्यवप्रवृत्तप्रवर्तनमेव विधिः। उत्पत्तिविधेर
ज्ञात ज्ञापनार्थत्वात् वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाज्ञातवादित्यत आह न च परिनिष्ठितरति
अनागतोत्पाद्यभावविषय एव हि सर्वो विधिर्नियोगरूपेषूत्पत्त्यधिकारविनियोगरूपाणां परस्परं विनाभा
वात् सिद्धे च तेषामसंभवात् तद्वाक्यानां त्रैरूप्यं विविच्यते यथा अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिभ्यो
धिकार विनियोगप्रयोगाणां प्रतीतेः तान् अग्निहोत्रं जुहोतीत्युत्पत्तिमात्रपरं वाक्यं न तत्र विनियोगा

इयोनसतीति संतोष्यन्यतोऽवश्चत्वात् केवलमभिविवक्षिता ।। तस्माद्भावनाविषयो विधिर्नसिद्धे वस्तुनि भ
वितुमर्हतीति उपसंहरति तस्मादिति । अत्रारुचिकारणमुक्त्वा पक्षांतरमुपसंहरति अन्येतीति एवंच
सत्यकतौरूपे ब्रह्मण्यपि शास्त्रस्य तात्पर्यात् प्रमाणांतरेण यादृशमस्य रूपं व्यवस्थाप्यते न तच्छब्देन
विरुद्ध्यते तस्योपासनापरत्वात् समारोपेण चोपासनाद्युपपत्तेरिति प्रकृतमुपसंहरति तस्मान्ने
ति । सूत्रे पसिद्धांतयति एवं प्राप्ते उच्यते ।। तत्तु समन्वयात् । तदेतद्व्याचष्टे तुशब्द इति तदिस्फुटरपक्ष
प्रतिज्ञां विभजते तत्तु ब्रह्मेति पूर्वपक्षी कर्कशाशयः पृच्छति कथं कुतः प्रकारादित्यर्थः सिद्धांती स्वपक्ष
हेतुप्रकारं चेदमाह समन्वयात् । सम्यगन्वयः समन्वयस्तस्मात् एतदेव विभजते सर्वेषु वेदांतेष्विति वेदांताना
॥७३॥ मैकांतिकीं अस्मत्परतां आविश्चक्षाणः सर्वेषूनि वाक्यान्युदाहरति सदेवेति । यतो वा इमानि भूतानीति तु वाक्यं भू ॥७३॥
र्ममुदाहृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेदुस्मारितमिति न पठितं । येन हि वाक्यमुपक्रम्यते येन चोपसं
ह्रियते स एव वाक्यार्थ इति शास्त्रविदः यथोपांशुयाजवाक्ये । नु चोः पुरोडाशायो जामिता दोषसंकीर्तनपूर्वकंमोपां
शुयाजविधानेन तत्स्तुति समाधानोपसंहारेण पूर्वोपांशुयाजकर्मविधिपरता एकवाक्यताबुद्धा दार्ष्टांतिकेऽथ इमत्रा
पि सदेव सोम्येदमिति ब्रह्मोपक्रमात् तत्त्वमसीति जीवस्य ब्रह्मात्मनोपसंहारात् तत्परत्वे वाक्यस्य एवं वा

क्यांतराणामपि पौर्वापर्यपर्यालोचनया ब्रह्मपरत्वमवगंतव्यं न च तत्परत्वस्य दृष्टत्वस्य सति संभवे ऽन्य
परता । दृष्टा पुत्रा कथं कल्पयितुं अतिप्रसंगात् । न केवलं कर्तृपरता तेषां मो दृष्टा अनुपपन्ना चेत्स्यात् न च
तेषामिति । सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं समारचय्य दूषयति । न च परिनिष्ठितरूपत्वेपीति । अ
यमभिसंधिः पुंवाक्यदृष्टांते नाहि भूतार्थतमा वेदांतानां सापेक्षत्वमाशंक्यते न त्रैवमवान् पुंवाक्यो
चशाखिं पुंवाक्यानां सापेक्षतार्थत्वेनाहो पौरुषेयत्वेन यदि भूतार्थत्वे न ततः प्रत्यक्षादीनामपि परस्प
रापेक्षत्वेनाप्रामाण्यप्रसंगः तान्यपि हि भूतार्थान्येव आप्तपुरुषबुद्धिप्रभवतया पुंवाक्यं सापेक्षं र च तर्हि
तदपूर्वकाणां वेदांतानां भूतार्थानामपि नाप्रामाण्यं प्रत्यक्षादीनामिव निमित्तेंद्रियलिंगादिजन्मनां । यद्य
न्यनासिद्धं किंत्वपौरुषेयत्वे वेदांतानामनपेक्षतया प्रामाण्यं सिद्धं तु तदेव भूतार्थत्वेन सिद्ध्यति भूता
र्थस्य शब्दाद्यनपेक्षेणपुरुषेण मानांतरतः शक्यंज्ञानत्वात् बुद्धिपूर्वविरचने नोपपत्तेः वाक्यत्वादि लिं
गस्य वेदे पौरुषेयानुमानस्याप्रत्यूहमुत्पत्तेः तस्मात्पौरुषेयत्वेन सापेक्षत्वं दुर्वारं न तु भूतार्थत्वेन ।
कार्यत्वे हेतु कार्यस्यापूर्वस्य मानांतरगोचरतया अत्यंताननुभूतपूर्वस्य तत्त्वे न समारोपेण वा पुरुष
बुद्ध्या वनाशे डात् तदर्थानां वेदांतानां अशक्यरचनतया पौरुषेयत्वाभावात् अनपेक्षप्रमाणत्वं
[illegible] तीति प्रामाण्य वेदांतानां कार्यपरत्वमास्तिष्ठामहे । अत्र ब्रूमः । किं पुनरिदं कार्यमभिमतमायुष्मतः

दुःशक्यं पुरुषेण ज्ञातुं। अपूर्वमिति चेत् हंत कुतस्तस्य मस्याल्लिंगत्वद्यर्थत्वं तेनालौकिकेन संगतिसंवे
दनं चिरहात् लौकिकानुसारतः क्रियाया एव लौकिकत्वात् कार्यालिंगत्वदेव गमात्। स्वर्गकामो यजेते
ति साध्यस्वर्गविशिष्टो नियोज्योऽवगम्यते स च तदेव कार्यमवगच्छति यत्स्वर्गानुकूलं न च क्रियाक्षण
भंगुरा आमुष्मिकार्यस्वर्गायकल्पत इति पारिशेष्यात् वेद एवापूर्वे कार्ये लिंगं हीनासंबंधग्र
हणमिति चेत्। हंत शैत्यत्वं वह्न्यादिवाक्येष्वपि स्वर्गकामादिपदसंबंधात् अपूर्वकार्यत्वप्रसंगः तथाच
तेषामप्यशक्यत्वेनापौरुषेयत्वापत्तेः स्यष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधवाक्य
४४ त्वादिनालिंगेन वेदानामपि पौरुषेयत्वमनुमीतामिति अपूर्वार्थता न स्यात्। अस्त्येतस्यवाक्यत्वादीना ४४
मनुमानाभासत्वोपपादनं कृतमपूर्वार्थत्वेनानतद्दूषपादकेन। उपपादितत्वापौरुषेयत्वमस्माभि
र्यापकाणि कार्याणि हनुविस्तरभयान्नोक्तं तेन पौरुषेयत्वे सिद्धे भूतार्थानामपि वेदांतानां न सापेक्षत
याप्रामाण्यविघ्नतो न चानधिगतमंतता नास्ति येन प्रामाण्यं न स्यात् जीवस्य ब्रह्मतया अन्यतोऽन
गमात् तदिदमुक्तं नच परिनिष्ठितवस्तुस्वरूपेपि द्वितीयं पूर्वपक्षं लक्षणीं स्मारयित्वा दूषयति यत्तु हेयो
पादेयरहितत्वादिति विध्यर्थावगमात् खलु पारंपर्येण पुरुषार्थप्रतिलंभः इहतु तत्त्वमसीत्यवगति

पर्यंतात्तु वाक्यार्थज्ञानात्तु बाह्यानुष्ठानायासानपेक्षात्तुल्यत्वादेव पुरुषार्थप्रतिलंभो। नापं सपोर हुरि
यमिति ज्ञानादेवेति सोपमस्य विध्यर्थज्ञानात्ताकर्षः एतदुक्तं भवति द्विविधं ही। प्सितं पुरुषस्य किं
चिदप्राप्तं ग्रामादि किंचित्पुनः प्राप्तमपि विभ्रमवशादप्राप्तमित्यवगतं यथा स्वग्रीवावनद्धं ग्रैवेयक
मेवं जिहासितमपि द्विविधं किंचिदहीनं जिहासति यथा वल्गित चरणं फणिनं किंचित्तु नहीनमेवाजि
हासति यथा चरणालग्नेण नूपुरे फणिनमारोपितं एवं वा प्राप्तप्राप्तौ चात्यक्तत्यागे च बाह्योपाया
नुष्ठानसाध्यत्वात् तद्रूपमतत्त्वज्ञानात् अस्ति पराधीनानुष्ठानापेक्षा। न ज्ञातुं ज्ञा। नमात्रं च स्वप
नयनि नहि सहस्रमपि रज्जुप्रत्ययावरक्तसंतं फणिनमन्यथापि तु मीशते समारोपिते नु प्रेप्सितं जिहासि
न तेन तत्साक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेण शक्येते प्राप्तुमिव हातुमिव समारोपमात्रं जीविते
दिते समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहंतीति तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्म
ण्यप्राप्तौ देवरक्ततः शोकदुःखादिरहिते समारोपित। निबंधनस्तद्भावः तत्त्वमसीतिवाक्यार्थतत्त्वज्ञाना
ट्टगति सर्वता तूनि वर्तते तान्निवृत्तो प्राप्त प्यानंदरूपं अप्राप्तमिव प्राप्तं भवति त्यक्तमपि शोक
दुःखादि अत्यक्तमिव त्यक्तं भवति तदिदमुक्तं ब्रह्मात्मावगमादेव जीवस्य सर्वस्य सर्वकृतास्य संवासन

वावी॰
८

स्यविपर्यासस्यसहि क्रियमाणत्वं नु न तः कुशः तस्यप्रकर्षेण हानात् पुरुषार्थस्य दुःखनिवृत्तिसुखावाप्ति
रूपस्यासिद्धेरिति यत्वात्मेत्येवोपासीत आत्मानमेव लोकमुपासीतेत्युपासनावाक्यगतादेवता
दिप्रतिपादने नोपासनापरत्वं वेदान्तानामुक्तं न दूषयति। देवतादिप्रतिपादनस्यत्वात्मेत्येतावन्मात्र
स्यस्यवाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः। यदि न विरोधः संतु तर्हि वेदान्ता देवताप्रतिपादनद्वा
रोपासनाविधिपराः वेत्यत आह न तु तथा ब्रह्मण इति। उपास्योपासकोपासनादिभेदशिद्ध्यधीनाउ
पासना न निरस्तसमस्तभेदप्रपंचे वेदान्तवेद्ये ब्रह्मण्यपि संभवतीति नोपासनाविधिशेषत्वं वेदान्तानां त
॥४५॥ द्विरोधित्वादित्यर्थः स्यादेतत् यदि विधिविरहे पि वेदान्तानां प्रामाण्यं हंत तर्हि सोऽरोदीदित्यादीनामप्यस्तु
स्वतंत्राणामपेक्षणीयार्थानां प्रामाण्यं नहि हानोपादानबुद्धिः एवं प्रमाणस्य फलं उपेक्षाबुद्धेरपित ॥४५॥
त्फलत्वेन प्रामाणिकैरभ्युपेतत्वादिति कृतं विधिविरहतं नदेयमित्यादि निषेधविधिपरत्वेनेतेषामित्युत
आह यद्यपीतिस्वाध्यायविध्यधीनग्रहणतया हिसर्वो वेदराशिः पुरुषार्थतंत्रः इत्यवगतं मंत्रेके नापि
वर्णेन नापुरुषार्थेन भवितुं युक्तं किंपुनरियता सोऽरोदीदित्यादिना पदप्रबंधेन। न च वेदान्तेभ्य एवं तद
र्थावगममात्रादेव कश्चित् पुरुषार्थो लक्ष्यते नेषपदसंदर्भैः स्वाकाङ्क्षए वास्त्वे पुरुषार्थमुद्दिश्य प्रमाणं।
वर्हि विरजतं नदेयमित्यस्यमपि निषेधविधिः स्यनिषेधास्यनिंदामपेक्षते नत्वन्यथा ततश्चेतन. शक्यो

निवर्तयितुं तद्यदि दूरतोपि तन्निंदामवाप्स्यत् ततो निषेधविधिरेव रज्यत निषेधे च निंदायां तत्सामर्थ्यादुपम
कल्पयिष्यत् तदेव मुख्ययोः सोरोदीदितिवद्बर्हिषि रजतं न देयमिति नञ्पदस्य दर्शयोः श्रूयमाणनिंदा
द्वारेण नञ्या स्वद्यार्थरूपवत् परस्परसमन्वयः न त्वेवं वेदांतेषु पुरुषार्थापेक्षा वममाभ्रे देवानपेक्षात्परम
पुरुषार्थलाभादित्यर्थः । ननु विध्यसंस्पर्शिनो वेदस्यान्यत्र नप्रामाण्यं दृष्टमिति कथं वेदांतानां तद्रूपत्य
तदूरूपपादितं यद्यपि चेतमीदा बोधजनकत्वं कार्यार्थं प्रति समधिगम्यं तथापि तद्बोधोपजननेनैमा
नांतरेनापेक्षते नापीमामेवार्थापत्तिं परस्पराश्रयप्रसंगादित्यर्थ तदूरूपकं । दृष्टबोधजनकत्वं
सकार्यपरत्वविधीनां वेदांतानां ब्रह्मण्यस्तीति दृष्टांतानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति अन्यथा
नैलियां तत्रणां रूपप्रकाशानं दृष्टमिति नञ्स्फुरदपि न रूपं प्रकाशयेदिति प्रकृतमुपसंहरति तस्मादिति ।
आदि. नदेशीयानां मतमुत्थापयति अत्रापरे प्रत्यवतिष्ठंत इति । तथाहि । अज्ञातसंगतित्वेन शास्त्रत्वेन
शास्त्रत्वेनार्थवत्तया । मननादिप्रतीत्या च कार्यार्थात् । ब्रह्मनिश्चयः । न खलु वेदांताः सिद्धब्रह्मवस्तुपरा
भवितुमर्हंति तत्राविदितसंगतित्वात् यत्र हि शब्दाः लोके न प्रयुज्यंते तत्र तेषां संगतिग्रहः न चाहेयमनुपा
देयमनूपमात्रं कश्चिदिच्छति प्रेक्षावान् तस्याजुत्सितत्वात् अजुगुप्सितात् व बोधेन च प्रेक्षावता विद्या
लात् तस्मात्त्वपितिपि । सिंतं प्रतिपिपादयिषन्नयं श्लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत् कार्यवा

वगतं तद्धेतुरिति तदेव बोधयेत् एवं च वृद्धव्यवहारे प्रयोगात् पदानां कार्यपरतामवगच्छति तत्र किंचित्सा
क्षात्कार्यार्थाभिधायकं किंचित् कार्यार्थस्यार्थाभिधायकं न तु भूतार्थपरता पदानां। अपि च। नरांतर
स्य क्व त्वन्नस्यार्थप्रत्ययमनुमाय तस्य च शब्दभावानुविधानमवगम्य शब्दस्य तद्विषयवाचकत्वं निश्चे
तव्यं न च भूतार्थरूपमात्रप्रत्ययपरनरवर्त्तिनि किंचिल्लिंगमस्ति कार्यप्रत्यये तु नरांतरवर्त्तिनि प्रवृत्ति
निवृत्ती स्तो हेतू इत्यलातसंगतित्वात् न ब्रह्मपरा वेदांताः। अपि च। वेदांतानां वेदत्वात् शास्त्रत्वप्र
सिद्धिः शास्त्रं प्रवृत्तिनिवृत्ती पुरुषाणां च संदर्शिणां शास्त्रत्वं। यथाहुः प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा
॥४६॥ पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयत इति। तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वं। अपि ॥४६॥
न च ब्रह्मरूपप्रतिपादनपराणामेषां अर्थवत्त्वं पश्यामः। न ह्यत्र रज्जुरियं न भुजंगम इति यथा कथं विलक्ष
णभावाक्यार्थतत्त्वनिश्चये यथा भयकंपादिनिवृत्तिः एवं तत्त्वमसीति वाक्यार्थावगमान्निवृत्तिर्विश्व २
निसंसारिकाणां धर्माणां। श्रुतवाक्यार्थस्यापि पुंसस्तेषां तादवस्थ्यात्। अपि च यदि श्रुतब्रह्मणो भवति सां
सारिकधर्मनिवृत्तिः कस्मात्पुनः श्रवणस्योपरि मननादयः श्रूयंते तस्मात्तेषां वैयर्थ्यप्रसंगादपि न ब्रह्म
रूपपरा वेदांताः। किं त्वात्मप्रतिपत्तिविषयकार्यपराः। तच्च कार्यं स्वात्मनि नियोज्यं नियुंजानं नियोग इति

यमानां तदपूर्वतया अपूर्वमिति वा रव्यायते न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं तद्देव
कार्यं स्वविषयस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति यथा च कार्यं विषयाधीननिरूपणमिति
ज्ञानेन विषयेण निरूप्यते एवं ज्ञानमपि स्वविषयमात्मानं अंतरेण अशक्यनिरूपमिति तन्निरूपणाय तादृ
शमात्मानमाक्षिपति तद्देव कार्यं यथा क्रतुः प्रतु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तद्विधेयमिति तच्चिंत्यं
त्रेप्यवहारा इति विधेयतावनियोगविषयस्यात्मज्ञानस्य भावार्थतयानुष्ठेयता तद्विषयस्य त्वात्मनः स्वरूपस्त
ज्ञानविनिश्चितिः। आरोपित तद्भावस्य त्वन्यस्य तन्निरूपकत्वे तेन तन्निरूपितं न स्यात् तस्मात्तादृगात्म
प्रति विधिपरेभ्यो वेदांतेभ्यस्तादृगात्मविनिश्चयः तदेवं सर्वमाहुः यद्यपीति विधिपरेभ्योपि वस्तोस्तत्त्वनि
श्चयः परस्यात्र निदर्शनमुक्तं यथा यूपेति यूपे पशुं बध्नातीति बंधनाविनिर्मुक्ते यूपे तस्यालौकिकत्वात् कोसौ
यूप इत्यपेक्षिते खादिरो यूपो भवति यूपं तक्षति यूपमष्टाश्री करोतीत्यादिभिर्वाक्यैस्तक्षणादिविधिपरै
रपि संस्काराविष्टविशिष्टसंस्थानं दारु यूप इति गम्यते एवमाहवनीयादयोप्यवगंतव्याः प्रवृत्तिनिवृत्तिपर
स्य शास्त्रत्वं न स्वयूपस्य कार्य एव च संबंधो न स्वरूपपरतिष्ठे तु द्वयं भाष्ये वाक्ये नोपपादितं प्रवृत्तिनिवृत्तिप्र
योजनत्वादित्यादिना नात्मामान्या देहांतानामपि तच्चैयार्थवत्त्वस्यादिष्टं तेन न च स्वतंत्रं कार्यं नियोज्यमाधिका
रिणमनुष्ठानारमनरेणेति नियोज्यभेदमाहुः सांतिव विधिपरत्व इति ब्रह्मवेद ब्रह्मैव भवतीति सिद्धवदर्थवादा

वा॰भा॰
१

वगतस्यापि ब्रह्मणः श्रवणस्य नियोज्यविशेषाकांक्षायां ब्रह्मबुभुत्सुर्नियोज्यविशेषस्य रात्रिसत्रन्यायेन
प्रतिलंभादपि उचितं यत्तु न्यायेन तु स्वर्गकामस्य नियोज्यस्य कल्पनायामर्थवादस्यासमवेतार्थतापत्त्य
ता तपरोक्षत्वात् । तस्मादिति ब्रह्मभावश्चामृतत्वमिति अमृतत्वकामस्य फलं । अमृतत्वं च अमृतत्वादेवन
कृतकत्वेन तत्कार्यमनित्यत्वमनुमानं आगमविरोधादिति भावः । उक्तेन धर्मब्रह्मज्ञानयोर्वैलक्षण्येन विधेय
विषयत्वं चोदयति नान्विति । परिहरति । नार्हत्येवमिति अत्र चात्मदर्शनं न विधेयं यद्धि हेयोपादेयरूपं तद्विधिविषय
नत्वात् श्रवणं नावास्यानुप्रत्यक्षं वाप्रत्यक्षं नापि लौकिकमहं प्रत्ययो वा भावनाप्रकर्षपर्यंतजं वा तत्र
॥४७॥ श्रावणं न विधेयं स्वाध्यायविधिनैवास्य प्राप्तत्वात् कर्मश्रवणवत् । नापि लौकिकं प्रत्यक्षं तस्यैव नैस ॥४७॥
र्गिकत्वात् न चौपनिषदात्मविषयं भावनाख्यं परोक्षं विधेयं तस्योपासनाविधानादेव वाक्तिन
यदनुनिष्पादित्वात् तस्मादौपनिषदात्मोपासनामृतत्वकामं नियोज्यं प्रति विधीयते इत्यप
व्यापकं विधिसरूपा न विधय इति तान्द्रि सुक्तं तदुपासनाश्चेति । अर्थवत्त्वमाभानादिप्रतीत्या चेत्य
स्यशेषत्वे प्रपंचो निगदव्याख्यातः । तदेतदेकदेशिमतं दूषयति अत्राविधीयते न एकदेशिमतं कुतः क
र्मब्रह्मविद्याफलयोर्वैलक्षण्यात् । पुण्यापुण्यकर्मणोः फले सुखदुःखे तत्र मनुष्यलोकमारभ्या ब्र

अल्लोऽयै कालू सुखतारतम्यम् आधिकाधिकोत्कर्षः एवं मनुष्यलोकमारभ्य दुःखतारतम्यमाऽवीचि
लिब्लो कयतू तच्च सर्वं कार्यं विनाशि च। आत्यंतिकमशरीरत्वमनतिशयं स्वभावसिद्धं तया नित्यमकार्यं
मालम लानस्य फलं तद्धि फलमिव फलम् आविद्यापनयमात्रेणाविर्भावात्। एतदुक्तं भवति त्वयामम्मा पा
सनाविधिःपरत्वं वेदांतानामभ्युपगच्छता नित्यशुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदांतग
म्या आस्थीयते सा सोपासनाविषयस्य विधेर्न फलं नित्यत्वाद् अकार्यत्वात् नाप्यानाद्यविद्यापिधानापनयनं।
तस्यैव विरोधि विद्योदयमात्रे एव भावात् नापि विद्योदयः तस्यापि श्रवणमननपूर्वकोपासनाजनितसं
स्कारसाचिव्यादेव चेतसो भावात्। उपासनासंस्कारोत्तरमेव तु उपासनाऽपूर्वमपि चेतःसहकारीति चेन्नु दृष्टसं
एव तु नैयोगिके फलेऽदृष्टिकमपि यथा विश्वकारी यदि नियोगानामनियतनियतफलानां। नानार्थवेदशास्त्रो
पासनावासनाया इवापूर्वानपेक्षायाः मंडूकादिसाक्षात्कारे वेदांतार्थोपासनावासनाया जीवब्रह्मसाक्षात्को
रेऽननपेक्षा एव सामर्थ्यात् तथा चामृतीभावं प्रत्यहेतुत्वात् उपासनाऽपूर्वस्य नामृतत्वकामं प्रत्यकार्यम
व बोद्धुमर्हतीति अन्यादिवदस्य सन्यत्करणीति विप्रतिपन्नं तत्कामः क्रियामेव कार्यमवगमिष्यतीनापूर्व
मिति सांप्रतं। तस्यमानां तराद् एव तत्साध्यत्वप्रतीतेर्वि धेवैयर्थ्यात् न चावद्यातादि विधितुल्यता। तत्रापि
नियमापूर्वस्यान्यतोऽनवगमात्। न च ब्रह्मभूयाद् अन्यदमृतत्वमार्थवादिकं किंचिदस्ति येन तत्काम

उपासनायामधिक्रियते। विश्वजिन्न्यायेन तु स्वर्गकामनायां तस्य सातिशायित्वं क्वापि त्वं चेतिन नित्यफलत्व
मुपासनायास्तस्मात् ब्रह्मरूपस्याविद्याविधानामनयनमात्रेणाविर्भावात्। अविद्यापनयस्य च वेदांता
र्थविज्ञानात् द्वगतिपर्यंतादेव संभवात्। उपासनायाः संस्कारो हि तु भावस्य संस्कारस्य च साक्षात्कारो
पजनने मनः साचिव्यस्य च मानांतरसिद्धत्वाच्चात्मेत्येवोपासीतेति न विधिः। अपि तु विधिसरूपोयं यथोपां
शुयाजवाक्ये विष्णुरुपांशु यष्टव्य इत्यादयो विधिसरूपा न विधय इति तात्पर्यार्थः। श्रुतिस्मृतिन्यायप्रसि
द्धमित्युक्तं तत्र श्रुतिं दर्शयति तन्यायेव श्रुतिरिति न्यायमाह अत एव चेति। यत्किंचित्स्वाभाविकं तन्नित्यं य ॥४८॥
५४८१ च्चैतन्यं स्वाभाविकं चेदं तस्मान्नित्यं। परे हि द्वयीं नित्यतामाहुः कूटस्थनित्यतां परिणामिनित्यतां च तत्र
नित्यमित्युक्ते माभूदस्य परिणामिनित्यतेत्याह तत्र किं स्विदिति परिणामिनित्यता हि न परमार्थिकी तथा
हि तत्सर्वात्मना वा परिणमेदेकदेशेन वा सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः। एकदेशपरिणामे
वा स एकदेशस्ततो भिन्नोऽभिन्नो वा भिन्नश्चेत्कथं तस्य परिणामः न ह्यन्यस्मिन्परिणममानेऽन्यः
परिणमते अतिप्रसंगात् अभेदे वा किं न सर्वात्मना परिणामः। भिन्नाभिन्नं तादृगिति चेत् न त्याह तदे
व कारणात्मनाऽभिन्नं भिन्नं च कार्यात्मना कटकादयो हि भिन्ना हाटकात्मनाभिन्नाश्च कटकाद्यात्म
ना नैव भेदाभेदयोर्विरोधान्नैकत्र समवाय इति युक्तं विरुद्धमिति तेनः कृतं प्रसंगः यत्प्रमाणविषयत्वेन

वर्त्तेत न च तथा प्रमाणेनावगम्यते न स्यात्तथाभावे च कुंडलमिदं सुवर्णमिति सामानाधिकरण्य-
प्रत्यये च व्यक्तं भेदाभेदौ चकास्तः। न चात्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसंगः भेदे चात्यन्-
तिके न सामानाधिकरण्यं गवाश्ववत्। आधाराधेयभावेनैकाश्रयत्वेन वा न सामानाधिकरण्यं
नाद्रियते कुंडं बदरमिति नाप्येकासनस्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति। सोयमबाधितोऽसंदिग्धः
सर्वजनीनः सामानाधिकरण्यप्रत्ययः कार्यकारणयोर्भेदाभेदौ व्यवस्थापयति। तथा च कार्याणां
कारणात्मत्वात् कारणस्य च सद्रूपस्य सर्वत्रानुगमात् सद्रूपेणाभेदः कार्यस्य जगतः भेदः कार्यरूपेण
घटशरावादिनेति। यथाहुः कार्यरूपेण नानात्वमभेदः कारणात्मना हेमात्मना यथाऽभेदः कुंडलाद्या-
त्मना भिदा इति। अत्रोच्यते। कः पुनरयं भेदो नाम यः सहाभेदेनैकत्र भवेत्। परस्पराभाव इति चेत्।
किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा न चेदेकत्वमेवात्यंतमंशवर्त्मभेदः। अस्ति चेद्
एवं नाभेदः। न च भावाभावयोरविरोधः सहासंभवात् संभवे वा कटकवर्द्धमानकयोरपि तद्भेदा-
भेदप्रसंगः भेदस्याभेदाविरोधात्। अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुट-
कुंडलादयो न भिद्यन्ते एवं कटकात्मनापि न भिद्येरन् कटकस्य हाटकादभेदात्। तथा च हाटकमेव
वस्तु सन्न कटकादयो भेदस्याप्रतिभासनात्। अथ हाटकत्वेनाभेदो न कटकत्वेन तेन तु भेद

।उरुभ्रो
१

एवं कुण्डलादेः। यदि हाटकादिः भिन्नः कटकः कथमयं कुण्डलोऽपि इति च नानुवर्तते नानुवर्तते चेत् कथं
हाटकाद्भिन्नः। ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव यथा सूत्रात् कुसुमभेदाः। ना
नुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः। तस्मात्तेऽपि हाटकाद्भिन्ना एवेति। सत्यानुवृत्त्या तस्यैकत्व
स्यानुगमे इदमिह नेदमिदमस्मान्नेदमिदमिदानीं नेदमिदमेवं नेदमिति। विभागो न स्यात्। कस्यचि
त् कस्यचित् कदाचित् कथंचित् विवेकहेतोरभावात्। अपि च दूरात् कनकमिति अवगते न तस्य कुण्डला
दयो विशेषा जिज्ञास्येरन्। कनकाभेदात् तेषां तस्य च ज्ञातत्वात्। अथ भेदोऽप्यस्ति कनकात् कुण्डलादीना
मिति कनकेनैव गमेऽपि अज्ञातास्ते। नन्वभेदोऽप्यस्तीति किं न ज्ञाताः। प्रत्युत ज्ञानमेव तेषां यतः कारणाभावे
१४५। हि कार्याभाव औत्सर्गिकः। सव कारणसत्त्वं प्रोच्यते अस्ति चाभेदः कारणसत्त्वेति कनके ज्ञाते ज्ञाता एव कुण्डला १४५।
दय इति तज्जिज्ञासा ज्ञाना। निश्चानर्थका निःस्फः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिन्नं यथा
करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात्। गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः
तस्मात्ते हेम्नो भिद्यन्ते। कथं तर्हि हेमकुण्डलमिति सामानाधिकरण्यमिति चेत् न व्याधाराधेयभावे समा
नाश्रयत्वे वा सामानाधिकरण्यमित्युक्तं। अथानुवृत्तिव्यावृत्तिव्यवस्था हेम्नि ज्ञाते च कुण्डलादि जि

ज्ञाताश्च कथं न खल्वभेदे हि ऐकांतिके ऽनैकांतिके चैतद्द्वयमुपपद्यते यत इति स्थितं तस्माद्भेदाभेद
योरन्यतरस्मिन्नवहेये ऽभेदोपादानेव भेदकल्पना न भेदोपादाने ऽभेदकल्पनाद् इति युक्तं सिध्यमानतं
त्वात् भेदस्य सिध्यमानानां च प्रत्येकमेकत्वात् एकाभावे चानाश्रयस्य भेदस्यायोगात् एकस्य च भेदा
व भेदाधीनत्वात् नाद्यमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वा
त् अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतं। तथा च श्रुतिः मृत्तिकेत्येव सत्यवसत्यमिति
तस्मात् कूटस्थनित्यत्वादत्र च कूटस्थनित्यमिति। निर्वर्त्यकर्मतामपकरोति तेव पारमार्थिकी न पारि
णामिनित्यनेति। सिद्धं। व्योमवदिति च दृष्टांतः परासिद्धः अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् अत्र च कूट
स्थनित्यमिति निर्वर्त्यकर्मतामपाकरोति सर्वव्यापीति प्राप्यकर्मतां सर्वविक्रियारहितमिति विकार्य
कर्मतां निरवयवमिति संस्कार्यकर्मतां व्रीहीणां खलु प्रोक्षणेन संस्काराख्यो ऽतिशयो यथा जन्यते नैवं
ब्रह्मणि कश्चिद्दशः क्रियाधेयो ऽस्यानवयवत्वात् अनंशत्वादित्यर्थः पुरुषार्थतामाह नित्यतृप्त
मिति तस्माद्दुःखरहितं सुखमुपलक्षयति क्वचित् दुःखनिवृत्तिसाहितं हि सुखं तृप्तिः सुखं चाप्रतीयमा
नं न पुरुषार्थ इत्यत आह स्वयं ज्योतिरिति इहैवं स्वरूपेण मोक्षाख्यः क्रियानिष्पाद्यस्य तु मोक्षस्यानि

स्वत्वं प्रसंजयति न घटादिवदीति न चागमबाधः। आगमस्योक्तेन प्रकारेणोपपत्तेः। तदेवं स्वमतेन मोक्षस्य
फळश्रुत्यादि। निरूपाद्य ज्ञानजन्यापूर्वजनितो मोक्षो नैयायिक इत्यस्यार्थस्य संति भूयसः श्रुतयो निवारि
कात्याहुः अपि च ब्रह्म वेदेति। अविद्या इव प्रातिबंधापगममात्रेण च विद्याया मोक्षसाधनत्वं न स्वतो
पूर्वोत्पादेन चेत्यत्रापि श्रुतीरुदाहरति त्वं हि नः पितेति न केवलमस्मिन्नर्थे श्रुत्यादयोऽपि तु अक्षपा
दाचार्यसूत्रमपि न्यायमूलकत्वात् तथा चोवाचार्यप्रणीतमिति आचार्यश्चोक्तलक्षणः पुराणे। आचि
नोति च शास्त्रार्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति तेन हि प्रणीतं सूत्रं दुःख
॥५०॥ जन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्ग इति पाठापेक्षया कारणमुत्तरं ॥५०॥
कार्यं च पूर्वं कारणापाये कार्यापायः कफापाये इव कफोद्भवस्य ज्वरस्यापायः जन्मापाये दुःखापायः प्र
वृत्त्यपाये जन्मापायः दोषापाये प्रवृत्त्यपायः मिथ्याज्ञानापाये दोषापायः। मिथ्याज्ञानं चाविद्या रागाद्यु
पजनक्रमेण दृष्टेनैव संसारस्य परमं निदानं सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वज्ञानेनावगमिपर्ये तेन विरो
धिना निवर्त्यते ततोऽविद्यानिवृत्त्या ब्रह्मस्वरूपाविर्भावो मोक्षः न तु विद्याकार्यः तज्जनितापूर्वकार्यो वा इति
सूत्रार्थः तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासेन त्वत्स्वरूपादस्तं मतं तत्त्वज्ञा

मिह संमतं तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः। स्यादेतत् नैकत्वविज्ञानं यथावस्थितं
वस्तुविषयं येन मिथ्याज्ञानं नश्येदावभासं निवर्त्यमन्न विधिबाधितो क्वचेत् आपितु संपदादिरूपं तथा
च विधेः प्रागप्राप्तं पुरुषेच्छया कर्तव्यं स तु विधिगोचरो क्व विध्यति यथा दृष्टमनंतत्वेन मनसो विश्वे
देवसाम्यात् विश्वेदेवो मनसि संपाद्य मनः आलंबनं अविद्यमानसमं कृत्वा प्राधान्येन संपाद्या
नां विश्वेषामेव देवानामनुचिंतनं तेन चानंतलोकजयः प्राप्तिः एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूप
तां संपाद्य जीवमालंबनमविद्यमानसमं कृत्वा ब्रह्मानुचिंतनं तेन चामृतत्वफलप्राप्तिः। अध्यासे
त्वालंबनस्यैव प्राधान्येनारोपित तत्त्वावस्यानुचिंतनं यथा मनो ब्रह्मेत्युपासीतादित्यो ब्रह्मेत्यादेशाद्
स एवं जीवमब्रह्म ब्रह्मेत्युपासीतेति। क्रियाविशेषयोगाद्वा यथा वायुर्वाव संवर्गः प्राणो वाव संवर्गः
बाह्यस्य खलु वायुर्देवता वह्न्यादीन् संवृंक्ते महाप्रलयसमये हि वायुर्वह्न्यादीन् संहृत्य स्वात्मनि
स्थापयति यथाह द्रविडाचार्यः संहरणाद्वा संवरणाद्वा स्वात्मीभावाद्वा वायुः संवर्ग इति अध्यात्मं च
प्राणः संवर्ग इति स हि सर्वाणि वागादीनि संवृंक्ते प्रायणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रमती
ति सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद्दर्शयतीति यथा एवं जीवात्मनि दृंहणक्रियया ब्रह्म

दृष्टिरमृतत्वाय फलायाकल्पत इति तादृगनुत्रिष्वपि पक्षेष्वात्मना दर्शनोपासनादयः प्रधानक
र्माण्यपूर्वविषयत्वात् । स्तुतशास्त्रवत् । आत्मानुद्रव्यं कर्मापि गुणभूतमिति । संस्कारो वात्मनो दर्शनं
विधीयते यथा दर्शपूर्णमासप्रकरणे पत्न्यवेक्षितमाज्यं भवतीति समाम्नातं प्रकरणिनावगृहीत
उपांशुयाजाङ्गभूताज्यद्रव्यसंस्कारस्तयावेक्षणं गुणकर्म विधीयते । एवं कर्तृत्वेन क्रत्वंगभूतआ
त्मन्यात्मा वा अरे द्रष्टव्य इति दर्शनं गुणकर्म विधीयते येन द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत इति न्या
यात् । अत आह । न वेदं ब्रह्मात्मैकत्वविज्ञानमिति । कुतः संपदादिरूपे हि ब्रह्मात्मैकत्व इति । दर्शपूर्ण
॥५९५ मासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदंगभूताज्यसंस्कार इति युज्यते न त्वात्मा वा अरे द्रष्टव्य ॥५९५
इत्यादि कस्यचित् प्रकरणे समाम्नातं । न चानारभ्याधीतमपि यस्य पर्णमयी जुहूर्भवतीति अव्य
भिचरितक्रतुसंबंधो जुहूद्वारेण जुहूपदं क्रतुं स्मारयत् वाक्येन यथा पर्णतायाः क्रतुशेषभाव
मापादयति एवमात्मानाऽपि । अव्यभिचरितक्रतुसंबंधो येन तद्दर्शनं क्रत्वंसंगं तु आत्मानं क्रत्वर्थसंस्कुर्या
त् । तेन यद्यप्ययं विधिः तथापि सुवर्णं भार्यमिति वत् विनियोगभंगेन प्रधानकर्मैवापूर्वविषयत्वात्
न गुणकर्मेति स्थवीयस्तयैतत् दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तं तदतिरोहिता

न्तेतया न व्याख्यातं किंच। ज्ञानक्रियाविषयत्वविधानमस्य वदुष्प्राप्ति। विरुद्धमित्याह नचविदि क्रि
येति शंकते अविषयत्वश्रुतेः। ततः शांतिकर्मणि वेताञ्छेदपरतिभावः निराकोति नकुतः अविद्याकल्पि
तभेदनिवृत्तिविषयत्वादिति सर्वमेव हि वाक्यं नेदं तया वस्तुभेदं बोधयितुमर्हति न ह्रीति क्षीरगुडादीनां
मधुरसभेदः शक्य आख्यातुं एवमन्यत्रापि सर्वत्र द्रष्टव्यं तेन प्रमाणानां तत्र सिद्धेर्लौकिके एवार्थे य द्वाग
तिरिह शीदृतौ द्वा [illegible] केयकथा प्रसंगात्मन्यलौकिके। अदूरविप्रकर्षेण तु कथं वितु प्रतिपादनं द्रष्टापि
समानं त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीति अविद्याविलसितेत दस्या
विवर्ती भूतो दासीन तत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तान्निवृत्तौ प्रमाणादयः
तिरूनो विधानिवर्त्तते। नहि वक्तुं वस्तु सत्त्वेवाप्यवाचकवचनानि वस्तु संतिष्ठवितुमर्हंतीति तथाहि विग
ळितपराग्रूपत्वसर्वत्वंपदस्य तदर्थस्त्वंपदार्थत्वमिति हि पदेनैकार्थत्वेत्वमित्यपि यत्सदं। तदपि चतद्र्गत्वेकार्थ्य
विशुद्धविज्ञानमतां त्मजतिसक ख्लान् कर्तृत्वादीनूपदार्थमळान्निजान् इत्यां वरश्लोकः अत्रैवार्थेश्रुति
रुदाहरति तथा च शास्त्रं यस्यामतं मितिश्रुतमुपसंहरति। अतो विद्याकल्पितेति। परपेक्षमोक्षस्यानि
त्यतामापादयति यस्याविति। कार्यमपूर्वं वागादिव्यापारजन्यं तदपेक्षते मोक्षः स्यात्परतावितिातपोः

तयोरितरेतरनिर्वर्त्यविकार्ययोः । क्षणिकं विज्ञानमात्मेति बौद्धाः तथा च विशुद्धविज्ञानोत्पादो मोक्ष
इति निर्वर्त्यो मोक्षः अन्येषां तु संसाररूपावस्थामपहाय यथा कैवल्यावस्थामपहाय यथा कैवल्यावस्था
वाप्तिः आत्मनः स मोक्ष इति विकार्यो मोक्षः यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो
दधीति तदेतयोः पक्षयोरनित्यता मोक्षस्य कार्यत्वाद्दधिघटादिवत् ॥ अथ यदतः परो दिवो ज्योतिर्दी
प्यत इति श्रुतेः ब्रह्मणो विकृता विकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या
भविष्यति तथा च प्राप्यकर्मता ब्रह्मण इत्यत आह नेवाप्यत्वेनापीति । अन्यदन्येन विकृतदेशपरिहाण्या
विकृतदेशं प्राप्यते यथोपवेल जलधिरितीव हलचपलकल्लोलमालापरस्परास्फालनसमुच्छल
॥५२॥ त्फेनपुञ्जस्तबकतया विकृतो मध्ये तु प्रशान्तस्तिमितकल्लोलोपसर्गः स्वच्छः स्थिर तथाऽविकृतस्य ॥५२॥
स्य मध्यं अविकृतपौतिकः पोतेन प्राप्नोति जीवश्च ब्रह्मेति किं केन प्राप्यतां भेदाश्रयत्वात् प्राप्तेरित्यर्थः
अयं च जीवो ब्रह्मणोऽभिन्नः तथापि न तेन ब्रह्माप्यते ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह । स्वरूपव्य
तिरिक्तत्वेनापीति । संस्कार्यकर्मतामपाकरोति नापि संस्कार्यमिति । द्वयी हि संस्कार्यता गुणाधानेन वा यथा
बीजपूरकुसुमस्य लाक्षारसावसेकेन निहितं कुसुमं संस्कृतं लाक्षारससवर्णं फलं प्रसूते । दोषा

य येन वा यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोद्भासितभास्वरत्वं संस्कृतं भवति तत्र न तावद्ब्रह्म
णि गुणाधानं संभवति गुणो हि ब्रह्मणः स्वभावो वातिभिन्नो वा स्वभावश्चेत्कथमाधेयः परस्य नित्यत्वात्
भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसंगः। न च भेदे धर्मधर्मिभावो गवाश्ववत् भेदाभेदश्च व्याहतत्वादवि
रोधात्। तदनेनाभिसंधिनोक्तं अनाधेयातिशयब्रह्मस्वरूपत्वात् मोक्षस्य। द्वितीयं पक्षमपाक्षिपति नापि
दोषापनयेनेति। अशुद्धिः सती दर्पणे निवर्त्यते न तु ब्रह्मण्यसती निवर्त्तनीया नित्यनिवृत्तत्वादित्यर्थः। शंक
ते स्वात्मधर्म एवेति। ब्रह्मस्वभावमोक्षो अनाद्यविद्यामलावृत उपासनाक्रियया आत्मनि संस्क्रियमाणे
अभिव्यज्यते न तु क्रियते एतदुक्तं भवति। नित्यशुद्धत्वमात्मनोऽसिद्धं संसारावस्थायां अविद्यामलिनत्वा
दिति। शंकां निराकरोति। न। कुतः क्रियाश्रयत्वानुपपत्तेः। नाविद्या ब्रह्माश्रया किंतु जीवे सा वानिर्वचनी
येत्युक्तं तेन नित्यशुद्धमेव ब्रह्म अभ्युपेयं। स्याप्यशुद्धिः क्रियासंस्कार्यत्वं दूष्यते क्रिया हि ब्रह्मसमवेता
वा ब्रह्म संस्कुर्यात् यथा निघर्षणमिष्टकाचूर्णसंयोगविभागप्रचयो निरंतर आदर्शतलसमवेतः अन्य
समवेता वा न तावत् ब्रह्मधर्मः क्रिया तस्याः स्वाश्रयविकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात्। अ
न्याश्रया तु कथमन्यस्योपकरोति अतिप्रसंगात् नहि दर्पणे निघृष्यमाणे मणिर्विशुद्धो दृष्टः॥

तद्व्याख्यानिदमिति। तदा आधानं परामृशति। अत्र व्यभिचारं चोदयति ननु देहाध्यासेति। परिहरति नदे-
हेति। अनाद्यनिर्वाच्याविद्योपधानमेव ब्रह्मजीव इति च स्वेत्र इष्यते नाच स्वतेस्य च स्थूलसूक्ष्म
शरीरेंद्रियादिसंहतः तस्य ज्ञातमध्यपादितः तद्देकोदेहेनाहमिति प्रत्ययविषयीकृतः अतः शरीरादि
संस्कारः शरीरादिधर्मोप्यात्मनो भवति तद्भेदाध्यवसायात् यथा तु पथ्यांगरागधर्मः सुगंधिता कामि-
नीनां व्यपदिश्यते तेनात्रापि यद्गाश्रिता। क्रिया सांव्यवहारिकप्रमाणविषयीकृता तस्यैवं संस्का-
रोनान्यस्येति न व्यभिचारः। तत्त्वतस्तु नाक्रिया न संस्कार इति सनिदर्शनं तु शोभनमध्यासभाष्ये व-
कृतं व्याख्यानमिति नेह व्याख्यातं। तयोरन्यः पिप्पलमिति अन्यो जीवात्मा पिप्पलं कर्मफलं अ-
नश्नन्नन्य इति परमात्मा। संहतस्यैव भोक्तृत्वमाह मंत्रवर्णः आत्मेंद्रियेति च। अनुपहितस्य तु हर्षे
भावलाभावप्रदर्शनपरं मंत्रोपठाति। एकोदेव इति। शुक्रं दीप्तिमत् अव्रणं दुःखरहितं अस्ना-
विरं अविगलितं अविनाशीति यावत्। उपसंहरति तस्मादिति। ननु माभून्निर्वर्त्याद्या कर्मता चतुष्टयी पं-
चमी तु कास्ति। द्विधा भविष्यति यथा मोक्षस्य कर्मता घटिष्यते इत्यत आह। अतोन्यदिति। एभ्यः प्रकारे-
भ्यो न प्रकारांतरमन्यदस्ति यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति। एतदुक्तं भवति चतुर्णां फला

नामधेयं अन्यतममतमा क्रियाफलत्वं स्या संसारमोक्षावस्थावर्त्तमानाव्यापकानुपलब्ध्या मोक्षस्य क्रिया
फलत्वं स्यावर्त्तयतीति । तत्किं मोक्षे क्रियैव नास्तीति न यावत् तदर्थ्यर्थो । निशास्त्राणि तदर्थोऽस्य प्रवृत्तयो
ऽनर्थिका इत्यत उपसंहारव्याजेनाह तस्मात् ज्ञानमेकमिति । अथ ज्ञानं मानसी क्रिया कस्मान्न विधिगोचरः क
स्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमन्न मोक्ष इति चोदयति ननु ज्ञानमिति । परिहरति न कुतः वैलक्षण्यात् । अय
मर्थः सत्यं ज्ञानं मानसी क्रिया नात्वियं ब्रह्मणि फलं जनयितुमर्हतीति तस्य स्वयं प्रकाशत्वात् यावैदिकी क्रिया कर्मभावानु
पपत्तेरित्युक्तं तदेतस्मिन्नेव लक्षण्येऽस्थितएवैलक्षण्यान्तरमाह क्रिया हि नाम सेति । यथा वायोविति अग्निर्वा
स्त्वनपेक्षाऽग्निबुद्धिः यासा क्रिया हि नामेतियो ऽत्र विषये वस्तुस्वरूपनिरपेक्षैव चोद्यते यथा देवतासंप्रदान
कहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया यथा वायोविति अग्निवस्त्वनपेक्षाऽग्निबुद्धिः यासा
क्रिया हि नामेति ऽत्र यो ऽत्रा न हि यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति स्मात् विधेः प्राग्देवता
ध्यानं प्राप्तं । आ सत्त्वधीतवेदस्य विदितपदतदर्थसंबंधस्याधिगततच्छास्त्रानायतत्वस्य देवसोम्येदमित्यादेस्त
त्वमसीत्यंतात् छन्दसं देहंत ब्रह्मात्मभाव ज्ञानं शब्दप्रमाणसामर्थ्यात् तदिंद्रियार्थसन्निकर्षसामर्थ्यादिव प्रणि
हितमनसः स्फीतालोकमध्यवर्त्तिकुंभानुभवः । न त्वेतत् सौस्थ्य सामथ्यीं लब्ध्यजन्मा मनुजेच्छयान्यथा कर्त्तु
मकर्त्तुं वा न्याः कोपि देवताध्यानवत् येनात्र चानत्र विधिः स्यात् । न चोपासना वाऽनुभवपर्यंतता वा

वा॰ दे॰ ७

स्माद्विधिगोचरः। तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वा अनाद्यविद्यापनये वा विधिमन्
तरेण प्राप्तत्वेन पुरुषेच्छयान्यथा कर्तुमकर्तुं वाशक्यत्वात्। तस्माद्ब्रह्मज्ञानं मानसी क्रियापि नो विधिगोचरः
पुरुषाधीनव्यापाराधीनात्मा क्रिया वस्तुस्वरूपनिरपेक्षैव क्वचिद्विरोधिनी यथा देवताध्यानक्रियायां न तत्र
वस्तुरूपेण कश्चिद्विरोधः क्वचिद्वस्तुस्वरूपविरोधिनी यथा योषित्पुरुषौ योषग्निर्बुद्धिरित्येतावताभेदेन नि
दर्शनमिथुनद्वये। पञ्चाग्निसः क्रियैवेत्येवकारेण वस्तुतन्त्रतामपाकरोति। नन्वात्मेत्येवोपासीतेत्यादयो विध
॥५४॥ यः श्रूयन्ते न च ते प्रमत्तगीताः तुल्यं हि सांप्रदायिकं तस्माद्विधेयेनात्र कर्तव्यमित्यत आह तद्विषये लि
ङादय इति। सत्यं श्रूयन्ते लिङादयो न त्वमी विधिविषयाः तद्विषयत्वे अप्रामाण्यप्रसंगात् हेयोपादेयविषयो ॥५४॥
हि विधिः स एव हेय उपादेयो वा यं पुरुषः कर्तुमन्यथा कर्तुं शक्नोति तत्रैव समर्थः कर्ता अधिकृतो नियोज्यो
भवति। न चैवंभूतान्यात्मश्रवणमनननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधिव्यापकयोरभा
वाद्विधेरभाव इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्थाः उपलस्ये क्षुरवत् क्षुरतैक्ष्ण्यं कुंठमप्रमाणी
भवन्तीति अनियोज्यविषयत्वादिति। समर्थो हि कर्ता अधिकारी नियोज्यः असामर्थ्ये तु न कर्तृता ततो नाधिकृ
तः न नियोज्य इत्यर्थः। यदि विधेरभावात् न हि विधिवचनानि किमर्थानि न हि वचनान्यसन्ति विधिच्छाया

नीतिपृच्छति किमर्थानीति। नत्वानर्थकानि युक्तानि स्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरिति भावः। उ
त्तरं भाष्ये विवेकेति। अन्यतः प्राप्तस्य वह्निश्रवणादेर्यो विधिस्वरूपैर्वाक्यैरनूद्यन्ते न चानुवादो निष्प्रयोजनः
प्रवृत्तिविशेषकरत्वात् तथाहि तत्तद्दिष्टानिष्टविषयेष्वाजिहासाऽपहृतैर्दृष्टतया वाह्यमुखो न प्रत्यगात्म
नि मनः समाधातुमर्हतीत्यात्मश्रवणादिविधिस्वरूपैस्तैर्वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्म
स्रोत उद्घाट्यत इति प्रवृत्तिविशेषकरतानुवादानामस्तीति सप्रयोजनत्वादध्ययनविध्यधीनग्रहणत्वमुपपद्य
त इति। यच्चचोदितं आत्मज्ञानमनुष्ठानानंगत्वादपुरुषार्थमिति तदयुक्तं स्वतोऽस्य पुरुषार्थत्वसिद्धेः यदनु
ष्ठानानंगत्वं तद्दूषयन् तद्दूषणमित्याह यदपीति। अनुसंज्वरेत् शरीरं तप्यमानमनुतप्येत स्युगममन्यत्।
प्रकृतमुपसंहरेति। तस्मान्नज्ञानिपतीति। प्रकृतसिद्धार्थमेकदेशीमतं दूषयितुमनुभाषते यदपि केचिदि
द्वैरिति। दूषयति तन्नेति। इदमत्राकूतं। कार्यबोधे यथा चेष्टा लिंगं हर्षादयस्तथा। सिद्धबोधेऽर्थ
वत्त्वैवं शास्त्रत्वं हितशासनात्। यदि हि पदानां कार्याभिधाने तदर्थान्वयाभिधाने वा नियमेन वृद्ध
व्यवहारे सामर्थ्यमवधृतं न चैवं न भवेदिहेयोऽनुपादेयभूतब्रह्मात्मतापरत्वमुपनिषदां तत्राविदि
तसामर्थ्यत्वात् पदानां लोके तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः। अथ भूतेप्यर्थे पदानां लोके शक्य
संगतिग्रहः ततउपनिषदां तत्परत्वे पौर्वापर्यालोचनेनावगम्यमानमपहुत्य न कार्यपरत्वं शक्यं

कळ्पयितुं शक्यत इत्यशक्यतकळ्पना प्रसंगात् तत्र तावद्देवमकार्येर्येन संगतिघटोपदित त्परः प्र
योगो न ळोके दृश्येत तदुपरस्यो वाक्यस्यान्वयस्योन्नेतुं न शक्येत न तावत् तत्परः प्रयोगो न दृश्यते ळो
के कूतूहळळम्पादि निर्दृश्यन्तीनां अकार्यपिपराणां पदसंदर्भाणां प्रयोगस्य ळोके बहुळमुपळब्धेः
तद्यथा आखंडळादि ळोकपाळचक्रवाळाधिवसतिः सिद्धविद्याधरगंधर्वाप्सरःपरिवारो ब्रह्म
ळोकवतीर्णमंदाकिनीपयःप्रवाहपीतधौतकळधौतमयशिळातळोनंदनादिप्रमदावनिहारि
मणिमयशकुंतकमनीयनिनवमनोहरः पर्वतराजः सुमेरुरिति। नैषधभुजंगोरहुविधिपति त्यादिः। नापि
॥५५॥ कृतार्थबुद्धिकल्पनपुरुषवार्त्तिनी न शक्यास्मुत्नेतुं दुर्वादेरुन्नयनहेतोः स्त्रस्त्रवाकूत त्याहिअवि ॥५५॥
हितार्थप्रसेर देशात् जनभाषार्थो द्विडोर्गैनेरगमनोद्यतो राजमार्गाभ्यर्णदेवदत्तमंदिरमध्यासीनः
प्रतिपन्न जनकानंदानिबंधनपुत्रजन्मावार्ताहारेण सहनगरस्थदेवदत्ताभ्याशमागतः पटवा
सोपायनार्पणपुरःसरं देहिभावद्देस देवदत्तपुत्रस्ते जात इति वार्ताहारोऽव्याहारीत् श्रवणसमनंतरमु
पजातरोमांचकंचुकं विकासितनयनोत्पळं अति स्मेरमुखकमलं महोत्सवळमन्वळोकय देवदत्तमुत्पन्नप्रमो
दमनुमिमीते प्रमोदस्य च प्रागभूतस्य तद्वार्ताहारश्रवणसमनंतरं भवतः तद्वेतुतां नचापम प्रति

पादस्यानूहर्षहेतुमर्थं हर्षायकव्यन्तरतिअनेनहर्षहेतुरर्थउक्तः तीत्यनि पद्यते हर्षहेतुत्वं नरस्य ताम्र
तीतिपुत्रजन्मनष्टधनलाभेनइवसमानं तदेव दारीहारेणाभ्युपगम्यतीति । नि । स्त्रीनोतीति । एवं च पर्यौ काद
यौ्यद्वाहार्याः । तथा च प्रयोजनवत्तया कृतार्थविधानस्य अञ्जसा यन्मोगो कृपमन्नः । एवं तब्रह्मस्य
रूपज्ञानस्य परमपुरुषार्थहेतुत्वं संभवात् अनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्तीवेदान्तानां पुरु
षहितानुशासनात् शास्त्रत्वं सिद्धं भवति । नास्ति हि मेतत् विवादाध्यासितानि वेदवाक्यानि कृतार्थवि
षयाणि कृतार्थविषयप्रमाजनकत्वात् यद्यद्विषयप्रमाजनकं तत्तद्विषयं यथानूपादिविषयं चक्षुरा
दि तथा चैतानि तस्मात्तथेति । तस्मात् सूत्रं तं त्वौपनिषदस्य पुरुषस्यानन्यशेषत्वादिति । उपनिपूर्व
तु सदेर्विशरणाद्यर्थात् । क्विप् उपनिषत्पदं क्वसादि तं उपनीयाद्वयं ब्रह्मसवासनामविद्यां हिनस्तीति
ब्रह्मविद्यामाह तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः । ततो विदितः औपनिषदः पुरुषः । एतदेव विग्रहाते मो
स्यां तूपनिषत्स्वेवेति । अहंप्रत्ययविषयादि नात्ति आसंसारीति । अत एव क्रियारहितत्वात् क्रतुर्यं विधि इ
व्याद्वि लक्षणः आनर्थक्यसत्तु विधिद्रव्यं विद्धलक्षणोयदनन्यशेषः । अन्यशेषं हि भूतं भाव्युपयो
गी । यद्धि द्रव्यं चिकीर्षितं सक्तुद्रुत्पत्त्याप्याप्यं संभवति । यथा यूपं तक्षतीत्यादि यत्तु नरनन्य शेष

भूतभाव्युपयोगरहितं यथा सुवर्णं भार्यं यथा सक्तून् जुहोतीत्यादि। न तस्योत्पाद्याप्यता। कस्मा
त्पुनरस्यानन्यशेषत्वमित्यत आह। यतः स्वप्रकरणस्थ इति उपनिषदां अनारभ्याधीतानां पौर्वापर्यालोच
नया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणं न तु जुह्वादिवदव्यभिचारितकर्म
संबंधः पुरुषप्रक्रमपपादितं। अतः स्वप्रकरणस्थः। सोयं तथाविध उपनिषत्सु प्रतीयमानो न नास्ती
ति शक्यो वक्तुमित्यर्थः। स्यादेतत् मानान्तरागोचरत्वेनागृहीतसंगतितया ऽपदार्थस्य ब्रह्मणो वाक्या
र्थत्वानुपपत्तेः कथमुपनिषदर्थ इत्यत आह स एष नेति नेत्यात्मेत्यात्मशब्दात्। यद्यपि गवादि
॥५६॥ वत् मानान्तरगोचरत्वमात्मनो नास्ति तथापि प्रकाशात्मन एव सतः तत्तदुपाधिपरिहाण्या शक्यं वा ॥५६॥
क्यार्थत्वेन निरूपणं हारकस्येव कर्करकुण्डलादिपरिहाण्या। नहि प्रकाशः स्वसंवेदनो न भासते
नापि तदवच्छेदकः कार्यकारणसंघातः। तेन स एष नेति नेत्यात्मेति तत्तदवच्छेदपरिहाण्या बृहत्त्वादपना
छ्रस्थपं प्रकाशः शक्यो वाक्यात् आत्मेति वा निरूपयितुमित्यर्थः। अथोपाधिनिरासवदुपहितम
ध्यात्मरूपं कस्मान्नानिरस्यत इत्यत आह आत्मनः प्रत्याख्यानस्याशक्यत्वात्। प्रकाशो हि सर्वस्या
त्मा तदधिष्ठानत्वाद्धि प्रपंचविभ्रमस्य न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति न हि जातु रज्ज्वभा
वे रज्जौ भुजंग इति वा धारेति वा विभ्रमो दृष्टपूर्वः। अपि चात्मनः प्रकाशस्याभासात्प्रपंचस्य प्रथा।

तथा च श्रुतिः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति न चात्मनः प्रकाशस्य प्रख्या
ने प्रपंचप्रख्यायुक्ता। तस्मादात्मनः प्रख्यानायोगात् वेदान्तेभ्यः प्रमाणं तदसंगोचरः सर्वोपाधिरहितं त
ब्रह्मस्वरूपावगतिसिद्धिरित्यर्थः। उपनिषत्स्वेवागत इत्यवधारणमनूद्यमाण आक्षिपति न नै
ति। सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी तत्रैव लौकिकपरीक्षकाणां आत्मपद
प्रयोगात्। य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इत्यौपनिषदस्यात्मपदं तत्रैव प्रवर्त्ति
तुमर्हतीति नार्थान्तरे तद्विपरीते इत्यर्थः। समाधत्ते नाहंप्रत्ययविषय औपनिषदः पुरुषः। कुतः तत्साक्षित्वे
न अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातोपहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽहंप्रत्यय
विषयत्वस्य प्रत्युक्तत्वात्। एतदुक्तं भवति यद्यप्यनेन जीवेनात्मनेति जीवपरमात्मनोः पारमार्थिकमे
क्यं तथापि तस्योपाहितं रूपं जीवः शुद्धं तु रूपं तस्य साक्षि तच्च मानान्तरानधिगतमुपनिषद्गोचर
मिति। एतदेव व्युत्पादयति न ह्यहंप्रत्ययविषयेति। विधिशेषत्वं वा नेतुं न शक्यः कुतः आत्मत्वादेव न ह्या
त्मा अन्यार्थोऽन्यत्तु सर्वमात्मार्थं तथा च श्रुतिः न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु का
माय सर्वं प्रियं भवतीति। अपि च अतः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः सर्वस्य प्रपंचजातस्य
ब्रह्मैव तत्त्वमात्मा न च स्वभावो हेयोऽशक्यहानत्वात् न चोपादेय उपात्तत्वात्। तस्माद्धेयोपादेयविषयो

भावश्रा
७

विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विजयी कुरुत इति। सर्वस्य प्रपंचजातस्यात्मैव तत्त्वमिति तदुपपा
दयति। सर्वं हि विनश्यद्विकारजातं पुरुषांतं विनश्यति। अयमर्थः। पुरुषो हि श्रुतिस्मृतीतिहासपुरा
णतर्कैर्दृष्टेह न्यायप्रस्थापितत्वात्परमार्थसन्। प्रपंचस्तु न तथा विद्योपदर्शितो परमार्थसन्नासौ
नु यश्च परमार्थसन्न सौ प्रकृतीरज्जुतत्त्वमिव सर्पविभ्रमस्याविकारस्यजनतएव वास्यानिर्वाच्यत्वेना
दृढस्वभावस्य विनाशः पुरुषस्य परमार्थसन्नासौ कारणसहस्रेणाप्यसन्नु शक्यः कर्तुं न हि सहस्र
११५७। मपि शिल्पिनो घटं पटयितुं शक्ता इत्युक्तं। तस्माद्विनाशिपुरुषांतो विकारविनाशः शुक्तिरजत
त्वांतरवरजतन्तु जंगविकारविनाशः पुरुषस्त्ववहिः सर्वस्य प्रपंचविकारजातस्य तत्त्वं न च पुरुषस्या
स्ति विनाशो यतोऽनंतो विनाशः स्यादित्याह पुरुषो विनाशहेत्वभावादिति। न हि कारणानि सहस्रमपि सू५७।
अन्यदन्यथापितुमीशत इत्युक्तं। अथ मा भूत्स्वरूपेण पुरुषो हेयउपादेयो वा न हीयस्त्वकाश्चिद्
र्मोहास्य लेकश्चिद्योपादास्यत्वरत्नमत आह विक्रियाहेत्वभावाच्च कूटस्थनित्यः। त्रिविधोऽपि धर्मलक्षणा
वस्थापरिणामेण लक्षणो विकारो नास्तीत्युक्तं। अपि चात्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति नतस्या
त्मवदन्यथात्वं कारणैः शक्यं कर्तुं न च धर्मान्यथात्वादन्यो विकारः तदिदमुक्तं विक्रियाहेत्वभावादिति
सुगममन्यत्। यत्पुनरेकदेशिना शास्त्रविदंबनं सांख्यत्वेनातुक्तां ततदन्यथोपपादयति यदपि शा

स्त्राविद्यामनुक्रमणमिति। दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमिति वक्ष्यते धर्मजिज्ञासायाः प्र
कृतत्वात्। धर्मस्य कर्मत्वात् कर्मावबोधनमित्युक्तं न तु सिद्धरूपब्रह्मावबोधनव्यापारं वेदस्य
वाक्यार्थ्यं तु नाहि सोमशर्माणि प्रकृते तद्गुणाभिधानं परिसं चष्टे विष्णुशर्मणो गुणवत्तां। विधिशा
स्त्रं विधीयमानकर्मविषयं प्रतिषेधशास्त्रं प्रतिषिध्यमानकर्मविषयमिति उभयमपि कर्मावबोध
परं। अपि चाम्नायस्य क्रियार्थत्वादिति शास्त्रकृद्वचनं तत्रार्थग्रहणं यद्यभिधेयवाचि ततो भूतार्थानां
द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत नहि ते क्रियार्था इत्याह अपि चाम्नायस्येति। यद्यु
च्येत न क्रियार्थत्वं क्रियाभिधेयत्वं अपि तु क्रियाप्रयोजनत्वं द्रव्यगुणकर्मशब्दानां च क्रियार्थत्वे नैव
भूतद्रव्यगुणानां कर्माभिधानं न स्यात् निश्चततया यथाहुः शास्त्रविदो चोदना हि भूतं भवन्तमित्यादि। एतदु
क्तं भवति कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति। तत्राह प्रवृत्तिनि
वृत्तिव्यतिरेकेण भूतं वेदितिं अयमभिसंधिः न तावत् कार्यार्थ एव स्वार्थे पदानां संगतिग्रहो ना
न्यार्थे इत्युपपादितं भूतोऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः। नापि स्वार्थमात्रपरत्वे पदानां तथा सति
न वाक्यार्थप्रत्ययः स्यात्। नहि प्रत्येकं स्वप्रधानत्वे तयोर्गुणप्रधानभावशून्यतानां एकवाक्यता दृष्टा
तस्मात् पदानां स्वार्थमभिदधतां एकप्रयोजनवत्पदार्थपरतया एकवाक्यता दृष्टा न खाच तत्र दर्शा

वाय॰

तत्र विशिष्टैकवाक्यार्थप्रत्ययस्तूपपन्नो भवति। यथाहुः शास्त्रविदः साक्षाद्यद्यपि कुर्वन्ति पदार्थ
प्रतिपादनं वर्णास्तथापि नैतास्मिन्पर्यवस्यन्ति निष्फले वाक्यार्थमितये तेषां प्रवृत्तौ नांतरीयकं।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनमिति। यथा स्वार्थीतरसंसर्गपरतामात्रेण वाक्यार्थप्रत्य
योपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानां। एवं च सति कूटस्थनित्यब्रह्मपरत्वेप्यदोष इति चेन्नव्यं।
कार्यं ननु यद्वाक्यार्थभूतमुपदिश्यते न तद्भूतं व्यसंसर्गिणा रूपेण तस्यापि भव्यत्वात् इत्यत आ
ह नहि भूतमुपदिश्यमानमिति न तादात्म्यलक्षणो संसर्गः किंतु कार्येण सह प्रयोजनप्रयोजनित्वल
॥५८॥ क्षणोऽन्वयः तद्विषयेण भावार्थेन भूतार्थानां क्रियाकारकलक्षणोऽन्वय इति न भूतार्थानां क्रियात्मत्वमित्यर्थः ॥५८॥
नांकते ऽक्रियात्वेपि इति। एवं चाक्रियार्थकूटस्थनित्यब्रह्मो पदेशानुपपत्तिरिति भावः परिहरति। नेत्य
दोषः क्रियार्थत्वेपीति। नहि क्रियार्थं भूतमुपदिश्यमानमभूतं भवति अपितु क्रियानिवर्तनयोग्यं भू
तमेव तत्। तथा च भूतेर्थे वेदनशक्यः शब्दः क्वचित्स्वनिष्ठं भूतविषयादृश्यमानाम् त्वाशील्यीवान
कर्यं विनष्टक्रियानिष्ठतां गमयति तु मुखिनां। नत्वप्राहितं ज्ञाततो दृष्टमप्यनुपहितं क्वचिद्दृष्टमदृष्टं भवति।
तथा च वर्तमानापदेशा आस्ते क्रियोपाहिता अकार्यार्थाः अप्पट वीवर्णकादयो लोकवदुक्तमुपलक्ष

ष्यंते। एवं क्रियाऽनिष्ठा अपि संबंधमात्रपर्यवसायिनो यथा कस्यैष पुरुष इति प्रश्ने राज्ञ इति तथा
प्रतिपत्का अर्थमात्रनिष्ठा यथा कीदृशस्तरव इति प्रश्ने नरं फच्छितार इति नहि पृच्छता पुरुषस्य वा त
द्रूपां वास्तित्वं नास्तित्वे प्रतिपित्सिते किंतु पुरुषस्य स्वामिभेदस्तद्रूपावप्रकारभेदः। प्रकृतेपेक्षि
तं वाचक्षाणाः स्वामिभेदमेव वा प्रकारभेदमेव वा प्रतियंति न पुनरास्तित्वं तस्य तेनाप्रतिपित्सितत्वा
त्। उपपादितावत्प्रकृतेप्यर्थे फलपत्तिः प्रयोजनवतिपदानां वोद्धृप्रतिपादितानामोपादिष्टं फलं किंतु बोपदेष्टुः
श्रोतुर्वा प्रयोजनं स्यात् तस्माद्भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनं नैव भवितुमर्हतीत्यप्यर्थस्य
कारः एतदुक्तं भवति यद्यपि ब्रह्मोदासीनं तथापि तद्विषयं शाब्दज्ञानमनुगतिपर्यंतं विद्यास्य विरोधिनी
संसारमूलनिदानमविद्यामुच्छिंदत् प्रयोजनवदित्यर्थः। अपि च येपि कार्यपरत्वं सर्वेषां पदानामास्थि
षत तैरपि ब्रह्मणो नहिं तद्योनसुरापानवत्स्यादीनां नो कार्यपरता शक्यास्थातुं कृत्यपादिर्मर्यादं
हि कार्यं कृत्याव्याप्तं तान्निवृत्तौ निवर्तते शिंशुपात्वमिव वृक्षत्वनिवृत्तौ। कृतिर्हि पुरुषप्रयत्नः स च विषया
धीननिरूपणः विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतो ऽन्योत्पादानुकूलात्मा भवि
तुमर्हति। न द्रव्यगुणौ। साक्षात्कृतिव्याप्यौ हि कृते। विषयौ न च द्रव्यगुणयोः सिद्धयोरास्तिकौ विव्यापकता

अत एव शास्त्रकृद्भिर्भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतेति। द्रव्यगुणशब्दानां नैमित्तिकावस्था
यां कार्यावमर्शेपि। भावस्य स्वतो द्रव्यगुणशब्दानां भावयोगात्कार्यावमर्श इति भावार्थस्यैवापूर्वा
वगतिः न द्रव्यगुणशब्देभ्य इति। न च दध्ना जुहोति संततमाघारयति इत्यादिषु दध्यादीनां कार्यवि
षयत्वं तस्मादि हि होमाघारभावार्थविषयमेव कार्यं। न चैतावता सोमेन यजेतेतिवद्दधिसंततादि
विशिष्टहोमाघारविधानात् अग्निहोत्रं जुहोति आघारमाघारयतीति नदनुवादः यद्यप्यत्रापि
भावार्थविषयमेव कार्यं तथापि भावार्थानुबंधतया द्रव्यगुणावविषयावपि धीयेते। भावार्थो हि कार
॥५८॥ कव्यापारमात्रतया अविशिष्टः कारकविशेषणद्रव्यादिना विशेष्यते दध्यादिस्तदनुबंधः। ॥५८॥
तथा च भावार्थे विधीयमाने स एव सानुबंधो विधीयत इति द्रव्यगुणावविषयावपि तदनुबंधतये
विहितौ भवतः। एवं च भावार्थप्रणालिकया द्रव्यादिसंक्रांतो विधिर्गौरवादिभ्यस्तत्स्वविषयस्या
न्यतःप्राप्ततया तदनुवादे न तदनुवादेन तदनुबंधी सन् तद्द्रव्यादि परोक्षव तीति सर्वत्र भावार्थवि
षयत्वं विधिः एतेन यदाग्नेयोष्टाकपालो भवतीत्यत्र संबंधविषयो विधिरिति परास्तं। ननु न भवस्य
ल्पो विधेयः सिद्धे भवितरि उद्देश्यस्य भवनं प्रत्यकर्तृत्वात् न खलु गगनं भवति नाप्यसिद्धे असि

नियोज्यत्वानुगगनकुसुमवत्। तस्माद्धवनेन प्रयोज्यव्यापारेणाच्छिन्नः प्रयोजकस्य भावयितुर्व्यापारो वि
धेयः स च व्यापारो भावनाकृतिः प्रयत्न इति निर्विषयश्चास्य शक्यप्रतिपत्तिरतो विषयापेक्षायामाग्ने
यस्याग्नेयोपस्थापितोद्दिष्टदेवतासंबंध एवास्य विषयः। ननु व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूप
संबंधगोचरः स्यात्। नहि घटं कुर्वित्यत्रापि साक्षान्नाम घटं पुरुषप्रयत्नो गोचरयति किंतु दण्डादिह
स्तादिना व्यापारयति। तस्मान्न घटोर्थे कृतिः व्यापारविषयामेव पुरुषः प्रतिपद्यते न तु स्वरूपतो घटं वि
षयः। उद्देश्यतया त्वस्यास्ति घटो न तु विषयतया विषयतया तु हस्तादिव्यापार एव तत्र तत्राग्नेयपर
त्यस्यापि द्रव्यदेवतासंबंधाच्छिन्नोपार्जितेरेव कार्यविषयो विधेयः। किमुक्तं भवति अग्नयो भवतीति आग्नेयेन
भावयेदिति। अत एव य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इत्यनुवादो भवति यदाग्ने
य इत्यादि विहितस्य यागद्वयस्य अत एव च विहितानूदितस्य तस्यैव दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते
ति अधिकारसंबंधः। तस्मात् सर्वत्र कृतिप्रणालिकया भावार्थविषय एव विधिरित्येकान्तः। तथा च हन्यान्न
पिबेदित्यादिषु यदि कार्यमनपेक्ष्य ततस्तद्व्यापिका कृतिरपेक्ष्येत व्याप्तव्यापकस्वभावो विषयः। एवं
च प्राप्तित्वतन्त्रप्रायेण पर्युदासवृत्त्या हननापानसंकल्पलक्षणया तद्विपरीतो विधिः स्यात्। तथा च
सत्यप्रतिषेधसंबंधो दत्तजलाञ्जलिः प्रसज्येत। न च सति संभवे लक्षणान्याय्या। नन्वेक्षेतोद्यन्तमित्यादौ

नुतस्य व्रतमित्यधिकारात् प्रसक्तस्य प्रतिषेधासंभवेन पर्युदासत्वस्याश्रयणीयत्वेन अनीक्षणसंकल्पो ब्राह्मणोयुक्तः॥
तस्मान्नहन्यान्नपिबेदित्यादिषु प्रस   प्रतिषेधेषु भावार्थाभावान् तद्भावाभावः कृतेरभावस्तदभा
वे च तद्भावस्य कार्यस्याभाव इति न कार्यपरत्वनियमः सर्वत्र वाक्ये इत्याह आमणीनहं तव इत्येव
माद्येति तन्नु कस्मान्निवृत्तिरेव कार्यं न भवति तत्साधनं वेत्यत आह नच स्यात्क्रियेति। क्रियाशब्दः कार्यवच
नः। एतदेव विवृणुते अक्रियार्थानामिति। स्यादेतत् विधिविभक्तिश्रवणात्कार्यतावत् प्रतीयते तद्वचनभावा
॥६०॥ चैअन्तरेण नचरागतः प्रवृत्तिस्य हननपानादाय कस्मादौदासीन्यस्यैमुपपद्यते विना विधारकप्रयत्नं॥
तस्मात् स एव प्रकृत्यनुरवानां मनोवाग्देहानां विधारकः प्रयत्नो निषेधाविधिगोचरः क्रियेति नाक्रि
यापरा॥ मास्ति वा कथं किंचिद्ब्रवीत्याह नचेह न नक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञः शक्यमसौ संज्ञो क्रि ६०
यार्थत्वं कल्पयितुं। केन हेतुना न शक्यमित्यत आह स्वभावप्राप्तहं स्यर्थानुरागेण नञः। अयमर्थः ह
ननपानपरोहि विधिप्रत्ययः प्रतीयमानस्तेऽव विधत्ताइत्यलर्गः नचैते शाक्ये विधातुं रागतः प्राप्तत्वान्
नचतत्रः प्रसक्तस्य प्रतिषेधो विधेयः तस्यापौदासीन्यरूपस्य सिद्धतया प्राप्तत्वान् नच विधारकः प्रयत्नः
तस्याश्रुतत्वेन लक्ष्यमाणत्वात् सति संभवे वलक्षणाया अन्याय्यत्वात् विधिविभक्तेश्च रागतः

प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोग्यात्। तस्मात् यत् पिबेत् अन्याद्देत्यनूद्य तन्नोतिनि
षिध्यते तदभावो लाघ्यते न तु नञर्थो विधीयते। अभावस्य विरोधिभावानिरूपणात् यो भावस्तस्या
नुपातीति सिद्धे सिद्धवत्साध्ये साध्यवद्भासत इति साध्यविलयो नञर्थः साध्यवद्भासत इति नञर्थः
कार्य इति धर्मस्तद्दृष्टमात्रहननं वैधस्याभाव इति। ननु बोधयनुस्य संबंधिनो भावनं नञ्प्रवृत्त्यान्मुखानां
तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह भाववुद्धिश्च औदासीन्यपालनकारणं। अप
मत्तिः पापः हारितः पथ्यमश्नीयान्न सर्पायांगुलिं दद्यादित्यादि वचनश्रवणासमनंतरं प्रयोज्यवृद्ध
स्य परेष्टसाधनत्वेन प्रवृत्तिं भुजंगं गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालोऽप्यस्तु प्रयो
ज्यवृद्धस्य प्रवृत्तिनिवृत्तिहेतू इच्छाद्वेषावनुमिमीते तथाहि इच्छाद्वेषहेतुके वृद्धस्य प्रवृत्तिनिवृत्ती स्व
तंत्रप्रवृत्तिनिवृत्तित्वात् मदीयस्वतंत्रप्रवृत्तिनिवृत्तिवत्। कर्तव्यतेकार्यसमवेतेष्टानिष्टसाधनभावा
वगमपूर्वकौ चास्येच्छाद्वेषौ प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वात्। मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषवत्।
न जातु मम शब्दतद्व्यापारपुरुषाशयेष्टकाल्मानवच्छिन्नभावनाऽपूर्वप्रत्ययपूर्वौ विच्छाद्वेषावनु
तौ अपि तु भूयो भूयः स्वगतमालोचयतः उक्तकारणपूर्वावेव प्रत्यवभासेते तस्मात् वृद्धस्यापि त

त्रप्रवृत्तिनिवृत्ती इच्छाद्वेषजन्ये शौच कर्तव्यत्वे कार्यसमवेतेष्टानिष्टसाधनभावावगमपूर्वविसानु
पूर्वात्सिद्धः कार्यकारणभावश्चेतिरष्टानिष्टसाधनतावगमात् प्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धस
चावगमः प्राग्भूतः शब्दश्रवणानंतरमुपजायमानः शब्दश्रवणहेतुक इति प्रवर्तकेषु वाक्येषु यजे
तेत्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयन् तस्येष्टसाधनतां कर्तव्यानां गमयति
अनन्यलभ्यत्वाद्विधेयोः अनन्यलभ्यस्यैव शास्त्रार्थत्वात्। यत्र तु कर्तव्यताऽन्यत एव लभ्यते यथा
न हन्यान्नापि वेदित्यादिषु हननपानप्रवृत्तयो रागतः प्रतिलब्धास्तत्र तदनुवादेन तत्रासमर्थिव्याहृ
॥६१॥ ताष्ठिऊर्णोक्तिरन्यतोऽब्राह्मणनयोरनर्थहेतुभावमात्रमवगमयति प्रत्यक्षं। हितयोरिष्टसाधनभा ६१
वोवगम्यते अन्यथा रागविषयत्वायोगात्। तस्माद्रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनताप्रज्ञा
पनपरे न हन्यान्नापि वेदित्यादि वाक्यं। ननु कर्तव्यपरमिति सूत्रक्रमकार्यनिष्टत्वं निषेधानां निषेध्या
नां च अनर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिः तया स्वकर्तव्ये चेतन आपाततो रमणीयेतापरम
पि आयतिमालोच्यप्रवृत्त्यभावं निवृत्तिमवबुध्यानिवर्तते। उदासीन्यमात्मनोऽवस्थापयतीति यावत्
स्यादेतत् अभावबुद्धिर्ध्वोदासीन्यस्थापनकारणं। यावदोदासीन्यमनुवर्तेतनवानुवर्तते। नन्वु

द्गासीनोपचिदिग्रूपांतरव्यासक्तचित्तस्तद्भावबुद्धिमान्न तद्भावस्थापनकारणाभावे कार्यावस्थानं द्रष्टुं न
हि स्तंभावपाते प्रासादोऽवतिष्ठते ऽत आह सावदग्धेंधनाग्निवत्स्वयमेवोपशाम्यति। तावदेव खल्वयं
प्रवृत्त्युन्मुखो न यावदस्यानर्थहेतुभावमधिगच्छति अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्दि
स दग्धेंधनाग्निवत्स्वयमेवोपशाम्यति। एतदुक्तं भवति यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणे
न शक्तस्य जीवनावस्थानहेतुः न च कवचापगमे वासति च शस्त्रप्रहारे राजन्यजीवनाश इति। उप
संहरति तस्मात्प्रसक्तक्रियानिवृत्यौदासीन्यमेवेति। औदासीन्यमाज्ञानतोप्यस्तीति प्रसक्तक्रियानि
वृत्त्योपलक्ष्य विशिनष्टि। तत्किमक्रियार्थत्वेनानर्थत्वेनानर्थक्यमाशंक्य क्रियार्थत्वोपवर्णनं जैमिनीय
समं तु समेवेत्युपसंहारव्याजेन परिहरति। तस्मात्पुरुषार्थेति। पुरुषार्थानुपयोग्युपाख्यानादि विष
यावक्रियार्थतयाप्रवृत्तौ तद्रूपज्ञानतूपनिबद्धविषयौ। उपनिषद्भाष्यं पुरुषार्थत्वं ब्रह्मपरत्वेवगमपर्यवसा
नादित्यत्र ... दृष्टौपनिषद्गात्मज्ञानमपुरु ... बार्थं मन्यमाने नोक्तं कर्तव्यविध्यननुप्रवेशमंतरेणेति।
अत्र निगूढाभिसंधिः पूर्वोक्तं परिहारं स्मारयति। नत्परिहृतमिति। अत्रोत्सेक्षास्योक्तमर्थं स्मारयति।
ननु उक्तं ब्रह्मणोपीति। निगूढमभिसंधिं समाधानेनोद्घाटयति। अत्रोच्यते। नावगत ब्रह्मात्मभावस्येति। सत्यं

नब्रह्मज्ञानमात्रंसांसारिकधर्मनिवृत्तिकारणं अपितु साक्षात्कारपर्यंतं। ब्रह्मसाक्षात्कारश्च अंतःकरण
वृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कारइवगांधर्वशास्त्रश्र
वणाभ्याससंस्कृतमनोयोनिः। सचनिखिलप्रपंचमहेंद्रजालसाक्षात्कारंसमूलमुन्मूलयन् आत्मान
मपिप्रपंचत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात्। तस्मादनुष्ठेयरूपकथनतुच्छतैवात्रसिद्धं॥
अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्यर्थः। अत्रैवसुखदुःखानुत्पादकोदेहेनेति दर्शनद्वयमाह
॥६२॥ नाहिधनिनइति। स्मृतिमप्युदाहरतितदुक्तमिति। चोदयति शरीरेपतितइति। परिहरति नसशरीरत्वस्ये
ति। यदि वा सत्यं सशरीरत्वं भवेत् नजीवतस्तन्निवर्तेत मिथ्याज्ञाननिमित्तं तु तत्। तच्चोत्पन्नतत्वज्ञानेन ६२
जीवतापिशक्यंनिवर्तयितुं। यत्पुनरशरीरत्वं तदस्यस्वभावइतिनशक्यंनिवर्तयितुं स्वभावहानेनभाव
विनाशप्रसंगादित्याह निमित्तमशरीरत्वमिति। स्यादेतत्। नमिथ्याज्ञाननिमित्तंसशरीरत्वमपितु
धर्माधर्मनिमित्तं तच्चस्वभावौ कारणधर्माधर्मनिवृत्तिमंतरेणननिवर्तते तन्निवृत्तौचप्रापणमेवेतिन
जीवतोऽशरीरत्वमितिशंकते तत्कृतेति। तदिदमात्मानं परामृशति। निराकरोति नशरीरसंबंधस्येति

नतावदात्मासाक्षाद्धर्माधर्म्मौ कर्त्तुमर्हति वाग्बुद्धिशरीरारंभजनितौ हि तौ न असति शरीरसंबंधे भवतः।
ताभ्यां तु शरीरसंबंधं शेवयमानो व्यक्तं परस्परैश्रयदोषमावहति। तदिदमाह शरीरसंबंधस्ये
ति। धुंधे ह्येतस्य मस्ति परस्पराश्रयं न त्वेष दोषो ऽनादित्वात् बीजांकुरादिवदित्यत आह अंधपरंप
रैवानादिकल्पना। यस्तु मन्यते नेयमंधपरंपरा तुल्यानादिता नहि यतो धर्माधर्मभेदाद्य आत्मशरी
रसंबंधभेदः न तद्देव सधर्म्माधर्म्मभेदः। किं त्वेवपूर्वस्मादात्मशरीरसंबंधात् पूर्वधर्म्माधर्मभे
द उत्पन्नः एवं त्वात्मशरीरसंबंधो ऽस्माद्धर्म्माधर्मभेदादिति तं प्रत्याह। क्रियासमवायाभावादिति। शं
कते सान्निध्यानमात्रेणेति। परिहरति नेति। उपादानं स्वीकरणं। नात्वियविधात्मनीत्याहन्तवात्मनः इति
ये तु देहाद्यात्माभिमानो न मिथ्या ऽपि तु गौणो ऽस्मा णवकाशवि यहिंसा। सिद्धा। भिमान इति मन्यंते तन्म
तमुपन्यस्य दूषयति। अत्राहुरिति। प्रा। सिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः। उपपादितं चैतदस्मा
भिरध्यासभाष्य इति नेतो यपाद्यते। यथा मंदांधकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरु
षात्वसांशापि कौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ। तत्र हि पुरुषत्वमनियतमपि समारोपितमेव। सं एवं
संशये समारोपितमाने। निश्चितमुद्दाहृत्य विपर्ययज्ञाने नि। निश्चितमुदाहरति। यथा वा शुक्तिकायामिति।।

उक्तमात्मस्वरूपस्य पुरः स्थितस्य सति शुक्तिरजतस्याध्यारोपे यादृशं वै तन्न विनिश्चयो भवति तावत् कस्मा-
च्छुक्तिविनिश्चयस्य न भवति। संशयो वा द्वेधा युक्तः समाधानधर्म्मधर्म्मिणोर्दर्शनात्। उपलब्ध्य-
नुपलब्ध्यव्यवस्थातो विशेषस्मृतेश्च। संस्कारोन्मेषहेतोः सादृश्यस्यैव द्विवृत्त्वेनोन्नयत्र तुल्य-
त्वादित्यत उक्तं। अकस्मादिति। अनेन दृष्टस्य हेतोः समानत्वेप्यदृष्टं हेतुरुक्तः। तच्च कार्यदर्शनोन्ने-
यत्वेनासाधारणमिति भावः। आत्मानात्मविवेकिनामिति श्रवणमनननकुशलतामात्रेण पंडितानां
मनुभवेन तत्त्वसाक्षात्कारवैशिष्ट्यमिति यावत्। तदुक्तं पश्वादिभिश्चाविशेषादिति। शेषमतिरोहि-
तार्थः जीवतोपि दुर्बोधशरीरत्वे प्रतिस्मृतीरुदाहरति तथा चेति। सुबोधं। प्रकृतमुपसंहरति। तस्मा- ॥६३॥
॥६३॥ न्नावगतब्रह्मात्मभावस्येति। यदुक्तं यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुर्हि तेन मन-
नादिविधानानर्थक्यं तस्मात्प्रतिपत्तिविधिपरा वेदांता इति तदनुभाष्य दूषयति। यदुक्तं यस्तु नरत्वं याव-
दात्मसाक्षात्कारोदयादिति। मनननिदिध्यासनयोरपि विधिसिद्धयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिस-
रूपैर्व वेरनुवादत्वात् तदिदमुक्तं अवगत्यर्थत्वादिति। ब्रह्मसाक्षात्कारोवगतिस्तदर्थत्वं मनननिदिध्यासनयो-
रन्वयव्यतिरेकसिद्धमित्यर्थः। अन्यकस्मान्मनननादिविधिरेव न भवतीत्यत उक्तं परिद्वयवगतमिति। नना-
वन्मनननिदिध्यासने समेत्र प्रधानकर्मणी अपूर्वविषये अमृतत्वफलेर्थक्रमं अथ स्यातां। अतो गुणकर्मत्वमन

योरवद्यातत्रोक्षणादिवत्परिशिष्यते तदप्युक्तं अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः विशेषत
स्त्वौपनिषदस्य कर्मानुष्ठाने विरोधादित्यर्थः। प्रकृतमुपसंहरति तस्मादिति। एवं वा सिद्धरूपब्रह्मपरत्व
उपनिषदां ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्भिन्नविषयत्वेन शास्त्रभेदादथातो ब्रह्मजिज्ञासेत्यस्य शा
स्त्रारंभकत्वमुपपद्यत इत्याह एवं सतीति। इतरथा तु धर्मजिज्ञासैवेति। न शास्त्रांतरमिति। न शास्त्रारं
भकत्वं स्यादित्याह प्रतिपत्तिविधिपरत्व इति। न केवलं सिद्धरूपत्वात् ब्रह्मात्मैक्यस्य धर्मादन्यत्वं अपि
तु तद्विरोधादपीत्युपसंहारव्याजेनाह तस्मादहं ब्रह्मास्मीति। इतिकरणेन ज्ञानं परामृशति। विधयो हि
व्य र्मे प्रमाणं ते च साध्यसाधनेतिकर्तव्यताभेदाधिकारिणा धर्मोत्पादिनश्च न तद्धिकारानान ब्रह्मात्मैक्ये सति प्र
म विरोधादित्यर्थः। न केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिरपि तु सर्वेषां प्रमाणानामित्याह। सर्वाणि
चेत शास्त्राणि प्रमाणानीति कुतः। न हीति। अद्वैते हि विषयविषयिभावो नास्ति न च कर्तृत्वं कार्याभावात्। न
च करणत्वमत एव तदिदमुक्तमप्रमातृकाणि प्रमाणानि चेति चकारेण। अत्रैव ब्रह्मविदां गाथामुदाहरति।
अपि वा हुरिति। पुत्रदारादिष्वात्माभिमानो गौणः। यथा स्वदुःखेन दुःखी सुखेन सुखी तथा पुत्रादि
गतेनापीति सोयं गुणः। न त्वेकत्वाभिमानो भेदस्यानुभवसिद्धत्वात्। तस्मात् सिंहो वाहीक इतिवद्गौणः। दे
हेंद्रियादिषु त्वभेदानुभवान्न गौणोप्यात्माभिमानः। किंतु भ्रांतिरजनत ज्ञानबाध्यत्वान्मिथ्या तदेवं द्विविधो

बावश्रु

यथात्माभिमानो लोकयात्रां वहति। तद्रूपसत्त्वे तु न लोकयात्रा। नापि ब्रह्मात्मैक्यानुभवः। तदुपायस्य श्रवण
मननादेरभावात्। तदिदं गौणात्मपुत्रदेहादिबाधनात्। गौणात्मनो सत्त्वे पुत्रकलत्रादिबाधनं ममकारा
भावदशा यावत्। मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च ततश्च न केवलं लोकयात्रास
मुच्छेदः स तु ब्रह्माहमित्येवं बोधशीलस्य त्कार्यमद्वैतसाक्षात्कार इति यावत्। तदापि कथं भवेत्। कुतस्त
दसंभवदिति। अतआह अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः उपलक्षणं चैतत्। प्रमाप्रमे
यप्रमाणविभागस्यापि द्रष्टव्यं। एतदुक्तं भवति। एवंविधविभागोऽद्वैतसाक्षात्कारकारणं ततो नियमेन प्रा
गभावात्तेन तदभावे कार्यं नोत्पद्यत इति। न च प्रमातुरात्मनोऽन्वेष्टव्य आत्मा अन्य इत्याह आन्विष्टः स्या
॥६४॥ त्प्रमातैव पाप्मदोषादिवर्जितः। उक्तं श्रीवाक्यस्येवेपकनिदर्शनं। स्यादेतत्। अप्रमाणात्कथं पारमा
४॥ यत्वनियमात्। वाक्यांतरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात्। एतदनूद्य विध्यावृत्तिलक्षणो ॥८४॥
वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटितः स्वव्याख्याने नैवोक्तप्रायत्वादिति सर्व
मवदातं। इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादश्रीमत्शंकराचार्यकृतशारीरकमीमां
साभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः॥ अथ द्वितीयपादमारिप्सुः
पूर्वोक्तमर्थं स्मारयति वक्ष्यमाणोपयोगितया प्रथमे पाद इति। तत्र हि ब्रह्मणो व्यापित्वनित्य
त्वादयः सिद्धा बहुतयोपदेशं तेन नैते साक्षात्पूर्वमुपपादिता इति कथं हेतुभावेन शक्यते

।१५। पदेषु मितिज्ञसत उक्तं समस्त जगत्कारणस्येति। पद्यपेतेन दूर्ध्वं ॥१॥

केचेकास्त्र थापि ब्रह्मणो जगज्जन्मादिकारणत्वोपपैपादनेनाधिकरणानि द्वांतन्यापेनोपन्निषिद्धार स्पष्टपल्लक्ष्ये
जामुत्तरत्र हेतुभावेनोपन्यास इत्यर्थः अर्थान्तरप्रसिद्धानां चेति। यत्रार्थान्तरप्रसिद्धा एव आकाशप्राणज्योतिश
ब्दयोः ब्रह्मणि व्याख्यायंते तेन व्यभिचारिलिंगश्रवणात्। तत्र केवलकथा मनोमयादीनां पदानां ब्रह्मगोचरत्व
निर्णयं प्राप्ते त्यभिप्रायः। पूर्वपक्षाभिप्रायं त्वग्रे दर्शयिष्यामः। इदमाम्नायते। सर्वं खल्विदं ब्रह्म कुतः तज्ज
लानिति यतस्तस्मा द्ब्रह्मणो जायत इति तज्जं तस्मिंश्च लीयत इति तल्लं तस्मिंश्चानितीति स्थितिकाले चेष्ट
त इति तदनं जगत्तस्मात् सर्वं खल्विदं जगद्ब्रह्म अतः कः कस्मिन्नुत्यते कश्च कं द्वेष्टीति रागद्वेषरहितः शां
तः सन्नुपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं
कुर्वीत मनोमयः प्राणशरीर इत्यादि। तत्र संशयः। किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वे
नोपदिश्यते। आहो स्विद् ब्रह्मेति। किं तावत्प्राप्तं शारीरो जीव इति कुतः। क्रतुमित्यादिवाक्येन विहितं क्रतु
भावनां। अनूद्य स सर्वमित्यादिवाक्यं शमगुणो विधिः। तथा तस्य सर्वं खल्विदं ब्रह्मेति वाक्यं प्रथममपठि
तमपि अर्थाल्लोकेनापरमेव तदर्थोपजीवित्वात्। एवं वक्ष्यमविधिः प्रथमो निर्विषयः सन्न पर्यवस्य

न्विसपायेक्षः श्चयमनिर्दृत्तो न विध्यंतरेणोपद्ती। वितुं शक्यो अपपादकत्वात्। तस्माच्छांततागुणवि
ध्यानात्सूक्ष्ममेव मनोमयः प्राणशरीर इत्यादिभिर्विशेषणोपनायकैः संवध्यते। मनोमयत्वादिवकार्य
कारणसंघातात्मनो जीवात्मनएव निकृष्टमिति जीवात्मनोपास्येनोपरक्तोपासनानयश्चाद्युल्ला
संबंधमर्हति। उत्पत्ति। विशिष्टगुणदिशेधात्। नवस्तुर्द्वेस्वच्छिद्रमितिवा कथं ब्रह्मपरं अपितु शमर्हे तु व
भिगृहार्थवादः शांतवा विध्यिपरः तेन त्यन्नं क्रियत इति वत्। नवान्यपराद्दपि ब्रह्मअपेक्षिततया
स्वीक्रियत इति युक्तं। मनोमयत्वादिभिर्जीवे सुप्रसिद्धे र्जीवविषयसमर्पणे नानपेक्षितत्वात् सर्व
 कर्मत्वादिवजीवस्य पर्यायेण एवं वाणीयस्त्वमप्युपपन्नं। परमात्मनेस्त्वपरिमेयस्यतदनुपपत्तिः
प्रत्याम्नायगतेन वाणीयस्त्वेन ज्यायस्त्वं तदनुगुणतया व्याख्येयं। व्याख्यातं भाष्यकृता। एवं कर्म
कर्तृव्यपदेशः। सप्तमीप्रथमांततायाचअन्येद्वेपि जीवात्मनि कथंचित् भेदोपचारेण राहोः शिर इति वत्
इष्टव्यः। एतद्भ्रमेति जीवविषयं। जीवस्यापि देहादिबृंहणत्वेन ब्रह्मत्वात्। एवं सर्वसंकल्पत्वा
दृयोपि परमात्मावर्त्तिनो जीवेष्वपि संभवति तद्व्यतिरेकात्तस्मात् जीवस्यैवोपास्यत्वे नात्र विव
क्षितो न परमात्मेति प्राप्तं। एवंप्राप्तेऽभिधीयतते। समासः सर्वनाम्नार्थः संनिकृष्टमपेक्षते। त

हिताऽर्थोऽपि सामान्यं नापेक्षाया निवर्तकः। तस्मादपेक्षितं ब्रह्मग्राह्यमन्यपरादपि। तथा च सत्यसंकल्पप्रवृत्तीनां यथार्थता। न चैतदेवं यदि प्राणशरीर इत्यादीनां साक्षाज्जीववाचकत्वं भवेत्॥ नन्वेतदस्ति। तथाहि। प्राणः शरीरमस्येति सर्वनामार्थो बहुव्रीहिः सन्निहितं सर्वनामार्थं संप्राप्यते तदभिधानं पर्यवस्येत्। तत्र मनोमयपदं पर्यवसिताभिधानं तदभिधानपर्यवसानायात्तदेव तु मनोविकारो वा मनःप्रचुरे वा किमर्थमित्यद्यापि न विज्ञायते। तद्यन्नैष शब्दः समवेतार्थो भवति स समासार्थः नत्वैव जीव एव समवेतार्थो न ब्रह्मणीति तस्मात् प्राणो ह्यमना इत्यादि विरुद्धधर्मप्रतिपादनादिति युक्तं। तस्यापि सर्वविकारकारणतया विकाराणां च स्वकारणादभेदात्तेषां मनोमयतया ब्रह्मणस्तत्कारणेऽस्य मनोमयत्वोपपत्तेः। स्यादेतत्। जीवस्य साक्षान्मनोमयत्वाद्यो ब्रह्मणस्तद्द्वारा तत्र प्रथमं द्वारस्य बुद्धिस्थत्वात्तदेवोपास्यमनेनैकं पुनर्ज्ञेयमन्यं ब्रह्म। लिंगानि च जीवस्य ब्रह्मणोऽभेदात् जीवेषूपपद्यते। न त्वेतदत्र संप्रधार्यं किं ब्रह्मलिंगैर्जीवानां तद्भिन्नानामस्तु तद्वत्ता तथा च जीवस्य मनोमयत्वादिभिः प्रथममवगमात्तस्यैवोपास्यत्वं। उत न जीवस्य ब्रह्मलिंगवत्ता तद्भिन्नस्यापि जीवलिंगैरेकं ब्रह्म तदन्यथा च ब्रह्मलिंगानां दर्शनात्। तेषां च जीवेऽनुपपत्तेर्ब्रह्मैवोपास्यमिति। एवं तु पश्यामः। समारोप्य

स्वरूपेण विषयो रूपवान् भवेत्। विभ्रमस्य रूपेण समारोप्यं न रूपवत्। समारोपितस्य हि रूपेण भु-
जंगस्य भीजनत्वादिना रज्जू रूपवती न पुना रज्जुरूपेणाभिगम्यत्वादिना भुजंगो रूपवान्। तदा भु-
जंगस्यैवाभावात् किं रूपवत्। भुजंगदशायां तु न नास्ति वास्तवी रज्जुः। तदिह समारोपितजीवरूपेण
वस्तुतः ब्रह्म रूपवदुच्यते। ननु ब्रह्मरूपैर्नित्यत्वादिभिर्जीवस्तदानुवर्तितुमर्हति। तस्य तदानीमसं-
भवात्। तस्माद्ब्रह्मलिंगदर्शनाज्जीवे च तदसंभवाद्ब्रह्मैवोपास्यं न जीव इति सिद्धं। एतदुपलक्षणाप-
च सर्वं खल्विदं ब्रह्मेति वाक्यमुपन्यस्तमिति। यद्यप्यपौरुषेय इति। शास्त्रयोनित्वेपीश्वरस्य पूर्वस-
ष्टिरचितसंदर्भापेक्षया वक्तृत्वेनास्यात्। तस्मादपौरुषेयत्वाभिधानं। तथा वास्य स्वातंत्र्येण विवक्षा नास्ती-
त्युक्तं। परिग्रहपरित्यागयोरुपादानानुपादाने उक्तेन नूपादेयत्वमेव। अन्यथा दोषस्य तस्यानुपादेय- ॥ब्र॥
स्यापि उपादेयविवक्षितत्वेन च मम साहाव्यपि सम्मार्ग प्रसंगात्। तस्मादनुपादेयत्वेपि ग्रहे उद्देश्यतया परि- ॥८८॥
गृहीतो विवक्षितः। तद्वत्तत्वे कत्वेऽत्वमेव छेदकत्वेन वक्तितमविवक्षितविवक्षितं। इक्षाने छेव भ्रान्तितः।
तदिदमुक्तं। वेदवाक्यतात्पर्यात् तात्पर्याभाव गम्यते इति यस्य वेदवाक्यं तत्परं नो पात्तं विवक्षितं।
अतत्परेणानुपात्तमविवक्षितमित्यर्थः। स्यादेतत् यथा समस्तसंकल्पलादयो ब्रह्मण्युपपद्यते।

॥ब्र॥
॥८८॥

एवंशारीरेप्युपलभ्यन्ते। शारीरस्य ब्रह्मणोऽभेदात् शारीरगुणा एव मनोमयत्वादयो ब्रह्मणीत्यत आह सू
त्रकारः। अनुपपत्तेस्तु न शारीरः। यत्र द्वयोर्वास्तवम् समारोप्यधर्माः समारोपविषये संभवन्ति। ननु विषय
धर्माः समारोप्य इति। तस्येतदुत्थानं। अत्राह चोदकः। कः पुनरयं शारीरो नामेति। ननु तावद् द्वैतप्रतिषेधा
द्देहव्यपदेशाच्च भेदाद्वा एकत्र भाविको भवितुमर्हतो विशेष्याद्युक्तं। तस्मादेकमिह तावत्किं मतं। त्विकं
भेदेन तद्वे। तत्रापो वा पर्यायमभेजाद्वैतप्रतिपादनपरत्वाद्वेदान्तानां द्वैतग्राहिणां श्रमाणानां तरस्याप्यन्ना
भवेत्तद्वे। तत्रापो वा पर्यायमभेदाद्वैतमेव परमार्थः। तथा चानुपपत्तेश्चेत्याद्यसंगतार्थमित्यर्थः। परिहरति। सत्यमे
वाद्वैतार्थीद्यतेनाद्वैतमेव परमार्थः। तथा वानुपपत्तेश्चेत्याद्यसंगतार्थमित्यर्थः। परिहरति। सत्यमे
वात्मद्वार्थीद्यतेनाद्वैतमेव परमार्थः। किं त्विह देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो वालैः शारीर इत्युपचर्यते। अनाद्यवि
तत्त्व परस्यात्मा देहेन्द्रियमनोबुद्ध्युपाधि
द्यावशाज्जीवभावः परस्यात्मनः स्थितो भेदेनोपभासते। तावदेव जीवनाम विद्या। ननु निरु
द्यावच्छेदस्थ्स्थजीवभावः परस्यात्मनः स्थितो भेदेनावभासते। तावदेव जीवनाम विद्या। ननु निरु
पाधिनो ब्रह्मणः। न चाविद्यायां सत्यां जीवात्मविभागः सति च जीवात्मविभागे तदाश्रयाविद्येत्यन्योन्याश्र
यमिति सांप्रतं। अनादित्वेन जीवाविद्ययोर्बीजांकुरवदनवस्थानेरयोगात्। न च सर्वज्ञस्य सर्वशक्तेश्च
स्वतः कुतो कस्मात्संसारिता यो हि परतंत्रः सोऽन्येन बंधनागारे प्रवेश्यते न तु स्वतंत्र इति वाच्यं। न हि तत्
दागस्य जीवस्य संप्रति तनीबध्यनागारप्रवेशितापेनानुबुद्ध्येत। किं त्वियमनादिः पूर्वपूर्वकर्माविद्यासं
स्कारनिबंधनानानुयोगमर्हति। न चैतावतानीश्वरस्यानीशता। न ह्युपकरणाद्यपेक्षिता कर्तुः स्वात

ग्यावीहितंनतिनस्मा यात्किं विदेत तदपीति। विशेषादिति वक्ष्यते वैशेष्याभिधानमात्रं कृतं विशेषप्रति
पादयितुं। तथाव्यविद्याकल्पितः सुखदादिदिसंयोगोऽविद्यात्मन एव जीवस्य युज्यते। ननु निर्मुक्तनिरव
द्यविद्यातद्वासनस्य शुद्धबुद्धस्वभावस्य परमात्मनेनरत्वर्थः। शेषमतिरोहितार्थं। अस्मावरावरस्थ
त्वणात्। कण्ठवल्लीषु पठ्यते। यस्य ब्रह्म च क्षत्रं चोभे भवत नुदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र
सइति। अत्र कश्चादनीयोदनोपसेचनसूचितः कश्चिदत्ताप्रतीपते। अत्र त्वेव भोक्तृतायाः संहर्तृता
दृश्यमान। न च तस्य परमात्मनो भोक्तृतास्ति अनश्नन्नन्यो अभिचाकशीतीति भोक्तृत्वाप्रति ॥८७॥
षेधात्। जीवात्मनश्च भोक्तृताभिधानात्। तयोरन्यः पिप्पलं स्वाद्वत्तीति तत्र चेदिशोक्तृत्वं ततो
मुक्तसंशयं जीवात्मैव प्रतीपत्तव्यं ब्रह्म क्षत्रं चेत्यादिश्चास्य कार्यकारणसंघातो भोगायतन तया वासो
पाद्यासंभवति भोग्यं। अथ तु संहर्तृतानोत्कृता। ततस्तया पामभि जीवपरमात्मनां प्रश्नोपन्यासो
पलब्धेः संहर्तृत्वस्याविशेषाद्भवति संशयः। किमत्ताग्निः। आहो जीवः उत परमात्मेति। तत्रोदन
स्य भोग्यत्वे न लोके प्रसिद्धे भोक्तृत्वमेव प्रत्यमं बुद्धौ विपरिवर्तते। परमं तु संहर्तृत्वमिति भो
क्तृता। तथा च जीव एव। न आपते नाधिपतं इति वत स्येव स्मृतिः संहारकालेपि संस्कारमात्रेण

स्व ३

तस्यावस्थानात्। दुर्ज्ञानत्वं तु तस्य सूक्ष्मत्वात्। तस्माज्जीव एवात्रोपास्य इति प्राप्तं। यद्वि तु संह
र्तृत्वं तथाप्यग्निरत्ता अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां। एवं प्राप्ते अभिधीयते। अत्तात्र परमात्मा
कुतः। चराचरग्रहणात्। उभे यस्योदन इति च मृत्युर्यस्योपसेचनमिति च श्रूयते। तत्र यद्दि जी
वस्य भोगायतनं तथा तत्साधनं तथा च कार्यकारणसंघातः स्थितो न तस्यौदनः। तस्यौदनो
भोगायतनं। नापि भोगसाधनं। अपि तु भोग्यः। न च भोगायतनस्य भोगसाधनस्य वा भोग्य
त्वं मुख्यं। न चात्र मृत्युरुपसेचनं तथा कथ्यते। न [illegible] यज्जीवस्य कार्यकारणसंघातोऽत्र लक्ष्
त्रा। देरुपो ना [illegible]। [illegible] कस्यचित्क्रूरसत्वस्य व्याघ्रादेः कश्चिद्दृवेतु। ननु सर्वस्य जीवस्यांतेन ब्रह्म
क्षत्रविषयं अपि जीवस्यात्तृत्वं न व्याप्नोति। किमंग पुनर्मृत्यूपसेचनप्राप्तं चराचरं। तस्यौदनपदा
त्प्रथमावगतभोग्यत्वानुरोधेन यथासंभवमर्थं तत्र योज्य इति युक्तं। तस्यौदनपदं श्रुत्याभोग्य
त्वमाह किंतु लक्षणया न च व्याहृतापि कत्वानुरोधेन मृत्युर्यस्योपसेचनमिति च ब्रह्मक्षत्रत्वेति
श्रुतिसिद्धो यमर्थः। न च ब्रह्मक्षत्रे एवात्र विवक्षिते। मृत्यूपसेचनेन प्राणभृन्मात्रोपस्थापना
त्। प्राणिषु प्रधानत्वेन च ब्रह्मक्षत्रोपन्यासस्योपपत्तेः। अन्यनिहितेर शब्दत्वात्। अनर्थत्वा

१

स्यात्तथा तत्र शाबरसंहितेत्वं परमात्मन एव नाम्नैर्नापि जीवस्य। तथा तत्र न जायते म्रियते वा विपश्चि
दितिब्रह्मणः प्रकृतस्य महानं भाविष्यति। करत्या इवैव यत्र सद इति च दुर्ज्ञानतोपपद्यते। जीव
स्य तु सर्वलोकप्रसिद्धस्य न दुर्ज्ञानिता। तस्माद् तापरमात्मेति सिद्धं। गुहां प्रविष्टावात्मानौ हि
तद्दर्शनात्। संशयमाह। तत्रेति। पूर्वपक्षप्रयोजनमाह। यदि बुद्धिजीवाविति। सिद्धांतप्रयो
जनमाह। अथ जीवपरमात्मानाविति। औत्सर्गिकस्य मुख्यताया श्लाघ्यात्। पूर्वसिद्धांतपक्षासं
॥८८॥ भवेन पक्षांतरे कल्पयितव्य इति मत्वा नः संशयमाक्षिपति। आ आहान्ते श्रेति। अतं सत्य
मवश्यं भावीति यावत्। समाधत्ते। अत्रोच्यत इति। आध्यात्मिकाधिकारादन्यौ तावत्। तारा ॥८८॥
चरौ कल्पयितुं। तद्धि इह बुद्धेरचेतन्येन परमात्मनश्च लोकोक्त्वनिषेधेन जीवात्मैवैकः
पात। परिशिष्यत इति सृष्टी रूपदधातीति वद्धि वचनानुरोधादपि वत्सं सृष्टतां स्वार्थस्यति
वस्ततो लक्षणयन्स्वार्थमजहदितरेतरयुक्तंपि वदपि वत्सरो भवतीत्यर्थः। अस्कैवामुख्यत्वं।
तथापि न दोष इत्याह यद्वेति। स्वातंत्र्यलक्षणं हि कर्तृत्वं तच्च पातुरिव पाययितुरप्यस्तीति सो
पि कर्ता। अत एव चार्थ दुः। यः कारयति स करोत्येवेति। एवं करणस्यापि स्थातं त्र्यविवक्षया

कथंचित्कर्तृत्वं। यथा काष्ठानि पचंतीति। तस्मान्मुख्यत्वेप्यविरोध इति। तदेवं संशयं समाधाय
पूर्वपक्षं गृह्णाति। बुद्धिक्षेत्रज्ञाविति। नियंता धारयिता बुद्धिजीवसंभविनी। नहि कुंशाकव्यापि
नं मुक्ता सर्वगे परमात्मनि। न चापि वंताविति वत्प्रविष्टपदमपि छत्रिणिकं युक्तं। सति मुख्यार्थ
त्वे छत्रिणिकत्वायोगात्। बुद्धिजीवयोश्च गुहाप्रवेशोपपत्तेः। अपि च। सुकृतस्य लोक इति सत्कृ
तब्रह्मलोककथ्यवस्थाने न कर्मगोचरानतिक्रम उक्तः। बुद्धिजीवौ च कर्मगोचरमनतिक्रांतौ।
जीवो हि भोक्ता यथा बुद्धिस्तु भोगसाधनं तथा धर्मस्य गोचरे स्थितौ। न तु ब्रह्मणस्तस्य पदार्थत्वा
त्। किंच छायातपाविति तमःप्रकाशावुक्तौ। न च जीवः परमात्मनोऽन्ते तमःप्रकाशरू
पत्वात्। बुद्धिक्षेत्रज्ञयोस्तम इति शक्यं वक्तुं। तस्माद्बुद्धिजीवावत्रैव कथ्येते इति। तत्रापि प्रेते
विचिकित्सायामनुष्ये बुद्धेर्भेदेन परलोकी जीवो दर्शनीय इति बुद्धिरुच्यते। एवं प्राप्ते निर्धीयते।
आत्मानावनेन जीवात्मानौ निश्चितौ स्याद्द्वितीयत्वात्। ब्रह्मणो च स्वरूपेण न तु बुद्ध्या विरूपया। प्रथमं स
द्वितीय... पत्वे ब्रह्मण्यवगते सति। गुहाश्रयत्वं चरमं व्याख्येयमविरोधात्। गौः सद्वितीये

त्मकौ सजातीयेनैव गवान्तरेणावगम्यते ननु विजातीयेनाश्वादिना। तदिह चेतनो जीवः स
रूपेण चेतनान्तरेणैव ब्रह्मणा सद्वितीयः प्रतीयते न त्वचेतनेन प्रातिरूप्या बुद्ध्या। तदेवं ऋतं पि
बन्ताविति मन्त्रप्रत्ययमवगतेऽपि ब्रह्मणि तदनुरोधेन चरमं गुहाश्रयत्वं श्रा ब्धग्रामे हारीरि
ति वक्ष्यामः। न हि कृत्स्नं हि गुहाश्रयत्वं ब्रह्मणः श्रुतपञ्चादु॥ तदिदमुक्तं तद्दर्शनादिति
तस्य ब्रह्मणो गुहाश्रयत्वस्य श्रुतिषु दर्शनादिति। एवं प्रथमावगतब्रह्मानुरोधेन तु कृतत्वो
कवर्तित्वमपि तस्य छत्रन्यायवच्छत्रिन्यायेन गमयितव्यं। छायातपत्वमपि जीवस्यापि ह्यात्रय
॥८९॥ तया ब्रह्मणश्च शुद्धप्रकाशस्वभावस्य तदनाश्रयतया मन्तव्यं। इममेव न्यायं द्वासुपर्णेत्यत्रापि सु ॥८९॥
दाहरणीकृत्य चिंतयिष्यति। एवं च वन्त्या यदीति अत्रापि किं बुद्धिजीवौ उत जीवपरमात्मानौ
विति संशयप्रकरणतः पापा बुद्धेरेव तौ लिप्संती। तिचकर्तृत्वोपचारात् बुद्धिजीवाविह पूर्वपक्षे
सिद्धान्ते सिद्धान्तयितव्यं। सिद्धान्ते तु भाष्यकृता स्फोरिताः। तद्दर्शनादितन्त्रमीने द्वे पुरुषावभिमत
इत्यत्र मन्त्रे ... न च बुद्धेरेव कर्तृत्वे संभवति करणे कर्तृत्वोपचारे सुकर इति। कृत्वा चिंतामुद्घाटयति।
सत्यत्वं बुद्धेः। शंकते। सत्वेतौ पश्यति। सिद्धान्तार्थं ब्राह्मणं व्याचष्टे इत्यर्थः। निराकरोति। तन्नेति।

चैतन्यमप्रत्ययतीति। येनेतिकरणमुपदिशति। ततश्चाजिज्ञासकमेरं स्नत्रलोयं शारीर उपद्रष्टेति।
अस्मिंस्तन्त्रे स्वाधिकरणस्य पूर्वपक्षस्यैव प्रा प्रमाणार्थः। वचनविरोधे न्यायस्याभासत्वा। दि
त्यत आह। नास्यपूर्वपक्षं भजत इति। एवं हि पूर्वपक्षमस्य भजेत् यदि हि क्षेत्रज्ञे संसारिणि प
र्यवस्येत् तस्यतु ब्रह्मरूपतायां पर्यवस्यन्नपूर्वपक्षमपि स्वीकरोतीत्यर्थः। अपिच। न वेतोऽसत्व
हेत्वन्तो न दुवा एवं विदि किंचन रज आध्वंसत इति रजोऽविद्या। नाध्वंसनमेवं विदि करोतीत्येताव
तैव विद्योपसंहाराज्जीवब्रह्मात्मपरतास्यवच्छेपत इत्याह तावता चेति। बोद्दृ पति। कथं पुनरिति। शारी
र इति। उच्यते। नैयं प्रकृतिरिति। अनश्च जीवो ब्रह्माऽभिन्नाकरोतीत्युक्ते शंक्यते। यदि जीवो ब्रह्म—
त्मानाभाति। क नतर्ये स्मिंस्तौ कृत्वावगमः। चैतन्यसमानाधिकरणप्रोक्तत्वमवभासत इति तन्नि
ष्प्रत्ययमाह प्रकृतिः। तयो ऽस्यादितीति। एतदुक्तं भवति। नेदं औपाधिकत्वं जीवस्य तत्त्वतः अपि
तु बुद्धिसत्त्वसुखादिरूपपरिणतबिंबिच्छायापत्त्याऽपपन्नचैतन्यमिव युक्ते। ननुचनचनो जीवः
मापयुक्ते। तदेतत्संदेहे स भाष्ये कृतव्याख्यानं। तदनेन कृत्वाविंतो द्घाटितो। अन्तर उपपत्तेः।
नन्वन्तस्यद्धिमोपदेशादित्यनेनैव तद्गतार्थः। संति रवच्छत्राप्यमृतत्वाद्द्योपसंहितब्रह्मधर्माः प्रतिबिं

जीवदेवतात्वस्य संभविनः । तस्माद्ब्रह्मधर्मोपदेशाद्ब्रह्मैवात्र विवक्षितं । साक्षाच्छ्रुत्या ब्रह्मश
ब्दोपादानात् उच्यते । एवं तर्हि पुंस्त्वेन रूपेण त्वं प्रयुज्यते । परोक्षं ब्रह्म न तथा प्रतीति
हेतुमुपन्यस्यते । उपक्रमवशात्पूर्वमितरेषां द्विवर्णनं । कृतं न्यायेन तथा निवसन् स्वच्छत्वानुपपद्यते ॥
कुम्भविधिं ताविल्स्य ... जीव परमात्मनौ अप्यभावगता वेति तद्धेतु रोधेन गुहाप्रवेशाद्दयः
पञ्च ... गता व्याख्याताः । न द्वावि ... पिण्ड एवोक्तिं पुरुषो दृश्यत इति प्रत्यक्षाभिधानाच्च ।
अप्यममवगलत्वे ... पुरुषे तदनुरोधेनामृतत्वात् ... कथं ... तत्र आ
तत्त्वकृतीयस्य लक्षणावस्थानात् । असमत्वमचेतनत्वात् । पुरुषत्वं पुरुषाकारत्वात् । आत्मत्वं ॥ए०॥
॥ए०॥ कर्मनिकायानां आपन्नानां । ब्रह्मरूपत्वमुक्तरूपाभृतत्वाद्दिषोगात् । एयवाभनीत्वाद पोप्यस्तोत्रं
कथं निर्जितः । कवश्चांवेत्याद्दिनु वाक्यमग्नीनां नात्वार्यवाक्यं निपंतुमर्हति । आचार्यस्तु नेयति
वक्तेति गत्यंतु शास्त्रिप्रायं । ननु रूपाद्रि ... ब्रह्माभिप्रायं । तस्माच्छायापुरुषस्य वाऽयोपास्य इति पूर्वः
क्षः संभवमात्रेण तु जीवदेवते उपन्यस्ते । बाधकांतरोपदर्शनाय च । स्वदृश्यत इत्यस्याभा
वात् । अन्तस्तद्धर्मोपदेशादित्यनेन निराकृतत्वात् । एवं प्राप्त उच्यते । य एष इति । अनिष्पन्नाभिधाने

द्वैस वैनाम पदेसती। प्राप्य संनिहितस्यार्थे वे तामासि धा तणी। संनिहिताश्च पुरुषात्मादित्र।
द्वात्रे व न या य स्यार्थमाणि दृश्यति। तावत्सर्वं नाम श्यां नार्थे नुयो प्याति धीयतइति कुत स्तदर्थस्या
परोक्षता पुरुषात्मत्रा द्वैतं सर्वं नाम। निरपेक्षोस्यरस्तनो जीवे वा परमात्मनि यावर्त्तेते इति। नच
तणेश्च तीर्णि प्रसन्तदृशं नभिति। निरपेक्षपुरुषपदप्रसमर्पितार्थानुरोधेन यरवरति चहरमतर
ति सयस्या संसवं व्याख्येयं। व्याख्यातं च। सिद्धवदुपदानं शास्त्रार्थोपेत्तं विद्वद्विषयपरोक्षार्थं।
विदुषः शास्त्रतत्त्व छुविरेव परोक्षापि दृष्टतमात्म्यत्वक्रुवदुपचर्यते प्रशंसार्थमित्यर्थः
[illegible] तदेवदरमंप्रत्यमानुगुणातयानीपतेयन्नेतुंशक्यं। अत एव। रहत्वमृतत्वाद्यो वहव
[illegible] क्याश्च नेतुं। नहि स्यसताल्लुणावस्छानमात्रममृतत्वं भवति। तथा सति किं नाम नामृतं
[illegible] दिति व्यर्थममृतपदं। अमातये आपि चेतनधर्मौ नाचेतने संभवतः। एवं वाम नीत्वादयो
[illegible] ब्रह्मणो न तु मृशकयाः प्रत्यक्तमपदेशश्चोपपादितः। तदिदमुक्तं उपपत्तेरिति। एतदमृत
मभयमेतद्ब्रह्मेत्यक्तेस्यादृशंका। ननु सर्वगतस्येश्वरस्य कस्मात् द्विशेषेण वक्ष्करेव स्थानमु
पादिश्यत इति। तत्परिहरति स्मृतेः। नद्यद्यप्यस्मिन्सर्वोपर्विवोदकं वासि नंति वर्त्मनीएव गच्छतीति

वात[illegible]

वर्त्मनीपक्ष्मस्थाने। एतदुक्तं भवति॥ निर्लेपस्येश्वरस्य। निर्लेपं चक्षुरेव स्थानमनुरूपमिति।
तदिदमुक्तं। तथा परमेश्वरानुरूपमिति। संयद्वामादिगुणोपदेशश्च तस्मिन्नवकल्पते।
घटते। समवेतार्थत्वात्। ॐ प्रतिविवादिषु तु असमवेतार्थः वननीयो। नि संभजनीयानि। शोभ
नानि। पुण्यफलानि वामानि। संयंति संगच्छमानानि यामन्यनेनेति संयद्वामः परमात्मा। तत्का
रणत्वात्पुण्यफलोत्पत्तेः। तेन पुण्यफलानि संगच्छंते। स एव पुण्यफलानि वामानि नयति लोक
॥५१॥ मिति वामनीः। एष उ एव भामनीः। भामानि भानानि तानि नयति लोकमिति भामनीः। तदुक्तं श्रु
त्या तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। स्थानादिव्यपदेशाच्च। आशं ॥५१॥
कोत्तरमिदं सूत्रं। आशंकामाहो कथं पुनरिति। स्थानिनो हि स्थानं महद्दृष्टं। यथा यांद्रसा[illegible]ः।
तत्कथमल्पमक्षं वक्ष्यरोधिस्थानं परमात्मनः परममहत इति शंकार्थः। परिहरति। अत्रोच्यतइ
ति। स्थानान्यादयो येषां ते स्थानादयः नामरूपप्रकारास्तेषां व्यपदेशात्। सर्वगतस्यैकस्था
ननियमो नावकल्पते। न तु नानास्थानत्वं। नभसइव नानासूचीपाशादिस्थानत्वं। विशेषतश्च
ब्रह्मणस्तानि तान्युपासनास्थानानीति तैरस्य युक्तो व्यपदेशः। अपि वा प्रकृतानुसारादपि ब्र

सैवात्र प्रत्येतव्यं। ननु प्रतिबिंबजीवदेवतारत्वात् ह सूत्रकारः सुखविशिष्टाभिधानादेव च॥
एवं खलु पाख्यायते। उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्या
चार्यस्य ह द्वादश वार्षाण्यग्नीनुपचचार स ह स्म आचार्योऽन्यान्ब्रह्मचारिणः स्वाध्याय पंच वाऽपि
त्वा समावर्तयामास तमेवैकमुपकोसलं न समावर्तयाति स्म जाया वावत त्समावर्तनाय पाऽर्थितो
पि तत्र न तमवधीर्य्याचार्यः प्रोषितवान्। ततोति दूनमानसमाग्निपरिवरणकुशलमुपकोसलं स्त्रे
तत्र योग्यायः वरुणापराधीनचेतसः श्रद्धानापोसमेहृदकाकपैसमेत्य ब्रह्मविद्यामूचिरे प्राणो ब्र
ह्म कं ब्रह्म खं ब्रह्मेति। अथोपकोसलस्तु वाव विजानाम्यहं प्राणो ब्रह्मेति। सा हि सूत्रात्माविभूतिमत
या ब्रह्मरूपाविर्भावाद्ब्रह्मेति। कं च नु खं च ब्रह्मेत्येतन्न विजानामीति। न हि विषयेंद्रियसंपर्क
जन्यं सुखमनित्यं लोके सिद्धं खं च भूताकाशमचेतनं ब्रह्म भवितुमर्हतीति। अथैनमग्नयः प्रत्यू
चुः यद्वाव कं तदेव खं यदेव खं तदेव कमिति। एवं संभूयोक्ताऽग्नयो लोकं च स्वविषयां विद्यामूचुः॥
प्राचिव्यग्निरन्नमादित्य इत्यादिना। पुनस्त एवं संभूयोचुः। एषा सोम्य ते स्मद्विद्या प्रत्येकमुक्तास्य
विषया आविद्या। आत्मविद्या चास्माभिः संभूय पूर्वमुक्ता। प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति। आ

वार्यस्क्तेने गतिं वक्ता ब्रह्मविद्येममुक्तास्मान्निर्गतिमात्रत्वं वाशिष्टं नोक्तं। तत्र विद्याफलप्राप्तये
ज्ञावाल्लस्तवा योवीवक्ष्यतीत्युक्तोऽध्याय उपरेमिरे। एवमवस्थिते यद्भाष्यकं तदेव रवं तदेके
मिन्नोत ह्यावष्टे भाष्यकारः। तत्र रवं शब्द इति। प्रतीकाभिप्रायेणेति। आश्रयांतरप्रसंगस्याप्र
यांतरे क्षेपः प्रतीकः। पथ्या ब्रह्मशब्दः परमात्मविषयो नामादिषु प्रयुज्यते। इदमेव तद्ब्रह्मत्वं ते
यं यन्नामोति। तथेदमेव तद्ब्रह्म यदुक्तानाशामिति स्यात्। नवैनत्प्रतीकत्वमिष्टं छो। किं कस्य
रवस्यसाधनपारतंत्र्यं पिच्छ तावाम्रयस्त्वेनसह वर्तत इति साम्यं मुखं तदेवं स्वातिरे
॥८२॥ समुदकोभया त्वेयगुणमाह। इतरेतरविशेषितत्वेति। तदर्थमोर्विशेषितत्वाच्छ्रुत्वापिवि
लाबुध्यते। मुखशब्दसमानाधिकरणो हि रवंशब्दे भूताकाशमर्थपरित्यज्य ब्रह्मणि ॥८२॥
ितुणयोगे न वर्तते। तादृशावस्थेन सुखं विशिष्टप्रमाणं साम्यपाद्याद्वृत्तं निरामयं भवति।
तस्मादुपपन्नमुक्तपोषादानं। ब्रह्मशब्दस्यास्य प्रयोजनमाह। तत्र द्वितीय इति। ब्रह्मदृष्टेः कं
पदस्योपरि प्रयुज्यमानं शिरः। एवं रवं पदस्यापि ब्रह्मपदं शिरोरूपयोः कं रवं पदयोस्ते ब्रह्मशिरसी।
तयोर्भावो ब्रह्मशिरस्त्व। अस्कप्रस्कने। किमापातमिस्पतेत्याह। तदेवं वाक्योपक्रम इति। नन्व

ग्निभिः पूर्वं निर्दिश्यतां ब्रह्म यच्चोक्तिणीत्वाचार्यवाक्येऽपि तद्देवानुवर्तनीयमिति नु कुतद्वत्य
नआह। आचार्यस्तु ते गतिं वक्तेति वगतिमात्राभिधानामिति। यद्यप्येतत्प्येते भिन्नवत्कृणीवाक्ये
तथापि पूर्वेण वाक्ये एकवाक्यतां गमितो। गतिमात्राभिधानात्। किमुक्तं भवति। तुभ्यं ब्रह्मवि
द्यास्माभिस्त्यादृष्टा तद्विदस्के गतिं नो। कान्तां वा किं विद्दधि कमाध्येयं पूरयित्वाऽचार्ये वक्ष्यन्तीं।
तद्देनेनपूर्वा संवंहाचार्यमर विवक्षा वारितेति। अयैवमाग्निभिरुपदिष्टे प्रोषित आचार्यः
छन्नाजगाम। आगतश्च दीप्योपकोशलमुवाच। ब्रह्मविद इव ते मुखं प्रसन्नं भाति। कोनुत्वा
मनुशशासेति। उपकोसलस्त्वग्नीणोक्तीतश्च कोनुमानुशिष्यात् भगवस्त्वयि प्रोषिते त्वपीत्यापात
तोयतापुनिर्वध्यमानो यथावृद्धभीनामनुशासनमवोचत्। तदुपश्रुत्याचार्यः सुचिरं क्लिष्टे
अपकोशलस्मुपजातदृष्टोऽहं दयः प्रत्युवाच। सोम्य। किल तु मध्यं योन ब्रह्मस्याकल्येनावोचत्।
तद्दहं तुभ्यं साकल्येन वक्ष्यामि। यद्दनुजवमाहात्म्याद्यथा पुष्करपलाशे आपो नास्ति श्लिष्यं
त एवमेवंविदि पापं कर्म्म न श्लिष्यत इति। एवमुक्तवत्याचार्य आहोपकोशलः। ब्रवीतु मे
भगवानिति। तस्मै होवाचाचार्यो विशदार्थिकां गतिं वक्तुमना यदुक्तमग्निभिः प्राणो ब्रह्म कं ब्रह्म

स्वं ब्रह्मेति तत्पूरणाय य एषोऽक्षिणि पुरुषो दृश्यत इत्यादिः एतदुक्तं भवत्याचार्येणाप्य सुखं ब्र
ह्माक्षिस्थानं संयद्वाम वामनी भामनी त्येवं गुणकं प्राणसहितमुपासते ते सर्वेऽप्यन्त्या
ष्टिकर्म कुर्वन्तु मा वा कार्षुः। अर्चिषमभिविशंती मानिनीं देवतामभिसंभवंतीति प्रतिप
द्यंते। अर्चिषोऽहः अह्नो देवतां अह्न आपूर्यमाणपक्षं शुक्लपक्षदेवतां। ततः षण्मासान्येषु
मासेषूदङ्ङेत्यादित्य शमेति सविता तेण्मासानुत्तरायणं। तद्देवतां प्रतिपद्यंते। तेभ्यो मासेभ्यः संव
॥५॥ त्सरं देवतां ततः आदित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं। तत्र स्थितान् तान्पुरुषः कश्चिद्ब्रह्मलोका
[illegible]र्या मानवोऽमानव्यां सृष्टौ भवो ब्रह्मलोकभव इति यावत् स तादृशः पुरुष एतान्सत्यं ॥५॥
लोकस्थं कार्यं ब्रह्म गमयति। स एष देवपथः देवैरर्चिरादिभिर्नेतृभिरुपलक्षित इति देवपथः
स एव ब्रह्मणा गंतव्येनोपलक्षित इति ब्रह्मपथः। एतेन पथा प्रतिपद्यमानाः सत्यलोकस्थं
ब्रह्म इमं मानवं मनोः सर्गं। किंभूतं आवर्तं। जन्मजरामरणपौनःपुण्यमावृत्तिः तत्कर्ता आव
र्तो मानवो लोकः तं नावर्तंते। तथा च स्मृतिः। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते
कृतात्मानः प्रविशंति परं पदं॥ तदनेनोपाख्यानव्याख्यानेन श्रुतोपनिषत्कगत्यभिधाना

चेत्यपि सूत्रं व्याख्यातं। अनवस्थितेरसंभवाच्च नेतरः। यएषोक्षिणीति निस्यवत् श्रुतं आनि
त्यछायापुरुषे नावकल्पते। कस्मना गौरवं चास्मिन्य ह्ये प्रसज्यत इत्याह हे। न च उपासनका
छरति। तथापि ज्ञानात्मनो हि न प्रदेशे उपासना ऽन्यत्र दृष्टचरा प्रलणश्रुत तत्र तत्र श्रुतपूर्वे त्यर्थः।
तीपाविमां। अस्माद्रूपणः श्रोषप्रतिरोहितार्थे। अंतर्या[illegible]धिदैवादिषु तद्धर्मव्यपदेशात्।
[illegible]पाद्भिर्तिं देहं तेनान्यच्च नियच्छति। तस्मादि शरीरस्कोनात्मांतर्यामि ह तां सज्जेत्। प्रकृती
[illegible]मच्छक्षणं हि कार्यचेतनस्य शरीरे। द्वियादौ वा शरीरेण वा वा इत्यादौ दृष्टं नाशरीरस्यप्र-
ज्ञगोभ विबुमर्हति। नाहि ज्ञानुवयांकुरः कुरज्ञबीजाज्जायते। न दृतेन ज्ञन्माद्यस्य यतरत्येत
तस्याज्ञिमं वेदितव्यं। तस्मात्परमात्मनः शरीरेंद्रियादिरहितस्यांतर्यामिता या असंभवात्।
[illegible] नस्य वा पृथिव्याद्यभिमानवत्ता वा देवतामा आणिमाद्यैश्वर्ययोगिनो वा योगिनो जीवो
त्मनो वांऽतर्यामितास्यात्। तन्न यद्यपि प्रधानस्यादृष्टत्वाश्रुतत्वामतत्वाविज्ञातत्वानि संति
तथापि तस्माचेतनस्य द्रष्टृत्वश्रोतृत्वविज्ञातृत्वानां श्रुतानामभावात्। अनात्मत्वाद्येषत आत्मे
ति श्रुतेरनुपपत्तेः न प्रधानस्यांतर्यामिता। यद्यपि पृथिव्याद्यभिमानिनो देवस्यात्मत्वमस्ति।

अदृष्टत्वाद्यपश्च सहद्रष्टृत्वादित्यनुपपद्यन्ते। शरीरेंद्रियादियोगश्च सृष्ट्यादिष्वेवमप्यस्याय
तनमात्रिलोकोमनोस्मीतिरित्यादिश्रुतेः। तथापि तस्य प्रातिनियतधर्मान्नाद्यः सर्वलोकानं
तरोपमयति यः सर्वाणि भूतान्यंतरो यमयतीति श्रुतिविरोधादनुपपन्नेः। योगीनुपद्यपि लोक
कृतवाशितया सर्वलोकात्सर्वाणि भूतानि नियंतुमर्हति। तत्र तत्रानेकविधदेहेंद्रियादिनिर्मा
णेन सह केवलाभवतीति विधानवतीत्यादिश्रुतिभ्यः। तथापि जगद्व्यापारवर्जं प्रकरणादिति व्यस्य
प्राणेन न्यायेन। विकारविषयेविद्यासिद्धानां व्यापाराभावात्सोपि नांतर्यामी। तस्मात्सारिशोष्या
॥४६॥ स्याज्जीव एव चेतनो देहेंद्रियादिमान्द्रष्टृत्वादिसंपन्नः स्वपमदृश्यादिः स्वात्मानि वृत्तिविरो ॥४६॥
धः दृष्टतः स्वदेहनाशोपनाशनात्। अन्यथा मुक्तिकफलोपयोगाभावेन कृतविप्रणाशाकृता
भ्यागमप्रसंगात्। आत्मनितिष्ठन्नित्यादिवाक्ये देहेपि कल्पं विदेहोपचारात्सजवर्गः कस्मिन्प्रति
ष्ठितः स्वे महिम्नीतिवत्। यमात्मा न वेदेति च स्यात्मनिष्ठत्वविरोधान्निप्रायं पस्यात्मा शरीरमि
त्यादिर्य स वै स्वे महिम्नीति वद्योऽन्तरीयं यदि पुनरात्मनोपि नियंतुरन्योनियंता भवेत् वेदिता
वातत्तस्याप्यन्यदित्यनवस्था स्यात्। सर्वलोककृतनियंतृत्वं च जीवस्यादृष्टद्वारा। तदु

पार्जितौ हि धर्माधर्मौ नियच्छतस्तस्य न पाद्द्वारा जीवो नियच्छति । एकश्च वनं च ज्ञात्वा प्राप्यं
तस्मा जीवात्मैवान्तर्यामीन परमात्मेति । एवं प्राप्ते निधीयते । देहेन्द्रियादिनियमेनास्य देहेन्द्रि
यान्तरान्तःकर्मोपार्जितं तच्चेतद्विद्यार्जितं जगत् । श्रुतिस्मृतीतिहासपुराणेषु तावद्दत्र भ
वतः सर्वं तस्य सर्वशक्तेः परमेश्वरस्य जगद्योनित्वमवगम्यते । न तत्पृथग्जनसाधारण्यानुमा
नात्मेनाममाविरोधिना शक्यमङ्गीकर्तुं । तथा च सर्वे विकारजातं तद्विद्यात्मकं परिणामः तस्य शरी
रं इन्द्रियादिस्थाने वर्ततइति यथा यत्र पृथिव्यादिदेवतादिकार्यकरणे स्थानेव पृथिव्यादिदेवताक्षीय
न्तत्कोतिनियन्तुं । भवान वस्थानहि नियन्त्रं तरं तेन नियम्यते । किं तु यो जीवो नियन्ता श्लोकासिद्धः स
परमात्मैवोपाध्यवच्छेदकाच्छिन्नभेदः तथा ख्याते पैरत्यसन्तवैदविदितं । न स्कुतो नियन्त्रं तरं कु
तश्चान [illegible] । तथाद [illegible] लान्यो लोकोद्विष्टेत्याद्यापि श्रुतयः पपन्नार्थाः । परमार्थतो न्तर्यामि पो
ऽस्यस्य जीवात्मनोद्दष्टस्या [illegible] विद्याकल्पित जीवपरमात्मनोः हाश्रयात्स्कृता हृदेयके [illegible]
स्य प्रत्यक्षादीनि प्रमाणानि संसारानुभवो विधिनिषेधाशास्त्राणि तः एवं साधिदेवादिश्च कस्मै
वान्तर्यामिणः प्रत्यक्तिस्नानं समञ्जसं भवति यः सर्वेषु लोकान्यः सर्वाणि च भूतानी त्यत्र यस्त्वेक

वचनमुपपद्यते। अमृतत्वंच परात्मनिसंभवंजसं नान्यत्र। यआत्मनितिष्ठन्नित्यादावप्येद्देपि तद्देप
चारकेणैन व्याविष्यति। तस्मात्परमात्मांतर्यामी नजीवादिरितिसिद्धं। पृथिव्यादिरत्नपित्वतम
धिदैवं यः सर्वलोकेष्वित्यधिलोकं। सर्वेषुवेदेष्वित्यधिवेदं यः सर्वेषु यज्ञेष्वित्यधियज्ञं यः सर्वेषु
भूतेष्वित्यधिभूतं यः प्राणाद्यात्मा तमध्यात्मं। संज्ञाया अप्रसिद्धत्वादित्युपक्रममात्रं पूर्वपक्षः द
र्शनादिक्रियायाः कर्तरि प्रवृत्तिविरोधात्कर्तरि आत्मनिवृत्तिविरोधादित्यर्थः। अदृश्यत्वादिगुणको ॥[illegible]
॥[illegible]॥ धर्मोक्तेः। अध्यपशमयात दक्षरमधिगम्यते। यत्तदद्रेश्यं बुद्धीन्द्रियाविषयः। अग्राह्यं कर्मेंद्रियागो ॥९५॥
॥९५॥ चरः। अगोत्रं कारणरहितं। अवर्णं ब्राह्मणत्वादिनैर्हीनं। कवलमिंद्रियाणामविषयः इंद्रियाण्य
प्यस्यनसंतीत्याह। अचक्षुःश्रोत्रमिति बुद्धीन्द्रियाण्युपलक्षयति। अपाणिपादमिति कर्मेंद्रिया
णि। नित्यं विभुं प्रभुं। सर्वगतं सुसूक्ष्मं दुर्विज्ञानत्वात्। स्यादेतत्। नित्यं सत् किं परिणामि नित्यमित्याह।
अव्ययं कूटस्थनित्यमित्यर्थः। परिणामो विवर्तो वा स्वरूपस्योपलभ्यते। विवर्तमनानुसारूप्यं जडा
नानोपपद्यते। जडं प्रधानमेवातो जगद्योनिः प्रतीयतां। योनिशब्दो निमित्तं चेत्कुतो जीवनिराक्रिया।
परिणाममानसरूपाए वा हि परिणाम प्राहुस्तां यथोर्णनाभिलालां परिणामतोमा भूतानतवरत्मस

रूपाः। तथापि विवर्त्ता अपि विवर्त्तमानसरूपा एव न विरूपाः यथा रज्जुविवर्त्तो धीरोगौरेदयोर रज्जुसरूपा
न जातु रज्ज्वाकुर इति विपर्ययस्यात्। नच हेमापि तु परिणामो भवति भूतानां तु। तदेकस्य हेतोः। असं
तचैतद्रूप्यात्। तस्मात्प्रधानमेवं जडं जडस्य जगतो योनिरिति प्रयुज्यते। स्वविकारानक्षरइति
तद्दर्शनाद्यः सर्वविदिति वाक्षरात्परस्याख्यानं। अक्षरात्परतः पर इति श्रुतेः। नाहि परस्मा।
द्यात्मनोऽर्वाग्विकारजातं सर्वपरत्वात्तथा नाहते ऽन्यदक्षरे संभवति। अतः प्रधानात्परतः
परमात्मा सर्ववित्। भूतयोनिरप्यक्षरं संभवति। अतः प्रधानात्परतः परमात्मा सर्ववित्। भूतयो
निरप्यक्षरं प्रधानमेव तच्च सांख्यानामतमेवास्तु। अन्यतस्याप्रामाणिकत्वान्न तत्र परितुष्य
ति। अस्तु तर्हि नामरवीनं। न तद्वच्छु जडमानि वाच्यमानि वस्य स्य जडस्यानामरूपप्रपंचस्योपा
दानं युज्यते सारूप्यात्। न गुंग्गु विद्वात्मा निर्वाच्यो विरूपो हि सः। अचेतनानामिति भाष्यस्यापू
प्यप्रतिपादनपरंस्यादेतत्। स्मान्न प्रधाननिराकरणेनैवैतदपि निराकृतप्रायं। न कुतोस्य शंकेत्यं
तआह अपिच पूर्वत्रादृष्टत्वादीति। स्मातिवाधकेऽस्यानाश्रयणं। इह तु बाधकं नास्तीत्यर्थः। तेन
तदैक्ष्यतेस्यायौदावुपलक्ष्यं तां ब्रह्मणो जगद्योनितां विद्याशक्त्या श्रयत्येनोरहत्य विद्याशक्तेरेव

जगद्यो। नित्यसंस्रवेन द्वारो द्वारिका। चोयुक्त इति प्रधानमेवात्र वाक्ये जगद्योनिरुच्यत इति पूर्वपक्षः।
अप्ययोनिशब्दो निमित्तकारणपरः तथापि ब्रह्मैव निमित्तं ननु जीवात्मेति विनिगमनाया नहे
तुरस्तीति ~~[illegible]~~ नसंशयेन पूर्वपक्षः। अत्रोच्यते। २ अक्षरस्यैव जगद्योनित्वमुक्तात्वनं
तरं। यः सर्वज्ञ इति श्रुत्या सर्वज्ञस्य स उच्यते। तेन निर्दिष्टसामान्यात्प्रत्यभिज्ञानतः स्फुटं। अक्ष
रं सर्ववित्विश्वयोनि। नो चेतनं स्रवेत्। अक्षरात्परतः इति श्रुतिरव्याकृते मता। अस्मिन्तेप
स्येकार्याणि ततो व्याकृतमक्षरं। नेह तिरोहितमिवास्ति किंचित्। यत्तु सारूप्याभावान्न विद्वा
[illegible] परिणामः प्रपंच इति श्रद्धा। विवर्तस्य प्रपंचोयं ब्रह्मणो परिणामिनः। अनादिवासनो
[illegible] सारूप्यमपेक्ष्यते। न च खलु वाच्यसारूप्यनिबंधन एव सर्वोपि विभ्रम इति। नियमानिमित्तं
[illegible] मास्ति। आनरादपि कामक्रोधभयोन्मादस्वप्नादेर्मनसादपचारात्सारूप्यानपेक्षा तस्य तस्य
विभ्रमस्य दर्शनात्। अपिच। हेतुमति विभ्रमे तदभावादनुयोगो युज्यते। अनाद्यविद्यातद्वा
सनाश्रवाहमिति तस्याननुयोगमर्हति। तस्मात्परमात्मविवर्ततया प्रपंचस्तद्योनिः भुजंगरव
रज्जुविवर्ततयात्तद्योनिः। न तु तत्परिणामतया। तस्मात्तद्धर्मतया सर्वज्ञत्वोक्ता लिंगात्प

त्तद्द्रष्टव्यमित्यत्र ब्रह्मैवोपदिश्यते ज्ञेयत्वेन न तु प्रधानं जीवात्मा वा उपास्यत्वेनेति सिद्धं। न केव
लं लिंगात्। अपि तु प्रश्नविद्येति समाख्यानादृश्यैतदेव प्रतिपत्तव्यमित्याह। अपि च द्वे विद्ये इति।
लिंगान्तरमाह। कस्मिन्नु भगव इति। भोगभोग्यास्तेभ्यो व्यतिरिक्तो लोकारि। अयच्छिन्नो हि जी
वात्मा भोग्येभ्यो विषयेभ्यो व्यतिरिक्त इति तज्ज्ञानेन न सर्वं ज्ञातं भवति। समाख्यान्तरमाह। अ
...न्य ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामिति। प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशेति। प्लवन्ते
ऽनेनेति अस्थायिन इति प्लवाः। अत एवादृढाः केते यज्ञरूपाः। रूप्यतेऽनेनेति रूपं यज्ञो रूपमुपा
धिर्येषां ते यज्ञरूपाः। तत्र षोडशर्त्विजः। क्रतुयज्ञेनोपाधिनाऽत्र। ऋत्विक्शब्दः प्रवृत्त इति
प्रज्ञोपाधय ऋत्विजः। एवं यजमानोपि यज्ञोपाधय ऋत्विजः। एवं यजमानोपि यज्ञोपाधि
रेव। एवं पत्नी पत्युर्नो यज्ञसंयोग इति स्मरणात्। न च तेष्टादशाय ज्ञरूपा येषु ऋत्विगादिषू
क्तं कर्म यज्ञः यज्ञश्रयोयज्ञ इत्यर्थः। तच्च कर्मावरं। स्वर्गाद्यवरफलत्वात्। अपि यन्ति प्राप्नुव
न्ति। नाहि दृष्टान्तराष्टांति कर्मारिष्टत्फका। निप्रायां। विशेषणभेदव्यपदेशाभ्यां च नेतरौ॥ विशेष

मूर्द्धादि समस्तभावमुपलीढं दिद्रूपाम्नायते। यस्त्वेतमेवं आदेशमात्रमाभिविमानमिति। सस
र्वेषु लोकेषु सूक्ष्मप्रभृतिषु भूतेषु स्थावजंगमेषु सर्वेष्वात्मसु देहेंद्रियमनोबुद्धिजीवेष्व
न्नमत्ति सर्वसंबंधिफलमाप्नोतीत्यर्थः। अथास्य वैश्वानरस्य भोक्तुर्भोजनस्याग्निहोत्रता
संपिपादयिषयाह श्रुतिः उर एव वेदिः वेदिसारूप्यात्। लोमानि बर्हिः आस्तीर्णबर्हिःसारूप्या
त्। हृदयं गार्हपत्यः। हृदयानंतरं मनोत्वाहार्यपचनः आस्यमाहवनीयः। तत्राहितदन्नं
हूयते ननु कोन आत्मा किं ब्रह्मेत्युपक्रमे आत्मब्रह्मशब्दयोः परमात्मनि रूढत्वेन तद्रू
॥५८॥ परत्वावगमाद्वैश्वानराग्न्यादिपरशब्दास्तदनुरोधेन परमात्मन्येव कथंचिन्नेतुं युज्यंते। ॥५८॥
॥९८ ननु प्रथमावगतौ ब्रह्मात्मशब्दौ नश्रमावगतवैश्वानरादिपदानुरोधेनान्यथयितुं युज्ये ९८
ते। यद्यपि वाजसनेयिनां वैश्वानरविद्योपक्रमे वैश्वानरं ह वै भगवान्त्संप्रति वेदतं नो ब्रूहि
इत्यत्र नात्मब्रह्मशब्दौ स्तः तथापि तत्समानार्थं छांदोग्यवाक्यं तदुपक्रममिति तेने
निश्चितार्थेन तद्विरोधेन वाजसनेयिवाक्यार्थो निश्चीयते। निश्चितार्थेन ह्यनिश्चितार्थ
व्यवस्थाप्यते नानिश्चितार्थेन निश्चितार्थः। कर्मवच्च ब्रह्म सर्वशाखाप्रत्ययमेकमेव। ननु यु

णं हेतुं व्याचष्टे। विशीनष्टीति। शारीरादि त्वपलब्ध्या णं प्रधानादि ह. त्यपि द्रष्टव्यं। भेदव्यपदे
शं व्याचष्टे। तथाप्रधानादपीति। स्यादेतत्। किमागमिकसंख्यासिमतं प्रधानं। तथाचवक्त
समसंजसत्यादित्यत आह। नात्रप्रधानं नाम किंचिदिति। रूपोपन्यासाच्चा। तदेतत्परमतेना
[illegible] प्रधानात्मन्यां व्याख्याय स्वमतेन व्याचष्टे। अन्ये पुनर्मन्यंत इति। पुनःशब्दोपिपूर्व
स्मादि विशेषं द्योतयन्नस्येष्टतां सूचयति। जायमानवर्गमध्यपतितत्वस्याग्निर्मूर्द्धा मू. दिरूपव
र्णनमिति जायमानत्वसंकवेनाकस्मात्। न कल्वप्ठेकेनं युक्तं। प्रकरणं खल्वेतत् द्विश्च योनेः॥
॥७॥ संनिधिश्च जायमानानां संनिधेश्च प्रकरणं च बलीय इति जायमानपरित्यागे विश्वयोनेरेव
प्रकरणि। ननु रूपाभिधानमिति चेत्। न। प्रकरणिनः शारीरेंद्रियादिरहितस्यापि ग्रहवत्त्वविरो ॥७॥
धात्। नचैतावताम् [illegible] प्रकरणविरोधात्स्वार्थत्यागेन सर्वात्मना मात्रपरा इति
युक्तं। [illegible] प्रकरणाद्बलीयस्त्वात्। सिद्धेच प्रकरणिनोऽसंबंधे जाय
मानमध्यपातित्वं जायमानग्रहणे कारणमुपन्यस्तं भाष्यकृता। तस्माद्धिरण्यगर्भ एव प
रमात्मना [illegible] सर्वभूतांतरः कार्यो निर्दिश्यत इति सांप्रतं। नत्विमिदानीं। सूत्रमनवद्येप

त्तद्द्रेश्यमित्यत्र ब्रह्मैवोपदिश्यते सेव्यत्वेन ननु प्रधानं जीवात्मा वा उपास्यत्वेनेति सिद्धं । न केव
लं लिंगात् । अपितु पराविद्येति समाख्यानात् दृश्येत द्वेव प्रतिपत्तव्यमित्याह । अपि च द्वे विद्ये इति ।
लिंगांतरमाह । कस्मिन्नु भगव इति । भोगभोग्याभ्यो व्यतिरिक्ते को कर्हि । अयच्छिन्नो हि जी
वात्मा भोग्येभ्यो विषयेभ्यो व्यतिरिक्त इति तज्ज्ञानेन सर्वज्ञातं भवति । समाख्यांतरमाह । अ
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामिति । पूर्वाध्ये तेसे अदृश्य यत्नरूपा अदृश्या दृश्येति । पूर्वं ते
[illegible]ति अस्याप्तिन इति पूर्वः । अतएवादृश्यः के ते यत्नरूपाः । रूप्यते ऽनेनेति रूपं यत्नो रूपमुपा
धिर्येषां ते यत्नरूपाः । तत्र षोडशर्त्विजः । अतुपजननोपाधिनाऽर्थे । ऋत्विक्शब्दः प्रवृत्त इति
प्रत्नोपाधिष्वष्टांत्विजः । एवं यजमानोपि प्रत्नोपाधयश्चात्विजः । एवं यजमानोपि यत्नोपाधि
रेव । एवं पत्नीपत्योर्यत्नसंयोग इति स्मरणात् । नव तेषां दशाय त्नरूपा येषु ऋत्विगादिषू
क्तं कर्म यत्नः यद्दशाश्रयो यत्न इत्यर्थः तच्च कर्मावरं । स्वर्गाद्यवरफलत्वात् । अपि यंति प्राप्नुवं
ति । नाहि दृष्टांतदार्ष्टांतिकयोरिष्टं फलका । निप्रायं ॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ विशेष

मूर्द्धत्वादिकं जाठरभूताग्निदेवताजीवात्मनामन्यतमस्यापि संभवति। न च सर्वलोकाश्रयफ
लभ्यादिना। न च सर्वपाप्मप्रदाह इति पाठे शेषव्याप्त्या परमात्मैव वैश्वानर इति निश्चिते कुतः पुनरि
यमाशंका शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेदिति। उच्यते। न देशोपक्रममनुरोधेनान्यथा
नीयते यन्नेतुं शक्यं। अत्र शक्योऽयं वैश्वानरशब्दो अन्यथा नेतुमिति शंकितुरभिमानः।
अपि च। अंतः प्रतिष्ठितत्वं प्रादेशमात्रत्वं च न सर्वव्यापिनोऽपरिमाणस्य च ब्रह्मणः संभवतः।
न च प्राणाहुत्यधिकरणता अन्यत्र जाठराग्नेर्युज्यते। न च गार्हपत्यहृदयादिता ब्रह्मणः सं
भाविनी। तस्माद्यथायोगं जाठरभूताग्निदेवताजीवानामन्यतमो वैश्वानरो न तु ब्रह्म॥ तथा
ब्रह्मात्मशब्दावुपक्रमगतावप्यन्यथा नेतव्यौ। द्युमूर्द्धत्वादयश्च स्तुतिमात्रं। अथ वा। अग्नि
शारीरस्य वा देवताया ऐश्वर्ययोगाद् द्युमूर्द्धत्वादय उपपद्यंते इति शंकितुरभिसंधिः। अत्रोत्तरं।
न कुतः। तथा दृष्ट्युपदेशात्। अत्र हि चरममनन्यथासिद्धं प्रथमावगतमन्यथयति। न त्वत्र चरम
स्यान्यथासिद्धिः। प्रतीकोपदेशेन वा मनो ब्रह्मेतिवत्। तदुपाध्युपदेशेन वा मनोमयः प्राणशरीरो
भारूप इतिवदुपपत्तेः। क्लृप्तमस्माच्च वैश्वानराग्निशब्दयोर्ब्रह्मवचनत्वान्नानन्यथासिद्धिः। तथा

तद्ब्रह्मास्य प्रपञ्चस्य प्रत्यगस्याश्रयांतरे जाठरवैश्वानराख्ये रूपेण वा जाठरवैश्वानरोपाधिनि
वा ब्रह्मणि। उपास्ये वैश्वानरधर्मणां ब्रह्मधर्मणां च समावेश उपपद्यते। असंभवादितिसू
त्रावयवं व्याचष्टे। यदि चेह परमेश्वरो न विवक्ष्यतेति। पुरुषमपि चैनमधीयत इति सूत्रावयवं
व्याचष्टे। यदि केवलम् एवेति। न ब्रह्मोपाधितया नापि प्रतीकतयेत्यर्थः। न केवलमंतःप्रतिष्ठं पुरु
षमपी मपरं च। अत एव स पुरुष इति पुरुषमनूद्य न वैश्वानरो विधीयते। तथा सति पुरुषे
वैश्वानरदृष्टिस्तूपदिश्येत। एवं च परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपादिश्यत इति भा
९९ ष्यं विरुध्यते। श्रुतिविरोधश्च। स यो हैतमेवमग्निं वैश्वानरं पुरुषं पुरुषविधं पुरुषेंतःप्रतिष्ठि ९९
तं वेदेति। वैश्वानरस्य हि पुरुषत्ववेदनमत्रानूद्यते। ननु पुरुषस्य वैश्वानरत्ववेदनं। तस्मा
त्स एषोऽग्निर्वैश्वानरो यदिति यदः पूर्वेण संबंधः। पुरुष इति तु तत्र पुरुषदृष्ट्युपदेश इति
युक्तं। अत एव न देवताभूतंश्च। अतश्चैव केभ्यः श्रुतिस्मृत्यवगतद्युमूर्द्धत्वादिसंबंधः सर्वलो
काश्रयफलभागित्व सर्वपाप्मप्रदाहात्मब्रह्मपदोक्रमेभ्यो हेतुभ्य इत्यर्थः। यो भानुनाप्

थिवी द्यौ मुनेमामिति मंत्रवर्णोपि न केवलं ज्योतिष्प्रकाशविभवमात्रस्य भूताग्नेरिममीदृशं म
हिमानमाह। अपितु ब्रह्मविकारतया तादूप्येणेति भावः। साक्षाद्ध्यविरोधं जैमिनिः। यत्प्रकृतं
मूर्द्धादिषु चिबुकांतेषु पुरुषावयवेषु द्युप्रभृतीन्पृथिवीपर्यंतान्त्रैलोक्यात्मनो वैश्वानरस्या
वयवान्संपाद्य पुरुषविधत्वं कल्पितं। न ह्यत्र प्रायेण मुच्यते। पुरुषविधं पुरुषेन्तः प्रतिष्ठितं वेदेति।
अत्रायमभिसंपन्नः पुरुषविधत्वं। कार्यकरणसमुदायमपुरुषं पुरुषावयवमूर्द्धादिचुबुकांतेषु
वस्थानात् पुरुषेन्तः प्रतिष्ठितत्वं। समुदायमध्यपतितत्वात्तदवयवानां समुदायिनां। अत्रैव निदर्श
नमाह। यथा वृक्षे शाखामिति। शाखा कांडमूलस्कंधसमुदाये प्रतिष्ठिता शाखा तन्मध्यपाति
तालयतीत्यर्थः। समाधानांतरमाह। अथवेति। अंतःप्रतिष्ठितत्वं माध्यस्थ्यं तेन साक्षित्वं लक्ष्य
क्ष्यते। एतदुक्तं भवति। वैश्वानरः परमात्मा चराचरसाक्षीति पूर्वपक्षिण आशयमुन्मू
लयति। निश्चितं तेनैवेति। विश्वात्मकत्वाद्वैश्वानरः प्रत्यगात्मा विश्वेषां वायं नरः। तद्विकारत्वाद्वि
श्वप्रपंचस्य। विश्वे नरा जीवा आत्मानोस्य तादात्म्येनेति। अभिव्यक्तेरित्याश्मरथ्यः। साकल्येना

वाचभा
१

नुपपन्नं। आदुपासकानामनुग्रहायानंतोपि परमेश्वरः प्रादेशमात्रमात्मानमभिव्यनक्तीत्याह
व्यक्तिमात्रस्यापीति। अनंतोपि मात्रांपरिमाणमतिमात्रः। उपासकानां कृते उपासकार्थं। मिति
यावत्। व्याख्यांतरमाह। प्रदेशेष्विवेति। संपत्तेरिति जैमिनिराचार्यो दर्शयति। मूर्द्धानमु
पक्रम्य चुबुकांतो हि कायप्रदेशः प्रादेशमात्रः। तत्रैव त्रैलोक्यात्मनो वैश्वानरस्यावयवान्सं
१०७॥ पादयन्प्रादेशमात्रं वैश्वानरं दर्शयति। अत्रैव जाबालश्रुतिसंवादमाह सूत्रकारः। आमनं
१०० तिचैनमस्मिन्। अविमुक्ते अविद्योपाधिकल्पितावच्छेदे जीवात्मनि स खल्वविमुक्तः। तस्मिन्प्रति १०७॥
ष्ठितः परमात्मा तादात्म्यात्। अत एव श्रुतिः। अनेन जीवेनात्मनेति। अविद्याकल्पितं तु १००
भेदमाश्रित्याधाराधेयभावः। वरणाभ्रूः। शेषमतिरोहितार्थं। इति श्री वाचस्पतिमिश्रविर
चिते शारीरकभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः। ~~द्युभ्वा~~ ॥छ॥ छ॥ प्रथमा ध्याय पा-२
द्युभ्वाद्यायतनं स्वशब्दात्। इह ज्ञेयत्वेन ब्रह्मोपक्षिप्यते।
तेत्रपारवत्वेनसेतुत्वाद्भेदजस्त्राः प्रयोगतः। द्युभ्वाद्यायतनं युक्तं नाम तं ब्रह्म कर्हिचित्।

पारावारमध्यपाती । हि सेतुः ताभ्यामवच्छिद्यमानोऽष्ठे जो विधारको लोके दृष्टः । ननु वंधहेतुमात्रं । दृ
ढिनिगडादिष्वपि प्रयोगप्रसंगात् । न चानवच्छिन्नं ब्रह्मसेतुभावमनुभवति । न चामृतं स्य ब्रह्मामृ
तस्य सेतुरिति युज्यते न च ब्रह्मणोऽन्यदमृतमस्ति यस्य तत्सेतुः स्यात् न चाभेदे षष्ठ्याः प्रयोगो दृ
ष्टपूर्वः । तदिदमुक्तं । अमृतस्यैष सेतुरिति श्रवणादिति । अमृतस्येति श्रवणात् । सेतुरिति श्रव
णादिति । अमृतस्येति श्रवणात् इति विग्रहः तथा न व्याख्यातं सेतुरिति श्रवणा[त्] दिति व्याचष्टे
पारवानिति । तथा च पारवत्यमृतव्यतिरिक्ते सेतावनुश्रीयमाणे प्रधानं वा सांख्यपरिकल्पितं
[भव]तु । तस्य त्वस्य कार्योपहितमर्यादतया पुरुषं पावदपगच्छत् भवति पारवत् भवति पारवत्
भवति द्युभ्वाद्यायतनं तत्प्रकृतित्वात् । प्रकृत्यायतनत्वाच्च विकाराणां भवति वात्मा । आत्मशब्द
स्य स्वभाववचनत्वात् । प्रकाशात्मा प्रदीप इति चेत् । भवति वास्य ज्ञानमपवर्गोपयोगि । तदभावे
प्रधानात् विवेके न पुरुषस्यानेवधारणादपवर्गोऽनुपपन्नः । यदि त्वस्मिन् प्रमाणभावेन न परितु
[illegible] तर्हि नामरूपबीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं द्युभ्वाद्यायतनं । तस्मिन् प्रामाणिके
सर्वस्योक्तस्योपपत्ते । एतदपि प्रधानोपन्यासेन सूचितं । अन्ये तु साक्षाद्युक्तं द्युभ्वाद्यातवै

वाच॰
१

८३

नमाद्दियस्लेलतो वायुरेवास्तु वायुर्वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूता
नि सदृब्धानि भवंतीति श्रुतेः। यदि त्वात्मशब्दाभिधेयत्वं प्रति न परितुष्यसि। भवतु तर्हि शारी
रः तस्य भोक्तुर्भोग्यान्द्युप्रभृतीन्प्रत्यायतनत्वात्। यदि पुनरस्य द्युभ्वाद्यायतनस्य सर्वज्ञ
श्रुतेरत्रापि न परितुष्यसि। भवतु ततो हिरण्यगर्भ एव भगवान्सर्वज्ञः सूत्रात्मा द्युभ्वाद्याय
तनं। तस्य हि कार्यत्वेन पारवत्त्वं वामृतात्परब्रह्मणो भेदश्चेत्यादि सर्वमुपपद्यते। अयमपि वायु
ना वै गौतम सूत्रेणेति श्रुतिमुपन्यस्यता सूचितः। तस्मादयं द्युप्रभृतीनामायतनमिति। एवं प्राप्ते
।।१०१।। ऽभिधीयते। द्युभ्वाद्यायतनं परं ब्रह्मैव। न प्रधानं नाव्याकृतं वायुशारीरहिरण्यगर्भाः। कुतः। स्वश ।।१०१।।
ब्दात्। धारणाद्वामृतत्वस्य साधनाद्वास्य सेतुता। पूर्वपक्षेऽपि मुख्यार्थः सेतुशब्दो हि नेष्यते।
नहि मृद्दारुमयो मूर्तः पारावारमध्यवर्ती पाथसां विधारको लोकसिद्धः सेतुः प्रधानं वाव्या
कृतं वा वायुर्वा जीवो वा सूत्रात्मा वाऽभ्युपेयते। किंतु पारवत्तामात्रपरो लाक्षणिकः सेतुशब्दोऽभ्युपेयः।
सोऽस्माकं पारवत्त्ववर्जं विधारणत्वमात्रेण योगमात्राद्रूढिं परित्यज्य प्रवर्त्स्यति। जीवानाममृत
त्वपदप्राप्तिसाधनत्वं वात्मतानस्यापाद तएव श्लेषयिष्यति। अमृतशब्दश्च भावप्रधानः।

यथा द्योकयोर्द्विवचनैकवचनदर्शनात्राद्वित्वैकत्वे द्योकशब्दार्थौ। अन्यथा द्योकेपितिस्यात्। तदिद
मुक्तं भाष्यकृता अमृतत्वसाधनत्वादिति। तथा चामृतस्येति च सेतुरिति च ब्रह्मणि द्युभ्वाद्याय
तनत्वमुपपद्यते। अत्र च स्वशब्दादिति तं त्रोच्चारितं। आत्मशब्दादिति च सदायतना इति सच्छब्दा
दिति च ब्रह्मशब्दादिति च सूत्रयति। सर्वे ह्येते स्वशब्दाः स्यादेतत्। आयतनायतनवद्भावः स
र्वत्र स्त्रेति च सामानाधिकरण्यं हिरण्यगर्भेप्युपपद्यते। तथा च स एवात्रास्त्वमृतस्येसेतुरित्याशंक्य
श्रुतिवाक्येन स्वावधारणेनोत्तरमाह। तत्रायतनायतनवद्भावश्श्रवणादिति। विकाररूपेऽनृतेऽ
निर्यास्येऽभिसंधानं यस्य स तथोक्तः। जेदय पंचसत्यमजिमन्यमान इति यावत्। तस्यापवादो दोषः
श्रूयते मृत्योरिति सर्वं [illegible] ब्रह्मेति त्विति। यत्सर्वमविद्यारोपितं। त [illegible] स्मरसार्थतो ब्र
ह्मैनतु पद्रूपतत्सर्वेमित्यर्थः। अपर आहेति। नात्र द्युभ्वाद्यायतनस्य सेतुच्यते तोचनपारवत्त्वा
स्यात्। किं तु ज्ञानत्येति यत्ज्ञानं कीर्तितं यश्च वाचो। विमुंचथेति वाग्विमोकः। तस्यामृतत्वसाधन
त्वेन सेतुत्वोच्यते। तच्चो ज्ञयमपि पारवद्देवा न च प्राधान्यादेव इति सर्वनाम्ना द्युभ्वाद्यायतनमा
त्मैव परामृश्यते न तु तज्ज्ञानं वाग्विमोचने इति सांप्रतं। वाग्विमोचनत्मना ज्ञानेभावनयोरेव

पाब्रभा २

विधेयत्वेन प्राधान्यात्। आत्मानस्क द्रव्यस्य व्यापारतया विधेयत्वात्। विधेयस्य व्यापारस्यै
व पारवतोऽमृतत्वसाधनत्वात्। न चेदमैकांतिकं यत् प्रधानमेव सर्वनाम्ना परामृश्यते।
क्वचिद् योग्यतया प्रधानमुत्सृज्य योग्यतया गुणोऽपि परामृश्यते। क्वचिद् योग्यतया प्रधा॰
मुक्तोपसृप्यव्यपदेशात्। द्युभ्वाद्यायतनं प्रकृत्य विद्यादिदोषमुक्तैरुपसृप्यव्यपदेश्य
ते। भिद्यते हृदयग्रंथिरित्यादिना। न तद्द्युभ्वाद्यायतनविषयमेव। ब्रह्मणश्च मुक्तोपसृप्य
त्वव्यपदेशः सर्वप्रमुख्यतरस्याद्वैतश्रुत्यंतरे प्रसिद्धं। तस्मान्मुक्तोपसृप्यत्वात्। द्युभ्वाद्यायतनं ब्र
॥१०२॥ ह्मेति निश्चीयते। हृदयग्रंथिश्चाविद्या रागद्वेषभयमोहाः। मोहश्च विषादशोकः। परोहिरण्यग
र्भाद्यवरे यस्य तद्ब्रह्म तथोक्तं। तस्मिन्ब्रह्मणि यद्दृष्टं दर्शनं तस्मिन्नित्यर्थमिति यावत्। यथा चर्म
णि दीपं नयतीति चर्मार्थमिति गम्यते। नामरूपादीत्यत्राविद्याभिप्रायं। कामपेस्य त्ह। द्विरिति तारति
कामादस्य विद्यमुपलक्षयति। नानुमानं तच्छब्दात्। नानुमानमित्युपलक्षणं नाव्याकृतमित्यपि
द्रष्टव्यं। तेनानुपयोगापि साम्यात्। प्राणभृच्च। चेतनात्तच्छब्दत्वं हेतुरनुकृष्यते। स्वयं च भाष्यकृत् हेतु
माह। न चोपाधिपरिच्छिन्नस्येति। न सम्यक् संभवति। नांतःस्थमित्यर्थः। योग्यत्वेन द्यायतनत्वमाति

क्लिष्टः। स्यादेतत्। यदि द्विजनछ इत्यादि त्यत्रापि हेतुरनुक्तः स्यात् तत्कस्मात् पृथग्योगकारणं। यावता न प्राण अ. १
भृदनुमाने इत्येक एव योगः कस्मान्न कृत इत्यत आह। पृथगिति। भेदव्यपदेशादित्यादिना हि प्राणभृ पा. ३
देव निषिध्यते। न प्रधानं। तदैकयोगकरणे दुर्विज्ञानं स्यादिति। प्रकरणात्। न खलु हिरण्यगर्भादिषु
ज्ञातेषु सर्वं ज्ञातं भवति किं तु ब्रह्मण्येवेति। स्थित्यदनाभ्यां च। यदि जीवो हिरण्यगर्भो वायुर्वा
द्युभ्वाद्यायतनं भवेत् ततस्तत्प्रकृत्यात् अनश्नन्नन्यो अभिचाकशीति परमात्माभिधानमाकस्मिकं प्रस
ज्यते। न च हिरण्यगर्भ उदासीनः तस्यापि भोक्तृत्वात्। न च जीवात्मैव द्युभ्वाद्यायतनं तथा च स एवात्र
कथ्यते तत्कथं येनायं च ब्रह्मणि कथ्यते। अन्यथा सिद्धान्तेऽपि जीवात्मकथनमाकस्मिकं स्यादिति
वाच्यं। यतोऽनधिगतार्थावबोधनस्वरसेनाम्नायेन प्राणभृन्मात्रप्रसिद्धजीवात्माधिगमायात्यंता
नवगतमलौकिकं ब्रह्म व बोध्यत इति सुभाषितं। यद्यपि पैङ्गिउपनिषत्कृतेन व्याख्यानेनेति। तत्रत्यन
[illegible]न्यो अभिचाकशीतीति जीव उपाधिरहितेन रूपेण ब्रह्मस्वभावत उदासीनो अभोक्ता दर्शितः। तद
[illegible]वाच्येतन सत्त्वबुद्धिसत्त्वस्यापारमार्थिकं भोक्तृत्वमुक्तं। तथा चेत्थंभूतः जीव कथ्यता अनेन मंत्रव
[illegible] द्युभ्वाद्यायतनं ब्रह्मैव [illegible]सिद्धं भवति। उपाध्यवच्छिन्नश्च जीवः प्रतिषिद्धो भवतीति न पैङ्गिब्राह्मण

वाव ९

वेरोध्य... सर्वः। प्रपंचार्थमिति। तन्मध्यपर्यंतैर्ग्रंथितमिति कृत्वा चिंतयेदमधिकरणं प्रवृत्तमित्यर्थः। स्तुमा
...प्रश्न... उपदेशमात्। नारदः खलु देवर्षिः कर्मविद्वानात्मवित्तया शोच्यमात्मानं मन्यमानो भगवं
...ज्ञानसिद्धं महायोगिनं सनत्कुमारमुपससाद। उपसद्य चोवाच भगवन्न नात्मज्ञत्वाज्जानितशोकसा
गरपारमुत्तारयतु मां स्वामिनिति। तदुपश्रुत्य सनत्कुमारेण नाम ब्रह्मेत्युपास्वेत्युक्तो नारदेन पृष्टं किं नो
...भूयः इति। तत्र सनत्कुमारस्य प्रतिवचनं वाग्वाव नाम्नो भूयसीति तदेवं नारदसनत्कुमारयो
र्भूयसी प्रश्नोत्तरे वागिंद्रियमुपक्रम्य प्राणमनः संकल्पचित्तध्यानविज्ञानबलान्नतोयवायुसहितते
॥१०३॥ जोनभः स्मराशाप्राणेषु पर्यवसिते कर्तव्याकर्तव्यविवेकः संकल्पः। तस्य कारणं पूर्वापरविषयाभि ॥१०३॥
ज्ञप्रयोजननिरूपणं चित्तं। स्मरः स्मरणं प्राणस्य वसमस्तात्क्रिया कारकफलभेदपित्राद्यात्मत्वेन न
रथारनाभिदृष्टांतेन सर्वप्रतिष्ठात्वेन च प्राणभूमस्त्व दर्शिनो अतिवादित्वे वचनामादिप्रपंचा हाशांतादू
ध्यस्वमुक्त्वाऽपृष्ट एव नारदेन सनत्कुमार एकं यं येन एष तु वा अतिवदति यः सत्येनातिवदतीति सत्यो
दीत्युक्तातिपर्यंतानुक्तोपदिदेश सुखं त्वेव विजिज्ञासितव्यमिति तदुपश्रुत्य नारदेन सुखं भगवो विजि
ज्ञास इत्युक्ते सनत्कुमारो यो वै भूमा तत्सुखमित्युपक्रम्य भूमानं सुखात्मानं वभूव यत्र नान्यत्पश्यती

त्यादिना। तद्वीदृश्यो विषये विचार आरभ्यते। तत्र संशयः। किं प्राणो भूमा स्यात्। आहो परमात्मेति। भाव
भवितृत्वोऽस्यास्तस्य विषत्वायासामानाधिकरण्यं संशयस्य बीजमुक्तं भाष्यकृता। एतस्मिं नाच्यसदर्भे
यदुक्तं भूयस्तोऽन्यतः। उच्यमानं तु तद्भूय उच्यते प्रश्नपूर्वकं। न च प्राणात्किं भूय इति पृष्टं नापि भूमास्मा
त्भूयानिति प्रत्युक्तं तस्मात्प्राण भूयस्त्वाभिधानानंतरमपृष्टेन भूमोच्यमानः प्राणस्यैव भवितुमर्हति।
भूमेति भावो न भवितारमंतरेण शक्यो निरूपयितुमिति भवितारमपेक्षमाणः प्राणस्यानंतर्येण बुद्धि
सन्निधानात्तमेव भवितारं प्राप्याभिर्वृणोति। यस्योभ पंचविंशतिमार्छे [illegible] हिरण्यत्रिरिवा तं हा विः। यथो
दूः स्वामहे हविषा विशेषणमिति। नन्वात्मनः प्रकरणाद्वात्मैव बुद्धिस्थ इति तस्यैव भूमास्यादिति पु
[illegible] सनत्कुमारस्य नामब्रह्मेत्युपास्वेति प्रतीकोपदेशरूपेणोत्तरेणा नारदप्रश्नस्यापि तद्विषयत्वेन
[illegible]मात्मोपदेशप्रकरणस्यानुत्थानात्। अतद्विषयत्वे तदुत्तरस्य प्रश्नोत्तरयोर्वैयधिकरण्येन विप्र
[illegible]ष्टेरप्रामाण्यप्रसंगात्। तस्मादस्ति प्रकरणे प्राणस्यानंतर्यात्तस्यैव भूमेति पुरुक्तं। तदेतत्संशयबी
[illegible]दर्शयता भाष्यकरे[illegible]वितं पूर्वपक्षसाधनमिति न पुनरुक्तं। न च भूयो भूयः प्रश्नात्परमात्मैव नार
दे न [illegible]सितस्ति[illegible] प्राणोपदेशानंतरं तस्योपरमात्। तदेवं प्राण एव भूमेति स्थिते यद्यत्तद्विशेष्या
पातत: प्रतिभाति तत्तदनुगुणतया नेयं। नीतं च भाष्यकृता। स्यादेतत्। एष तु वा अतिवदतीति तु शब्देन

प्राणदर्शिनोऽतिवादिनो व्यवच्छिद्य सत्येनातिवादिनं वदन्कथं प्राणस्य भूमानमभिधित्सते इत्यत आ
हु प्राणमेवाभिविति। प्राणदर्शिनश्चातिवादित्वमिति। नामाद्याशांतमतीत्य वदनशीलत्वमित्यर्थः। एत
दुक्तं भवति। नायं तु शब्दः प्राणातिवादित्वाद्व्यवच्छिनत्ति अपि तु तद्वदतिवादित्वं परित्यज्य प्रत्युतानुकृ
ष्यत एव प्राणस्य सत्यस्य मननश्रद्धानिष्ठाकृतिविशिष्टतानापनिष्ठया यस्सत्येनातिवदतीति प्राणश्रुतेमेवां
तिवादित्वमुच्यते। तुशब्दो नामाद्यतिवादित्वाद्व्यवच्छिनत्ति। न नामाद्याशांतवाद्यतिवादी अपि तु सत्यप्राणवा
द्यतिवादीत्यर्थः। अत्र वागमात्रार्थोपदेशाभ्यां सत्यस्य श्रवणं। अभ्यागमाविरोधिन्यायनिवेशनं मननं।
॥१०४॥ मत्वा च गुरुशिष्यसब्रह्मचारिभिर्निस्तयुक्तिः सहसंवाद्य तत्त्वं श्रद्धत्ते। श्रद्धा अनंतरं च विषयांतरदोषदर्श १०४॥
नेन विरक्तस्य तोषात्तु तत्त्वध्यानाभ्यासेस्य निष्ठा भवति यद्दनमेतरमेव तत्त्वविज्ञानमनुभवः प्रादुर्भ
वति। तद्देतुर्द्धात्याख्यया कृतिः। भूतार्थभावनाप्रकर्षपर्यंतजं योगिज्ञानमिति। भावनाप्रकर्षस्य पर्यंतो नि
ष्ठा तस्मात्प्राप्यते तत्त्वानुभवः इति। तस्मात्प्राण एव भूमेति प्राप्तेऽभिधीयते। एष तु वा अतिवदति यः सत्ये
नातिवदतीत्युक्त्वा भूमोच्यते। तत्र सत्यशब्दः परमार्थे निरूढवृत्तिः श्रुत्या परमार्थमाह। परमार्थश्च प
रमात्मैव। ततोऽन्यद्विकारजातं मर्त्यं रूपादि दृष्टेरपेक्षया कथंचित्सत्यमुच्यते। तथा चैष तु वा अति

वदतीति यः सत्येनातिवदतीति ब्रह्मणोऽतिवादित्वं श्रुत्याऽन्यनिरपेक्षया लिंगादिभ्यो बलीयस्यावगमितं कथ
मिव संनिधानमात्रात् श्रुत्याद्यपेक्षादिति दुर्बलात्कथं चित्प्राणविषयत्वेन शक्यं व्याख्यातुं। एवं च प्राणो
दूर्ध्वं ब्रह्मणि भूमावगम्यमानो न प्राणविषयत्वेन शक्यो व्याख्यातुं। एवं च प्राणो नावितुमर्हतीति किंतु स
त्यस्य परमात्मन एव। एवं चोनामविद् आत्मानं विविदिषो नारदस्य प्रश्ने परमात्मानमेवास्मै ख्या
स्यामीत्यति संधिमान् सनत्कुमारः सोपानारोहणपरमसूक्ष्मं व्युत्पादयामास न तु प्रश्नपूर्वता प्रवाहप
तितनोत्तरेण सर्वेण प्रश्नपूर्वेणैव भवितव्यमिति नियमो स्तीत्यादि सुगमेन भाष्येण व्युत्पादितं। विस्तो
नादिस्सथ्यन परे परात्मनन्तश्रुत्यादिः। प्राणांते चानुशासने तावन्मात्रेणैव प्रकरणसमाप्तेर्न प्राणस्या
न्यायत्ततोऽन्येन। तद्भिधानोत्तिसापेक्षत्वेन न प्रकरणं समाप्येत। तस्मान्नेदं प्राणस्य प्रकरणं अपि तु
यद्वायतः प्राणस्तस्य सर्वात्मत्वात्मन एव प्रकरणं। आशंकते। प्रकरणांत इति। प्राणप्रकरणं ~~सवेन्नु~~
समाप्तावित्यर्थः। निराकरोति। न स्यादेव इति। संदंशन्यायेन हि भूम्न एव प्रकरणं स्यात् भूयो भोगः
प्राणस्यैतत्प्रकरणं स्यात्। न त्वायुक्तमित्यर्थः। न केवलं श्रुते भूमात्मता परमात्मनः लिंगादपीत्या
ह सूत्रकारः। धर्मोपपत्तेः। यद्यपि पूर्वपक्षिणा कथंचिन्नीतं। तदनु भाष्यकारो दूषयति। योऽप्य
सौ सुषुप्तावस्थायामिति। सुषुप्तावस्थायामिंद्रियाद्यसंयोग्यात्मैव। न प्राणः परमात्मनः प्रकरणात्।

वा॰व॰भा॰
१

अन्यदः तैर्विनश्वरमित्यर्थः। अतिशेते हि तान्यन्यत्। अक्षरमंबरान्तधृतेः। अक्षरशब्दः समुदायप्रसि-
द्ध्या वर्णेषु रूढः। परमात्मनि चावयवप्रसिद्ध्या यौगिकः। अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसी-
ति वर्णा एवाक्षरं। न च वर्णानामाकाशस्योतत्वप्रोतत्वेनोपपद्यते। सर्वस्यैव रूपधेयस्य नामधेयात्म-
कत्वात्। सर्वं हि रूपधेयं नामधेयसंभिन्नमनुभूयते। गौरयं वृक्षोऽयमिति। न चोपायत्वात्तत्संके-
तसंभवः। नहि धूमोपायाद्वह्निधीर्धूमसंभिन्नं वह्निमवगाहते। धूमोऽयं वह्निरिति। किं तु वैयधि-
॥१०५॥ करण्येन धूमाद्वह्निरिति। न च तिनामधेयसंभिन्नो रूपधेयप्रत्ययो डित्थोऽयमिति। अपि च शब्दानुपा-
ते ऽपि रूपधेयप्रत्यये लिंगेन्द्रियजन्मनि नामसंभेदो दृष्टः। तस्मान्नामसंभिन्नाः पृथिव्यादयो ऽवशंता ॥१०५॥
नाम्ना ग्रथिताश्च विद्धाश्च। नामानि चोंकारात्मकानि तद्व्याप्तत्वात् तद्यथा शंकुना सर्वाणि पर्णानि सं-
तृणान्येवमोंकारेण सर्वा वागिति श्रुतेः। अतः नुंकारात्मकाः पृथिव्यादयो वशंता इति वर्णा एव। सूरेन
परमात्मेति। एवं प्राप्ते ऽभिधीयते। अक्षरं परमात्मैव न तु वर्णाः कुतः। अंबरान्तधृतेः। न खलु वर्णा व-
शंतानि पृथिव्यादीनि वर्णा धारयितुमर्हन्ति। किं तु परमात्मैव तेषां परमात्मविकारत्वात्। न च नामधे-
यात्मकं रूपधेयमिति युक्तं स्वरूपभेदात् उपायभेदात्। अर्थक्रियाभेदाच्च। तथाहि। शब्दत्वसामान्या-
त्मकानि श्रोत्रग्राह्याण्यभिधेयप्रत्ययार्थक्रियाणि नामधेयान्यनुभूयन्ते रूपधेयानि तु घटपटा-

दीनिद्यः पटत्वादि सामान्यात्मकानि वक्रूरादीदिंद्रियग्राह्याणि मधु धारण आवरणाद्यर्थक्रियाणि भे
देनानुभूयंते इति कुतो नामसंभेदः। नच घटि इयोयमिति शब्दसामानाधिकरण्यप्रत्ययः। न खलु शब्दा
त्मकोयं पिंड इत्यनुभवः। किंतु यो नानादेशकालसंपूर्णतः पिंडः सोयं संनिहितदेशकाल इत्यर्थः
संज्ञानुगृहीतस्य वर्धेरत्यंताभ्यासात् पिंडाभिनिवेशिन्येव संस्कारोद्बोध संपातात्पात्तास्मर्यते। यथा
दुः। यत्संज्ञास्मरणं तत्र न तद्रूपान्यहेतुकं। पिंड एव हि दृष्टः सन्संज्ञां स्मारयितुं क्षमः ॥१॥ संज्ञाडि
स्मर्यमाणापि प्रत्याक्षत्वं न बाधते। संज्ञिनः सानटस्याद्वि ननूपाख्याहीं नक्षमेति। नच वर्णातिरिक्ते
त्मनिव्रलौकिके क्षरपद प्रसिद्धिरस्ति लोके। नवैव प्रमाणिक इत्यपरिष्टात्प्रवेदयिष्यते। निवेदि
तं वास्माभिस्तत्त्वबिंदौ। तस्मा छ्रोत्रग्राह्याणां वर्णानामंबरांतधृतेरनुपपत्तेः समुदायप्रसिद्धिबा
धनात्। अवयवप्रसिद्ध्यापरमा त्मैवाक्षरमिति सिद्धं। येनु प्रधानं पूर्वपक्षयित्वाउ नेन सूत्रेण परमा
त्मैवाक्षरमिति सिद्धांतयंति। तैरंबरांतधृतेरित्यनेन कथं प्रधानं निराक्रियते इति वाच्यं। अथनाधि
करणत्वमात्रंधृतिः आपितुप्रशासनाधिकरणता। तथा च श्रुतिः एतस्य वाक्षरस्य प्रशासने गा
र्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति। तथाप्यंबरांतधृतेरित्यनर्थकं। एतावद्वक्तव्यं। अक्षरं प्रशा
सनादिति। एतावतैव प्रधाननिराकरणसिद्धेः। तस्मा द्वर्णाक्षरतानिराक्रियैवास्यार्थः। नवस्थूला

दीनां नर्मेष्वप्राप्तेरस्थूलमित्यादिनिषेधानुपपत्तेः वर्णेषु शंकैव नास्तीति वाच्यं। नत्वेवं स्पर्शादि
पूर्वकाएव प्रतिषेधा भवंति। अप्राप्तेष्वपि निषेधानुवादानां दर्शनात्। पथ्यानांतरिक्षे न दिवी सग्नि
श्चेतव्य इति निषेधानुवादः। तस्माद्यत्किंचिदेतत्। सा च प्रशासनात्। प्रशासनमभावेतनधर्मो नाचे
तनेप्रधाने वाऽव्याकृते वा संभवति। नत्वमुख्यार्थसंभवे कूलंपिपातिषतीतिवद्भाक्तत्वमुचितमि
ति भावः। अन्यभावव्यावृत्तेश्च। अंबरांतविधरणस्याक्षरस्येश्वराद्यदन्य वर्णोवाप्रधानं वा
ऽव्याकृतं वा। एतेषामन्येषां भावोऽन्यभावस्तमन्यत्वं व्यावर्तयति श्रुतिरिति तद्वेतत्तदक्षरं गार्गीऽत्यादि
का। अनेनैव सूत्रेण जीवस्याप्यक्षरतानिषिद्धेत्याह। तच्चेतिनान्यदृत इत्यादिकयाश्रुत्या आ
त्मभेदः प्रतिषिध्यते। तथाचोपाधिभेदभिन्ना जीवतानिषिद्धा भवति अभेदज्ञाननिषेधानादित्यर्थः। औ
पिनशारीरस्याक्षरशब्दतेत्याह। अचक्षुष्कमिति। अक्षरस्य चक्षुराद्युपाधिवारयंती श्रुतिरौपा
धिकस्य जीवस्याक्षरतां निषेधतीत्यर्थः। तस्माद्वर्णप्रधानाव्याकृतजीवानामसंभवात्संभवा
च्च परमात्मनः परमात्मैवाक्षरमिति सिद्धं। ईक्षतिकर्मव्यपदेशात्सः। कार्यब्रह्मजनप्राप्तिफलत्वा
दर्चिरादितः दर्शनध्यानयोर्ध्येयमपरं ब्रह्मगम्यते। ब्रह्मवेद ब्रह्मैव भवतीति श्रुतेः। सर्वगत परब्र
ह्मवेदनेन ह्यवाप्तौ ससामानि नुन्नी यते ब्रह्मलोकमिति न देशविशेषप्राप्तिरुपपद्यते। त

स्मात्परस्यैव ब्रह्मणो ध्येयत्वेन बोध्यते। न चेक्षणस्य लोके तत्त्वविषयत्वेन प्रसिद्धेः परस्यैव ब्रह्मणस्तथा।
त्वाभावात् ध्यायतेश्चैतेन समानविषयत्वात्परब्रह्मविषयमेव ध्यानमिति सांप्रतं। समानविषयत्व
स्यैवासिद्धेः। परो हि पुरुषो ध्यानविषयः परात्परस्तु दर्शनविषयः। न च तत्त्वविषयमेव सर्वत्र दर्श
नं। अनृतविषयस्यापि तस्य दर्शनात्। न च मननं दर्शनं तच्च तत्त्वविषयमेवेति सांप्रतं। मननादेः दर्शन
तत्र तत्र दर्शनस्य निर्देशात्। न च मननमपि तर्कापरनामाऽवश्यं तत्त्वविषयं। यथाहुः तर्कोऽप्रति
ष्ठ इति। तस्मात्परस्यैव ब्रह्मेह ध्येयं। तस्य च परत्वं शरीरापेक्षयेति। एवं प्राप्त उच्यते। ईक्षणध्यानयो
रेकः कार्यकारणभूतयोः। अर्थ औत्सर्गिकं तत्त्वविषयत्वं तच्चेक्षतेः। ध्यानस्य हि साक्षात्कारः फलं।
साक्षात्कारश्चोत्सर्गतस्तत्त्वविषयः। क्वचित्तु बाधकोपनिपाते समारोपितगोचरेण भवेत्। न चासत्यपवादे
ष्कान उत्सर्गस्य बाधः। तथा चास्य तत्त्वविषयत्वात् तत्कारणस्य ध्यानस्यापि तत्त्वविषयत्वं। अपि च।
वाक्यशेषेणैकवाक्यत्वसंभवे। न वाक्यभेदो युज्यते। संभवति च परपुरुषविषयत्वेनार्थप्रत्यभि
ज्ञानात्। समभिव्याहाराच्चैकवाक्यता। तदनुरोधेन च परात्परं इत्यत्र परात्परादिति जीवघनविषयं इ
दृष्टं। तस्मात्तु परः पुरुषो ध्यातव्यश्च द्रष्टव्यश्च भवति। तदिदमुक्तं। न चात्र जीवघनशब्देन प्रकृतोऽ

निध्यातव्यः परपुरुषः पश्यमृश्यते। किंतु जीवघनात्परात्परो योध्यातव्यो द्रष्टव्यश्चेतमेव कथयितुं जी
वघनो जीवः स्विल्वमावमुपाधिवशादापन्नः स उच्यते। इस्सामानि नुन्नीयते ब्रह्मलोकमित्यनंतर
वाक्यनिर्दिष्टो ब्रह्मलोको वा जीवघनः। साहि समस्तकरणात्मनः। सूत्रात्मनो हिरण्यगर्भस्य भग
वतो निवासभूमितया करणपरिवृतानां जीवानां तत्र संघातरूपतिर्भवति जीवघनः। तदेवं त्रिमात्रोंका
शायतनं परमेव ब्रह्मोपास्यं। अतएव चास्य देशविशेषाधिगतिः फलं। उपाधिमत्वात्। क्रमेण सम्यग्दर्श
नोत्पत्तौ मुक्तिः। ब्रह्मवेद ब्रह्मैव भवतीति निरूपाधिब्रह्मवेदनविषया श्रुतिः। अपरं तु ब्रह्मैकमात्रायतन
मुपास्यमिति सिद्धं। दहर उत्तरेभ्यः॥५ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं सूक्ष्मं गृहमाप्तं पुंडरीकस
॥१७॥ मा वेश्मवेश्म दहरोस्मिन्नंतराकाशः तस्मिन्यदंतस्तदन्वेष्टव्यं। आगमाचार्योपदेशाभ्यां श्रवणं च तद ॥१७॥
विरोधिना तर्केण मननं च तदन्वेषणं। तत्पूर्वकेण ताद्दशनेरंतर्य दीर्घकालसेवितेन ध्यानाभ्यासप
रिपाकेन साक्षात्कारो विज्ञानं। विशिष्टं हि तत् ज्ञानं पूर्वेभ्यः। तदेव विजिज्ञासनं। अत्र संशयमाह तत्रेति
तत्र प्रथमं तावदेष संशयः। किं दहराकाशात्तदन्यदेव किं विदन्वेष्टव्यं विजिज्ञासितव्यं वा। उदेतं दहराकाशा
इति। यद्यपि दहराकाशोऽन्वेष्टव्यः तथापि किंभूताकाशः आहो शारीरात्मा किं वा परमात्मेति। शोसं
प्रटेतु पृच्छति। कुत इति। तद्धेतुमाह। आकाशब्रह्मपुरशब्दाभ्यामिति। तत्र प्रथमं तावद्भूताकाश एव द

हर इति पूर्वपक्षयति। तत्राकाशशब्दस्य भूताकाशे रूढत्वादिति। एवं तु वक्तुं तरां तरं संदर्भविरोधात्तुच्छः
पूर्वपक्ष इत्यस्यापरितोषेण पक्षांतरमावलंबते पूर्वपक्षी। अथ वा जीवो दहरशब्देनाभियुक्तमित्यर्थः। तत्र।
आधेयत्वादिविशेषाच्च पुरं जीवस्योपपद्यते। देहो न ब्रह्मणः पुरं हेतुद्वयवियोगतः। असाधारणेन हि
व्यपदेशा भवंति। तद्यथा क्षितिजलपवनबीजादिसामग्रीसमवधाने जन्माप्यंकुरः शालिबीजेन व्य
पदिश्यते शाल्यंकुर इति। न तु क्षित्यादिभिः। तेषां कार्यांतरेष्वपि साधारण्यात्। जीवकर्मोद्भूतधर्माधर्मोपा
र्जितं तदितरासाधारणत्वाज्जीवेन व्यपदिश्यत इति युक्तं। अपि च ब्रह्मपुर इति सप्तम्यधिकरणं
स्यार्थ ते। तेनाधेयेनानेन संबद्धव्यं। न च ब्रह्मणः स्वे महिम्नि व्यवस्थितस्याधेयस्याधार संबंधः
कल्पते। जीवस्याशयमात्रत्वादाधेयो भवति। तस्माद्ब्रह्मशब्दो रूढिं परित्यज्य देहादिवृंहणतया
जीवे योगिको वा भाक्तो वा व्याख्येयः। चैतन्यं च भक्तिः उपधानानुपधाने तु विशेषः। वाच्यत्वं गम्यत्वं वा स्या
देतत्। जीवस्य पुरं भवतु शरीरं। पुंडरीकं दहरमेव रता त्वन्यस्य भविष्यति। वत्स राज्ञस्य पुर इवोक्तं
किं तत्रैतस्य सद्मेत्यत आह तत्र पुरस्वामिन इति। अयमर्थः। वेश्मव्यधिकरणमानिर्दिष्टमप्य
समाधेयविशेषापेक्षायां पुरस्वामिनः प्रकृतत्वात्तेनैवाधेयेन संबद्धुं सदनपेक्षं नाधेयांतरेण संबं
धकल्पयति। ननु न चापि शरीरमेव तस्य भोगायतनमिति कोऽत्र दहरपुंडरीकस्य विशेषो यतद्देवास्य स

१

अल्पत्वमाह मनउपाधिकश्च जीव इति। ननु मनोपि वच्छ तथा सकच्छ देहवृत्तिपर्यायेणेत्यत आह। मन
स्य प्रायेणेति। आकाशशब्दश्चारूपत्वादिना सामान्येन जीवे भाक्तः। अस्तु वा भूताकाश एवायमाकाश
स्तथापि दहरोस्मिन्नंतराकाश इति तथाप्यदोष इत्याह न चात्र दहरस्याकाशस्याल्पत्वमिति। एवं
सत्युच्यते। भूताकाशस्य तावन्न दहरत्वं। यावान्वाऽयमाकाशस्तावानेषोंतर्हृदय आकाश इत्युप
मानविरोधात्। तथाहि। तेन तस्योपमेयत्वं रामरावणयुद्धवत्। अनन्याकेदमारोप्यगतो सत्यांन्नयु
॥१०८॥ ज्यते। अस्ति तु दहराकाशस्य ब्रह्मत्वे न भूताकाशादृष्टेनोपमानस्य गतिः। न चानवच्छिन्नपरिमाणम
प्यवच्छिन्नं भवति। तथा सत्यवच्छेदानुपपत्तेः। न भूताकाशमानत्वं ब्रह्मणोत्र विधीयते येन व्याप
नाकाशादिनिश्रुतिविरोधः स्यात्। अपितु भूताकाशोपमानेन पुंडरीकोपाधिप्राप्तं दहरत्वं निवर्त्य ॥१०८॥
ते। आपिच सर्वे एवोत्तरे हेतवो दहराकाशस्य भूताभूताकाशत्वं व्यासेध्यंतीत्याह न च कल्पित
केह इति। नापि दहराकाशो जीव इत्याह। यद्यप्यात्मशब्द इति। उपच्छ्रेरधिष्ठानं ब्रह्मणो देह
इष्यते। तेनासाधारणत्वेन देहो ब्रह्मपुरं भवेत्। देहे हि ब्रह्मोपलभ्यत इत्यसाधारणतया देहो ब्र
ह्मपुरमिति व्यपदिश्यते। ननु ब्रह्मविकारतया। तथाच ब्रह्मशब्दार्थो मुख्यो भवति। अस्तु वा ब्रह्मपुरं
जीवपुरं। तथापि यथा व्रत्नित्रस्य पुरे उक्तः पन्यां मैत्रस्य सद्भावं भवति। एवं जीवस्य पुरे देहस्तुड

रीकं ब्रह्मसदनं कविष्यति। उत्तरेभ्यो ब्रह्मलिंगेभ्यो ब्रह्मणोवधारणात्। ब्रह्मणो हि वाधके प्रमाणे बली
यसि जीवस्य साधके प्रमाणे सति ब्रह्मलिंगानि कथंचिदभेदविवक्षया जीवे व्याख्यायंते। न त्वेह ब्र
ह्मणो वाधकं प्रमाणं साधकं वास्ति जीवस्य। ब्रह्मपुरव्यपदेशश्चोपपादितो ब्रह्मोपलब्धिस्थान
तया। अर्भकौकस्त्वं चोक्तं। तस्मात्सति संभवे ब्रह्मणि तल्लिंगानां नाब्रह्मणि व्याख्यानमुचितमिति ब्र
ह्मैव दहराकाशो न जीवभूताकाशाविति। श्रवणमननमनुविद्य ब्रह्मलभ्यापवर्गपर्यवसायः ते षां का
मेषु चरणं भवतीत्यर्थः। स्यादेतत्। दहराकाशस्यान्वेष्यत्वे सिद्धे तत्र विचारो युज्यते। न तु तदन्वेष्टव्यं
अपि तु तदाधारमन्यदेव किंचिदिदिति तत्कामित्यनुभाषते। इत्थं येत दिति। अनुभाषितं दूषयति। अत्र ब्रू
मः। यद्याकाशाधारमन्यदन्वेष्टव्यं भवेत्। तदेवोपरिष्टादुत्पादनीयं आकाशव्युत्पादनं तु कोपयुज्यत र
र्थो वेदयति। नन्वेतदपीदि। आकाशकथनमपि तद्गतवर्त्तिवस्तुसद्भावप्रदर्शनायेव। अथा काशप
रमेवकस्मान्न भवतीत्यत आह। तदेवक्ष्यतुरिति। आचार्येण हि दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्ट
व्यं तद्वावविजिज्ञासितव्यमिति अभिलुपदिष्टे अंतवासिना आक्षिप्तं किं तदत्र विद्यते यदन्वेष्टव्यं पुंडरीकमे
वतावत्सूक्ष्मतरं तदयस्तु हमाकाशं सूक्ष्मतमं। तस्मिन्सूक्ष्मतमे किमपरमस्ति नास्तीत्येवेत्यर्थः।

तत्किमन्वेष्टव्यमिति। तदस्मिन्नाक्षेपे परिसमाप्ते समाधानावसर आचार्यस्याकोशोपमानोपक्रमं वच
उभेअस्मिन्द्यावापृथिवी समाहिते इति तस्मात्पुंडरीकावच्छिन्नाकाशाश्रये द्यावापृथिव्यादेवान्वेष्टव्ये
उपदिष्टे नाकाशस्यार्थः। परिहरति नैतदेवमेवं हीति। स्यादेतत्। एवमेवैतत् नोरवच्छिन्नक्ष्मपगमा
एव दोषत्वेन बोध्यं तत्रेत्यत आह। तत्र वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते। यच्चाक्ष
वत्। तत्कर्तव्यमतमावोद्यते। यच्च कर्तव्यं तदिच्छतीतिनदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति दहरा
।:७९। काशाविषयमवतिष्ठते। स्यादेतत् द्यावापृथिव्याद्येवात्मानो भाविष्यतः ताभ्यामेवात्मा लक्ष्यिष्यते। ।।१९९।
आकाशशब्दवत्। ततश्चाकाशाधारे तावेव परामृश्येते इत्यत आह। अस्मिन् कामाः प्रतिष्ठाः ए
षआत्मापहतपाप्मेति। अनेन हि प्रकृतं द्यावापृथिवीसमाधानाधारमाकाशमाकृष्य द्यावापृथि
व्याद्यनिधानव्यवहितमपीति शेषः। ननुसत्यकामत्वानस्येतत्फलं तदनन्तरं निर्देशात्। ननु दहरा
काशवेदनस्येत्यत आह। समुच्चयार्थेन चशब्देनेति। अस्मिन्कामा इति चएवइति चएकं वचनांतं नद्या
वापृथिव्यौ परामृष्टुमर्हतीति दहराकाश एव परामृष्टव्य इति समुच्चयार्थः। तदनेन क्रमेण तास्मि
न्यदन्तरित्रतच्छब्दोऽनंतरमथाकाशमतिलंघ्यत्वदत्वं डरीकं परामृशतीत्युक्तं भवति तास्मिन्दहत्पुंडरीकं परा

मन्त्राती सुखं भवति तस्मिन्हृत्पुंडरीके यद्दहराकाशं तदन्वेष्टव्यमित्यर्थः। गतिशब्दाभ्यां तथा हि दृ
ष्टं लिंगं च। उत्तरेभ्यश्च तस्यैव प्रपंचः। एतमेव दहराकाशं प्रक्रम्य वताहो कष्टमिदं वर्तते जंतूनां त
त्वावबोधविकलानां यदेकिः स्वाधीनमपि ब्रह्म न प्राप्यते। तद्यथा। चिरंतननिरूढनिविडम
ल्लदृष्टिपिहितानां कलधौतशकलानां पातितानामुपर्युपरि संचरद्भिरपि पादचेष्टनायादृङ्गाव
नोपादीयंत रत्नानि संधिमतीसादृशेत्तमिव सखेदमिव श्रुतिः प्र
ख्यंउनि वहबिभ्रमेण एतानि ब्रह्मलोकं न विंदंती ति। स्वापकाले हि सर्वेतायां
दृवते। इमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंति। स्वापकाले हि सर्वा एतां ब्रह्मलोकं प्राप्नोत्यनाद्यविद्यातमः
विद्वान विद्वांश्च जीवलोको हृत्पुंडरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्नोत्यनाद्यविद्यातमः
पटलपिहितदृष्टितया ब्रह्मरूपमापन्नोप्यहमस्मीति न वेद सोयं ब्रह्मलोकशब्दः न इतिश्च प्रत्य
ठजीवलोकस्य दहराकाशस्यैव ब्रह्मरूपलोकतामाह तुः। तदेतद्दहराकाशप्रकारः रतश्च परमे
क्षर एव दहरो यस्माद्दहरवाक्यशेषगती। तदनेन गतिशब्दौ व्याख्यातौ। तथा हि दृष्टमिति सूत्रा
वयवं व्याचष्टे। तथान्यत्र हरहर्जीवानामिति। वेदेष लोकेवदृष्टं। यद्यपि सुषुप्तस्य ब्रह्मभावे लौकिकं
कं न प्रमाणांतरमस्ति। तथापि वैदिकीमेव प्रसिद्धिं स्थापयितुमुच्यते इदं दृष्टानामेयं वैदिकी प्रसि
द्धिः यल्लोकेपि गीयन्ते। यथा श्रुत्यंतरे यथा च लोके तच्चेह ब्रह्मलोकशब्दोपीति योजनालौ

१

गच्छेति सूत्रावयवव्याख्यानं बोधसुखेनावतारयति। ननु कमलासनलोकमपीति। परिहरति।
गमेयश्चादि ब्रह्मणो लोक इति। अत्र तावन्निषादस्थपतिन्यायेन षष्ठीसमासान् कर्मधार-
यो बलीयानिति स्थितमेव तथापीह षष्ठीसमासनिराकरणेन कर्मधारयसमासस्थापनाय
लिंगमप्यधिकमस्तीति। तदप्युक्तं सूत्रकारेण। तथाहि लोकवेदप्रसिद्धिर्ह्यहरहर्ब्रह्मलोकमभि-
निधानमेव लिंगं कमलासनलोकप्राप्तेर्विपर्यासादसंभवाद्यावर्तमानं षष्ठीसमासशंकाम्।
वर्तयद्दहराकाशशब्दप्रभाववशादिति श्रुते। न च दहराकाशो ब्रह्मणो लोकः किंतु तद्ब्रह्मेति ब्रह्मैव तल्लो-
॥११०॥ कश्चेति कर्मधारयः सिद्धो भवति लोक्यत इति लोकः। हृत्पुंडरीकस्य स्वरूपं लोक्यते। य- ॥११०॥
त्र खलु पुंडरीकस्य मतः करणं तस्मिन्विशुद्धे प्रत्याहृतेतरकरणानां योगिनां निर्मलं रवो दृक्के
वः इमसो लिंबमतिस्वच्छं चेतस्यं ज्योतिः स्वरूपं ब्रह्मावलोक्यत इति। धृतेश्च महिम्नोऽस्यास्मिन्नु-
पलब्धेः। सौत्राधृत्विशब्दो भावचनः धृतेश्च परमेश्वर एव दहराकाशः कुतः अस्य धारण-
लक्षणस्य महिम्नोऽस्मिन्नेवेश्वर एव श्रुत्यंतरे रूपलब्धेः। निगदं व्याख्यातमस्य भाष्यं। प्रसि-
द्धेश्च। न चेयमाकाशशब्दस्य ब्रह्मणि लक्ष्यमाणविभुत्वादिगुणयोगाद्वृत्तिः सांप्रतिकी यथा

रथांगनामाश्च कृवाक इति लक्षणा। किंत्वत्यंतनिरूढेति सूत्रार्थः। येत्वाकाशशब्दो ब्रह्मण्यपि
मुख्य एव न त्वौपचारिक इत्याचक्षते। तैरन्यापश्वाने कार्यत्वमिति वचनेन लक्ष्यः शब्दार्थ इति मी
मांसकानामुद्वाभेदः कृतः। लक्ष्यते ह्याकाशशब्दादि लुप्ताद्विगुणयोगे नापि ब्रह्म। न च ब्रह्म
ण्येव मुख्यो न त्वसितुलेनैव गुणयोगेन वर्त्स्यतीति वाच्यं। लोकाधीनावधारणत्वेन शब्दार्थसं
बंधस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वात्। ननु यावान्वा अयमाकाशस्तावानेषांतर्हृदय
आकाश इति व्यतिरेकनिर्देशान्न लक्षणायुक्ता न हि भवति गंगायाः कूलमिति विवक्षितेऽगंगायाः
गंगेति प्रयोगः। तत्किमिदानीं पौर्णमास्यां पौर्णमास्या यजेताऽमावास्यायाममावास्यये त्युसा
धुर्वैदिकः प्रयोगः। न च पौर्णमास्यमावास्याशब्दावाग्नेयादिषु मुख्यौ। यच्चोक्तं। यत्र शब्दादर्थप्रती
तिस्तत्र लक्षणायां पुनरन्यतोऽर्थे निश्चिते शब्दप्रयोगस्तत्र वाचकत्वमेवेति। तदयुक्तं। उभयस्या
पि व्यक्तिर्जायते। स्ते भ्रपैने जेतेति शब्दादर्थः प्रतीयते। न चात्र कस्यचिल्लाक्षणिकत्वं कल्पते वाक्यार्थे
तु। न च य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यामित्यत्र पौर्णमास्यमावास्याशब्दो न
लाक्षणिकौ। तस्मात् द्युत्किं विद्देतदिति। इतरपरामर्शात्स इति चेन्नासंभवात्। सम्यक्प्रसीदत्य
स्मिन् जीवो विषयेन्द्रियसंयोगनिमित्तकालुष्यं जहातीति सुषुप्तिः संप्रसादो जीवस्यावस्थाभेदो

न ब्रह्मणः तथा शरीरात्समुत्थानमपि शरीराश्रयस्य जीवस्य। नन्वनाश्रयस्य ब्रह्मणः तस्मा
द्धृत्याः पूर्वोक्तैर्वाक्यशेषगतैर्लिंगैर्ब्रह्मावगम्यते दहराकाशः। एवं वाक्यशेषगताभ्यामेव सं
प्रसादसमुत्थानाभ्यां दहराकाशो जीवः कस्मान्नावगम्यते। तस्मान्नास्ति विनिगमनेति शंकार्थः।
नासंभवात्। संप्रसादसमुत्थानाभ्यां हि जीवपरामर्शो न जीवपरः किंतु तदीयस्य पतात्त्विकरू
पब्रह्मभावपरः। तथा तेन परामर्शो ब्रह्मण एवेति न संप्रसादसमुत्थाने जीवलिंगमपि तु ब्र
ह्मण एव तादृश्यान्तु रलग्नेव श्यते। आकाशोपमानादयस्तु ब्रह्माव्यभिचारिणोऽब्रह्मपरा
श्चेत्यस्ति विनिगमनेत्यर्थः। उत्तराच्चेदाविर्भूतस्वरूपस्तु। दहराकाशमेव प्रत्योक्षेपाश्चाय
॥१११॥ ते। य आत्मानमन्विष्य सर्वांश्च लोकानाप्नोति स सर्वांश्च कामान्। तमात्मानं विविदिषंतौ सु ॥१११॥
रराजा। विरोचनौ समित्पाणी प्रजापतिं वरिवासितुमाजग्मतुः। आगत्य च द्वात्रिंशतं व
र्षाणि तत्परिचरणपरौ ब्रह्मचर्यमूषतुः। अथैतौ प्रजापतिरुवाच। किंकामाविह स्थायुवामिति।
तावूचतुः य आत्माऽपहतपाप्मा तमावां विविदिषावः इति। ततः प्रजापतिरुवाच। य एषोऽक्षिणि
पुरुषो दृश्यत एष आत्मापहतपाप्मत्वादिगुणो यद्विज्ञानात्सर्वलोककामावाप्तिः। एतद्

मृतमभयं। अथैतत् श्रुत्वा तावक्षीण. कल्मषावरणौ तया छायापुरुषं जगृहतुः। प्रजापतिंच
पप्रच्छतुः। अथ योऽयं भगवोऽप्सु दृश्यते यश्चादर्शे यश्च खड्गादौ कतम एतेष्वसावथ वै क
एक सर्वेष्विति। नमेतयोः श्रुत्वा प्रश्नं प्रजापतिर्वताहो सुदूरखमु[illegible]ङ्गां तावेतौ। अस्माभिरत्र
स्थान आत्मोपदिष्टः एतौ च छायापुरुषं प्रतिपन्नौ तद्यदिवं पश्यातौस्थ्य रतिभ्रमः। ततः समारोपि
तपाण्डित्यवदुर्मानौ विमानितौ संतौ मनस्येन यथावदुपदेशं नगृह्णीयातां स्वेन पोरशापमनुरू
ध्ययथा न्वेंग्राह्यिष्यामिरत्नजि संधिमानू। प्रत्यक्षवाच। उदशरावे आत्मानमवेक्ष्याथास्मिन्
यत्पश्यथस्तत्प्रब्रूतमिति। तौ च दृष्ट्वा संतुष्टहृदयौ नाब्रूतां। अथ प्रजापतिरेतौ विपरीतग्राहि
णौ माभूतामित्याशयवान्पप्रच्छ। किमत्रापश्यतमिति। तौ होचतुः। पश्याव आवमतिविरुद्धब्रह्मचर्यचरणसमु
त्पन्नातापतनखलोमादिमन्ताविवमावयोः प्रतिरूपं नखलोमादिमदुदशरावे पश्याव इति पुनरेमत
योः छायात्माविभ्रममपनिनीषुः यथैव हि छायापुरुषवउपजनापापधर्मिदेहे नावगम्यमान आत्मलक्ष
णैरहान्नात्मैवमेवेदं शरीरं नात्मा किंतु ततो भिन्न इत्यन्वयव्यतिरेकाभ्यामेतौ जानीयातामित्याश
यवान् प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा पुनरुदशरावेऽपश्यतमात्मानं। पश्चात्र
यत्पश्यथस्तत्प्रब्रूतामिति। तौ च साध्वलंकृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः।

पुरुषश्च प्रजापतिनाक्षौ दृष्टं तमेव छायात्मानमूचतुः। तदुपश्रुत्य स प्रजापतिरहो बताद्यापि न प्रशांत
एवानयोर्विभ्रमः। तद्यथात्विमं तमेवात्मानं त्वं कथयामि ता। वता कालेन कल्मषे क्षीणेऽस्मद्वचन
संदर्शपौर्वापर्यालोचनयात्मत्वं प्रतिपत्स्येते स्वयमेवेति मत्वोवाच य एष आत्मा एतदमृतमभय
मेतद्ब्रह्मेति तयोर्विरोचनो देहानुपातित्वात् छायायादेह एवात्मत्वमिति मत्वा निजसदनमाग
तः तथैवासुरानुपदिदेश। देवेंद्रस्त्वप्राप्तनिजसदनोऽध्वन्येव किंचिद्विरलकल्मषतया छायात्म
॥११२५॥ निशरीरगुणदोषाऽनुविधायिनि तं तं दोषं परिक्लावयन् नाहमत्र छायात्मदर्शने भोग्यं पश्या
मीति प्रजापतिसमीपं समित्पाणिः पुनरेयाय। आगतश्च प्रजापतिना आगमनकारणं पृष्टः पंचिपंरि ॥११२५॥
भावितं जगाद। प्रजापतिस्तु सुव्याख्यातमप्यात्मत्वमक्षीणकल्मषावरणतया नाग्रहीस्तत्पुनरपि न
त्वक्षौ या पवसापराणि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमथ प्रक्षीणकल्मषाय ते अहमेवात्मानं भूयो व्याख्या
स्यामीत्यवोचत्। स च तथाचरितब्रह्मचर्यः सुरेंद्रः प्रजापतिं ससाद। उपसंन्नाय तस्मै प्रजापतिर्व्या
चष्ट। य आत्मा अपहतपाप्मादिलक्षणोऽलक्षणि दर्शितः सोयं य एषः स्वप्ने महीयमानो चरतीत्यादिति
रनेकधा स्वभोगोपभोगान् भुंजानो विचरति। अस्मिन्नपि देवेंद्रो भयं ददर्श। यद्यप्ययं छायापुरुष
वत्तन शरीरधर्माननुपपद्यतति। तथापि शोकभयादिविविधबाधानुरूपवान्न तत्राप्यपरस्त्रिस्वाश्रि

आप्तिरित्यर्थो भवति। पुनरपराणि च द्वात्रिंशतं वर्षाणि ब्रह्मचर्यं रदानीमप्यक्षीणो कल्मषो सीत्यूचे प्रजा
पतिः। अथास्मिन्नेव कारमुपसन्ने सद्यवति प्रजापतिरुवाच। परम आत्मा अपहतपाप्मादिगुणो दृ
ष्टिनोऽक्षिणि च स्वप्ने च सएष यो विषये। द्वियसंयोगविरहात्प्रसन्नः सुषुप्तावस्थायामिति। अत्रापि नेंद्रो
निर्दवर। यथा हि ज्ञात्र द्वास्युप्त गतोवाय महमस्मीतीमानि भूतानिवति विजानाति नैव सुषुप्तः। किं चि
द्रपि वेदयते। तद्दुःखवञ्चयमचेतनमानोऽभावं प्राप्तं इव भवति। नहि हेतुकानिर्दृती तिरिति। एवमुक्तवति मघ
वति बहनाद्यापि न ते कल्मष क्षयो भूत तस्तु नरपराणि पंच वर्षाणि चर ब्रह्मचर्यमित्यवोचत् प्रजाप
तिः। तदेवमस्य मघोनस्त्रिभिः पर्याये र्व्यतीयुः षणवति वर्षाणि। चतुर्थे च पर्याये पंच वर्षाणीत्येकोत्त
रशतं वर्षाणि ब्रह्मचर्यं चरतः महतस्याप्त स्य संपेदिरे। अथास्मे ब्रह्मचर्ये संपद्दग्ध इति कल्मषाय मघव
ते। य एषोऽक्षिणि यश्च स्वप्ने यश्च सुषुप्तेऽनुस्यूत एक आत्मा अपहतपाप्मादिगुणो दृष्टितः तमेव मघ
वन्मर्त्यं वै शरीरमित्यादिना विस्पष्टं व्याचष्टे प्रजापतिः। अपमस्याभिसंधिः। यावत्किं चित्सुखदुःख
भागमापाधि। तत्सर्वं शरीरेंद्रियांतःकरणसंबंधित्वात्मनः स पुनरेतानेव शरीरादीन् अनाद्यविद्या
वासनावशादात्मत्वेनाभि प्रतीतः तद्धेतेन सुखदुःखेन तद्वंतमात्मानमनुमन्यमानोऽनुतप्यते
यदान्वयमपहतपाप्मादिलक्षणमुपदासीनपाप्मानं देहादिभ्यो विविक्तमनु भवति। अथास्य शरीर

वलोप्यशरीरस्य न देहादि~~वोचिकल्प~~धर्मसुखदुःखप्रसंगोस्तीति नानुतप्यते। केवलमयं निजचैत
न्यानंदघनेस्वरूपव्यवस्थितः समस्तलोककामान् आलोकयति। एतस्यैव हि परमानंदस्य मात्राः सर्वे
कामाः दुःखत्वविद्यानि सर्वाणि मिति न विद्वान्नाप्नोति। अशरीरित्वोपनिबद्धां व्यामोहरहऽजायते। तेषामनु
ग्रहायेदमुपाख्यानमवतार्यं। एवं व्यवस्थिते। उत्तरान् वाक्यसंदर्भान् प्राजापत्यान् ज्ञा त्रीणि स्वप्नेषु
पुनश्चतुर्थेव पर्याये एव संप्रसादोस्मात्। शरीरात उत्थायेति जीवात्मैवापहतपाप्मादिगुणः प्रत्युच्यते।
नोखलु परस्यात्रिस्थानं संभवति। नापि स्वप्नाद्यवस्थायोगः नापि शरीरात्समुत्थानं। तस्माद्यस्यैतत्स
र्वं सोपहतपाप्मादिगुणः प्रत्योक्तः। जीवस्यचैतत्सर्वमिति सत्येवापहतपाप्मा प्रत्योक्तः इति नापहतपाप्मत्वा
॥११३॥ दिभिः परं ब्रह्म गम्यते। ननु जीवस्यापहतपाप्मत्वादयो न संभवतीत्युक्तं। वचनांतरात् भविष्यति। किमिव
वचनं न कुर्यात्। नास्ति वचनस्यातिभारः। न च प्रमाणांतरविरोधः। नहि जीवः पाप्मादिस्वभावः किंतु वाकंचु ॥११३॥
द्विशरीरसंसक्तवोऽस्य पाप्मादिभिः शरीरसंबंधाभावे न भवति। धूम इव धूमध्वजाभावे इति शंकायां
निराकरोति तं प्रति ब्रूयात्। आविर्भूतस्वरूपस्तु अयमभिसंधिः पौर्वापर्यपर्यालोचनया तावदुपनिष
त्सु शुद्धबुद्धमुक्तमेकमप्रपंचं ब्रह्म नतिरिक्तं च सर्वं तद्विवर्तो रज्जोरिव भुजंगः इत्यत्र तात्पर्यमवगम्यते। तथा
च जीवो विद्याकल्पिते देहेंद्रियाद्युपहितं रूपं ब्रह्मणो। न तु भाविकः एवं च नापहतपाप्मत्वादयः परस्मिन्वि

धौपाधौ संकुचितः। आविर्भूतब्रह्मस्वरूपे निरूपाधौ तु प्रभवन्तो ब्रह्मण एव न जीवस्य। एवं च ब्रह्मैवापहतपा
प्मादिगुणकं भूत्वो क्रमितितदेव देहेशकारणेन जीवरति। स्यादेतत्। स्वरूपाविर्भावे चेत् ब्रह्मैव न जीवः।
तर्हि विप्रतिलिङ्गमिदमभिधीयते। जीव आविर्भूतस्वरूपस्तत आह रूपपूर्वं गत्येति उदशरावब्राह्मणे
नेति। यच्चैव हिमद्योनः प्रतिबिम्बतुल्यमुदशरावउपजनापायधर्मकान्यात्मलक्षणविरहात् नात्मा एवं दे
हेन्द्रियाद्युपजनापायधर्मकं नात्मेत्यपैदशरावदृष्टान्तेन शरीरात्मतायाः व्युत्थानं बाधरति। चोद
यति कथं पुनः स्वं च रूपमिति। इत्यान्तरसंसृष्टं हि तेनाभिभूतं। तस्माद्वि विभमानं वैसस्यते देहमतार
कादि। कूटस्थो नित्यस्य पुनरन्येनासंसृष्टस्य कुतो विवेचनाद्देति व्यक्तिः। न च संसारावस्थायां जी
वोऽनभिव्यक्तो दृष्टाद्यो त्वस्य स्वरूपं। तेन संसारावस्थायां भासं न रति कथं जीवरूपं न भासतेत्यर्थः।
परिहरति प्राकृविवेकस्वानोत्पन्नेरिति। अयमर्थः। यद्यप्यस्य कूटस्थस्य नित्यस्यान्यसंसर्गो न वस्तुतोऽस्ति।
यद्यपि संसारावस्थायामस्य दृष्टृत्वादिरूपं च कास्ति। तथाप्यनिर्वाच्यानाद्यविद्यावशादविद्याकाम्मि
तैरेव देहेन्द्रियादिभिरसंसृष्टमपि संसृष्टमिव विविक्तमपि सविविक्तमिव दृष्ट्यादिरूपमस्य प्रथ्यते। तथा च दे
हेन्द्रियादिमतैस्तापादिभिस्तापादिमदिव भवतीति उपपादितं चेतद्धि स्तरेणाध्यासभाष्य इति नेहोपपाद्यते।
यद्यपि स्फटिकादयो जपाकुसुमादिसंनिहिताः संनिधानं च संयुक्तसंयोगात्मत्वं। तथा च संयुक्ताः तथापि

नसाक्षात् जपादिकुसुमसंयोगिन इत्येतावता दृष्टान्तितारति। वेदनात् हर्षेत्यपरो। कादयः। दार्ष्टान्तिके यो
जयति। तथा देहादीति। संप्रसादोऽस्मात् शरीरात् समुत्थायोत्थाय परं ज्योतिरूप संपद्य स्वेन रूपेणाभि
...द्यतरत्येतद्विजानते श्रुतिकृतं विवेकविज्ञानमिति। तदनेन श्रवणमननध्यानाभ्यासान्। विवेकविज्ञा
नमुत्का तस्य विवेकज्ञौ विनस्य फलं केवलात्मरूपसाक्षात्कारः स्वरूपेणाभिनिष्पत्तिः। स वसां आत्मा
रोहात्रिरूपः प्रपंचमात्रं प्रविलापयतु स्वयमपि प्रपंचरूपत्वात्। कृतकफलवत् प्रविलीयते। तथा
चानिर्मुक्तनिखिलप्रपंचजालमनुपसर्गमपराधीनप्रकाशमात्मज्योतिः सिद्धं भवति। तदिदमुक्तं परं
ज्योतिरूपसंपद्येति। अत्र चोपसंपत्तावुत्तरकाव्यायामपि त्काप्रयोगो मुख्यं व्याद्रापस्यपितीति वक्तव्यः। प ॥११४॥
॥११४॥ द्राव विवेकसाक्षात्कारः शरीरात् समुत्थानं। ननु शरीरपातो ज्ञानकं गमनं। तद्गात तत् शंसेरीरस्यापि
संभवति प्रारब्धकार्यकर्मक्षयस्य पुरस्तादित्याह तथापि विवेकमात्रेणेति। न केवलं सयोह वेत्तत्परमं
ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिभ्यो जीवस्य परमात्मनोऽभेदः। प्रजापत्यवाक्यसंदर्भपर्यालोचन
याप्येवं प्रतिपत्तव्यमित्याह। कुतश्चैतदेवं प्रतिपत्तव्यमिति। स्यादेतत्। प्रतिच्छायात्मवत् जीवपरमा
त्मनोर्वस्तुतो भिन्नमपि अमृताभयात्मत्वेन ग्राहयित्वा पश्चात्। परमात्मानममृताभयादिमंतं प्रज्ञा
पयति ग्राहयति। न त्वयं जीवस्य परमात्मभावमाचष्टे छायात्मन इव तस्य तदाह नापि प्रतिच्छायात्माऽ

यमक्षिलक्षितरति। अक्षिलक्षितो ह्यात्मैवोपदिश्यते न छायात्मा। तस्मादसिद्धो दृष्टांत इत्यर्थः॥
किं चक्षितीत्यादिना चापि पर्यायेषु एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्युपक्रमात्प्रथमपर्यायनिर्दिष्टो न छा
यापुरुषोऽपि तु ततोऽन्यो द्रष्टा स्मरति दर्शयितव्योऽन्यथा प्रजापतेः प्रतारकत्वप्रसंगादित्याह। तथा चेती ये
पीति। अन्य छायापुरुष एव जीवः कस्मान्न भवति। तथा च छायापुरुषस्यैवैनमिति परामृश्यत इत्यत आ
ह किं वाहमद्य स्वप्ने हन्ति नमिति। किं चेति समुच्चयाभिधानं पूर्वोपपत्तिस्माहि संभूते। तच्च शंकानिराकरण
द्वारेण। छायापुरुषोऽस्त्वस्थायी स्थायी चायमात्मा चकास्ति प्रत्यभिज्ञानादित्यर्थः। नाह खल्वयमेवमि
ति। अयं सुषुप्तः। संप्रति सुषुप्तावस्थायां। अहमात्मानमहंकारास्पदमात्मानं न जानाति। केन प्रकारेण
न जानातीत्यत आह यमहमस्मी। मानि भूतानि चेति नं यथा जाग्रति स्वप्ने चेति। न हि विज्ञातुर्विज्ञातेर्विपरि
लोपो विद्यते अविनाशित्वादित्यनेनाविनाशित्वं सिद्धवत् हेतू कुर्वता सुप्तोत्थितस्य आत्मप्रत्यभिज्ञान
मुक्तं। यद्वाहं जागरित्वा सुप्तः स एवैनं जागर्मीति। आचार्यदेशीयमतमाह। केचित्त्विति। यदि त्वेतमित्येने
नांतरोक्तं चक्षुराधिष्ठानं पुरुषं परामृश्यत स्यात्मत्वमुच्यते। ततो न भवेत्। न खलु जीवात्मनोऽपहतपा
प्मत्वादिगुणसंभव इत्यर्थः। तद्देतद् दूषयति। तेषामेतमिति। सुबोधं। मतांतरमाह। अपरे तु वादिन इति।

यदि न जीवः कर्त्ता लोकावचवस्कतो न्नवेत्। ततस्तदाश्रय ऽ कर्मविधय ऽ उपरुध्येरन्। सूत्रकारवचनं
न्नासंभवादिति कुप्यते। न तु खलु ब्रह्मणो गुणानां जीवे ऽसंभवमाह। न चैते ब्रह्मणो गुणानां। ब्रह्मगु
णानामसंभवो जीवेष्विति तेषामपि प्राप्तेः तेषां वादिनां शारीरकेणैवोत्तरं दत्तं तथाहि पौर्वापर्यालोचनया
वेदांतानामेकमद्वयमात्मतत्त्वं। जीवास्त्वविद्योपधानकल्पिताः इत्यत्र तात्पर्यमवगम्यते। न च वस्तुस
तो ब्रह्मगुणो गुणाः समारोपितेषु जीवेषु संभवंति। नो खलु वस्तुसत्यारज्ज्वा धर्माः सेव्यत्वषु संभवंति। नो
खलु वस्तुसत्यारज्ज्वा धर्माः सेव्यत्वादयः समारोपिते भुजंगे संभविनः। न च समारोपिते भुजंगे रज्ज्वाभि
॥११५॥ न्नः। तस्मान्न सूत्रव्याकोपः। अविद्याकल्पितं च कर्तृत्वमकर्तृत्वं यथा लोकसिद्धमुपाश्रित्य कर्मविधयः प्रवृत्ताः ॥११५॥
श्येनादिविधयश्च निषिद्धोऽपि न हिंस्यात्सर्वा भूतानीति सार्थ्यां ऽ भिचारे अतिक्रांतनिषेधं पुरुषमधिकृ
त्य। अविद्यावत्पुरुषाश्रयत्वात् शास्त्रस्य सफलं। तदिदमाह। तेषामिति। ननु ब्रह्मस्वेदत्र वक्तव्यं कृतं
जीवपरामर्शेन सफलमित्यत आह। अन्यार्थश्च परामर्शः ॥ जीवस्योपाधिकल्पितस्य ब्रह्मभावमुपदेष्टुमयो
न वासौ जीवमपरामृश्य शक्य उपदेष्टुमिति तिसृष्वप्यवस्थासु जीवः परामृष्टः तद्भावप्रविलयेन तस्य
पारमार्थिकं ब्रह्मभावं दर्शयितुमित्यर्थः। अल्पश्रुतेरिति चेत्तदुक्तं। निगदव्याख्यातेन भाष्येण व्याख्या
तं। अनुकृतेस्तस्य च। अग्नान्नं तेजसो दृष्टं सति तेजोन्तरेण न। तेजो धातृत्वं तरं तस्मादनुकाराच्च गम्यते। वक्ष्य

यस्माद्धि सौर्येण तेजसा मंदं तेजश्चंद्रतारकाद्यभिभूयमानं दृष्टं। ननु तेजसोऽन्येनापि पिधायकाः प्रदी
पस्य गृहघटादयो न ते स्वभासा प्रदीपं प्रकाशयितुमीशते श्रूयते च तस्य भासा सर्वमिदं विभातीति। सर्वश
ब्दः प्रकृतसूर्याद्यपेक्षः। न चानुकृतरूपे अनुमानमित्यनुकारोऽसंभवति। न हि गावो वराहमनुधावतीति कृ
त्वा विहगानुधावनमुपपद्यते गवां। अपि तु तत्सदृशसूकरानुधावनं। तस्माद्यद्यपि यस्मिन् द्यौः
पृथिवी चांतरिक्षमोतमिति ब्रह्म प्रकृतं तथाप्यनिश्चवानुकारसामर्थ्यलक्षणेन लिंगेन प्रकरणबा
ध्यते तेजोधातुरेव गम्यते न तु ब्रह्म लिंगानुपपत्तेः। तत्र तं तस्येति च सर्वनामपदद्वानि प्रदर्शनीयमेषा तत्प
रामृक्ष्यति। न च तच्छब्दः पूर्वोक्तपरामर्शीति नियमः समस्ति। नहि तेन रक्तं रागात्तस्यापत्यमित्यादौ पू
र्वोक्तं किंचिदस्ति। तस्मात्प्रमाणांतराप्रतीतमपि तेजोंतरमलौकिकं शब्दादुपास्यत्वेन गम्यत इति प्राप्त
उच्यते। ब्रह्मण्येव हि तल्लिंगं न तु तेजस्य लौकिके। तस्मान्न तदुपास्यत्वं ब्रह्मत्वेन तु गम्यते। तमेव भांतमि
स्तत्र किमलौकिकं तेजः कल्प्यमपि त्वासूर्यादीनामनुमानमुपपाद्यतां। किं वा भारूपः सत्यसंकल्प इति श्रुतत्वं
तरसिद्धेन ब्रह्मणो भावेन सूर्यादीनां भानमुपपाद्यतां इति विरोधेन श्रुतसंभवेऽश्रुतस्य कल्पना युज्यत
तस्य प्रसिद्धं नालौकिकमुपास्यं तेजो युज्यते। अपि तु श्रुतिप्रसिद्धं ब्रह्मैव ज्ञेयमिति तदेतदाह प्राज्ञ एवा

वक्ष्या
९

त्मात्क्तवितुमर्हतीति। विरोधमाह समत्वाच्चेति। ननु स्वप्रतिभाने सूर्यादयः स्वात्मरूपं तेजोऽपेक्षन्ते। न त्वयं तेनै
तेद्द्वयं ते। तथा न देवदत्तरूपं तेजो बाह्यं सौर्यादितेज आप्यायितं रूपादि प्रकाशयति। नानाप्यायितं
अधिकारेऽपि रूपदर्शनप्रसंगादित्यत आह यं भान्तमनुभात्युरिति। नहि तेजोन्तरस्य तेजोन्तरापेक्षा व्यासे
धामतः। किंतु न द्वानमनुभानं। न च लोचनमनुभान्तीति सूर्यादयः। तद्धि दृष्टमुक्तं न हि प्रदीपशाती। अनुभाव्यो
व्यतिकारमाह यद्दृष्टमुक्तमिति। एतदुक्तं भवति। यदि स्वरूपसाम्याभावमाक्षिप्यानुकारो निराक्रियते तेन
द्वाय्यतिचारः अथ क्रियासाम्याभावं सोऽसिद्धः। अस्ति हि वायुरजसोः स्वरूपविसदृशयोरपि नियतदिग्दे
॥११६॥ शानुगमनक्रियासाम्यं। वह्न्ययःपिण्डयोः स्वरूपभेदेऽपि दहनक्रियामानापि इष्यते तथा च पिण्डव्यक्तेर्दहनक्रियाकेनचि ॥११६॥
कल्पयित्वा क्रियासादृश्यं व्याख्येयं। तदेवमनुकृतेरिति विकल्प्य तस्य चेति सूत्रावयवं विभजते। तस्य
चेति चतुर्थमिति ज्योतिषां सूर्यादीनां ब्रह्म ज्योतिः प्रकाशकमित्यर्थः। तेजोन्तरेण निर्द्दिष्टभावमापन्नेन सू
र्यादितेजो विभातीत्यप्रसिद्धं। सर्वशब्दस्य हि स्वरसतो निःशेषाभिधानं वृत्तिः। सा तेजोधातत्वलौकि
केरूपमात्रप्रकाशके संकुचेत। प्रमाणे तु निःशेषजगदवभासकेन सर्वशब्दस्य वृत्तिः संकुचती
ति। तत्र शब्दमाह शब्दिति। सर्वत्र एवं तत्र शब्दः पूर्वोक्तपरामर्शी। तेन रक्तं शगादित्या दोवपि।

प्रकृतेः परस्मिन्प्रत्यये ऽर्थभेदे त्वाख्यायमाने। प्रातिपदिकप्रकृत्यर्थस्य पूर्वं वृत्तत्वमस्तीति तेनेनेति तत्परा
मर्शान्नाप्यतिचारः। तथा च सर्वं नाम श्रुतिरेव ब्रह्मणो परस्थापयति। तेन भवतु नाम प्रकरणात् लिंगं ब
ळीयः। श्रुतिस्तु लिंगात् बाळीयसीति। श्रोतमिह ब्रह्मैव गम्यत इति। अपि चापेक्षितानपेक्षिताभि
धानयोरपेक्षिताभिधानं युक्तं दृष्टार्थत्वादित्याह अनंतरं चाहिरण्मये परे कोश इति। अस्मिन्वा
क्ये ज्योतिरुक्तं तिरुक्तं। तत्र कथं ज्योतिरित्यपेक्षायां तदुपपत्तिरुच्यते। न तत्र सूर्य इति स्यातं त्येण न्व
स्यमानेनापेक्षितं स्यादित्यादृष्टार्थं भिति। ब्रह्मण्यपि चैषां भानप्रतिषेधो ऽवकल्पत इति। अयमभिप्रायः।
न तत्र सूर्यो भातीति तेनेयं सति सप्तमी। यतः सूर्यादीनां तस्मिन्सत्यभिभवः प्रतीयेत। अपि तु। विषय
सप्तमी तेनेन तत्र ब्रह्मणि दीप्रिका शयितव्ये सूर्यादयः प्रकाशकतया भांति किंतु ब्रह्मैव सूर्यादिषु प्रका
शयितव्येषु प्रकाशत्वेन भाति। तच्च स्वयं प्रकाशं अगृह्यो न हि गृह्यत इत्यादिश्रुतिस्मरति। अपि
समर्थते। न तत्र भास्यत इति ब्रह्मणो ऽग्राह्यत्वमुक्तं। यद्यादित्यगतमित्यनेन तस्यैव ग्राहकत्वमुक्तमि
ति। शब्दादेव प्रमितः। नांगुष्ठमात्रः पुरुषो ऽस्ति परस्मिन्नमानवाक्ति ते। भूतभव्येशानाजीवेनांगुष्ठमीत
नरो सैंधवः। किं मनुष्यमात्रश्रुतस्य अनुग्रहाय दजीवोपासना परमे तद्वाक्यमस्तु। न तद्गुरोधेनलेशान

श्रुतिः कथं विनीयतां अत्रोच्यते ईशानश्रुत्यनुग्रहाय ब्रह्मपरमेतद्वाक्यं तदनुरोधेनांगुष्ठमात्रश्रुतिः
कथं विनीयतां तत्रान्यतरस्यान्यतरानुरोधविषयेऽप्रथमानुरोधो न्याय्य इति संगुष्ठश्रुत्यनुरोधेन
ईशानश्रुतिर्नेतव्या। अपि च युक्तं हृत्पुण्डरीके हृदयस्थानत्वं परमात्मनः स्थानभेदनिर्देशात्। तद्धि
तस्योपलब्धिस्थानं शालग्रामवत्कमलनाभस्य भगवतः। न चात्र येऽङ्गुष्ठमात्रश्रुत्या स्थाने भे-
दो निर्दिष्टः। परिमाणमात्रनिर्देशात्। न च मध्य आत्मनीत्यत्रापि स्थानभेदोऽवगम्यते। आत्मश-
ब्दोऽत्र स्वभाववचनो वा जीववचनो वा स्यात्। तत्र स्वभावस्य स्वभावित्वाधीननिरूपणतया स्वस्य
चलवितुरनिर्देशात् न ज्ञायते कस्य मध्यमिति। न च जीवपक्षेऽपोरास्ति मध्यमं ह्यो ऽजसेति नैव स्थान
॥१।३।२५॥ निर्देशो विस्पष्टः। स्पष्टस्तु परिमाणनिर्देशः। परिमाणभेदश्च परस्मिन्नसंभवतीति जीवात्मैवांगुष्ठ ॥१।३।२४॥
मात्रः स च स्वकृतः करणाद्युपाधिकल्पितोऽंशः परमात्मनः। अन्तःकरणं च प्रायेण हृत्कमलकोशस्थं
नं। हृत्कमलकोशः स्व मनुष्याणामंगुष्ठमात्र इति तदवच्छिन्नो जीवात्माप्यंगुष्ठमात्रो न च वं
शंपर्द्धावच्छिन्नमरन्ध्रिमात्रं। अपि च जीवात्मनः स्वस्थमंगुष्ठमात्रत्वं स्मर्यते अंगुष्ठमात्रं पुरुषं नि
श्चकर्ष यमो बलादिति। न हि सर्वेशस्य ब्रह्मणो यमेन बलान्निःकर्षः कल्पते। यमो हि जगौ। हरि
गुरुवशगोऽस्मि न स्वतंत्रः प्रभवितुं संयमने ममापि विष्णुरिति। तेनांगुष्ठमात्रत्वस्य जीवे विनिश्चयात्।

आपेक्षिकं किंचिद्भूतभव्यं प्रति जीवस्येशानत्वं व्याख्येयं। एतद्वै तदिति च प्रत्यक्षं जीवस्वरूपं परामृ
शतीति। तस्मात्। जीवात्मैवात्रोपास्य इति प्राप्ते। एवं प्राप्ते ऽभिधीयते। प्रश्नोत्तरत्वाद्धि ईशानश्रवण
स्याविशेषतः। जीवस्य ब्रह्मरूपत्वप्रत्यायनपरं वचः इह हि भूतभव्यमात्रं प्रति निरंकुशमीशानत्वं
प्रतीयते। प्राक् पृष्टं चात्र ब्रह्म। अन्यत्र धर्मादन्यत्राधर्मादित्यादिना। तदनंतरस्य संदर्भस्य तत्प्रति
वचनतोचितेति एतद्वैतदिति च प्रश्नाभिधानं युक्तं तथा चांगुष्ठमात्रतया यद्यपि जीवोवगम्यते तथापि
न तत्परमेतद्वाक्यं किंत्वंगुष्ठमात्रस्य जीवस्य ब्रह्मरूपताप्रतिपादनपरं। एवं निरंकुशमीशानत्वं
न स्यात् कोचपितव्यं। न च ब्रह्मणो प्रश्नोत्तरताहातव्या तेन यथा तत्त्वमसीति विज्ञानात्मनः त्वंपदार्थ
स्य तदिति परमात्मनैकत्वं प्रतिपाद्यते तथेहापि अंगुष्ठपरिमितस्य विज्ञानात्मन ईशानश्रुत्या ब्रह्मभावः प्र
तिपाद्यत इति युक्तं॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात्। सर्वगतस्यापि ब्रह्मणो हृदये वस्थानमपेक्ष्येति
जीवानि प्रापं नवान्यः परमात्मनः अंगुष्ठग्रहणमर्हतीति न जीव परमेतद्वाक्यमित्यर्थः। मनुष्यानेवेति। त्रैवर्णि
काने वा। अर्थित्वादिति अंतः समर्थानां मोक्षमाणानां च काम्येषु कर्मस्वधिकारं निवेधाति। शक्तत्वादिति। ति
र्यग्देवर्षीणामशक्तानामधिकारं निवर्तयति उपनयनादिशास्त्राच्चेति। शूद्राणामनधिकारितां दर्शय
ति। यद्यप्यक्तं परिमाणोपदेशात् स्मृतेश्चेति। यद्येतत् परमात्मपरं किमिति तर्हि जीवशो होच्यते। ननु परमा

१

मैवोच्यतामुच्यते च जीवः। तस्माज्जीवं परमेवेति भावः। परिहरति। तत्रोच्यत इति। जीवस्य हि न
स्वं परमात्मस्वभावः। तद्वक्तव्यं। न च तज्जीवमनभिधाय शक्यं वक्तुमिति जीवमुच्यत इत्यर्थः। तदुपर्य
पि बादरायणः संभवात्। देवर्षीणां ब्रह्मविद्यानाधिकारचिंतायां मनुष्यलक्षणे संगते तस्याः प्र
संगिकीं संगतिं दर्शयितुं प्रसंगमाह। अंगुष्ठमात्रश्रुतिरिति। स्यादेतत्। देवादीनां विविधविचित्रानंदभो
गभागिनां वैराग्याभावात् नार्थित्वं ब्रह्मविद्यायामित्यत आह। तत्रार्थित्वं तावन्मोक्षविषयमिति। क्ष
यातिशययोगस्य स्वर्गादिफलभोगेपि भावादस्ति वैराग्यमित्यर्थः। ननु देवादीनां विग्रहाद्यभावेन इंद्रियार्थसं
॥११८॥ निकर्षादिजायाः प्रमाणादिवृत्तेरनुपपत्तेः आविद्वत्तया सामर्थ्याभावेन नाधिकारः स्यादत आह तथा साम ११८।
र्थ्यमपि तेषामिति। यथा च मंत्रादिभ्यः तद्वगमस्तथोपरिष्टादुपपादयिष्यते। ननु शूद्रवदुपनयनासंभ
वेनाध्ययनाभावात् तेषामनधिकारः स्यादाह। न चोपनयनशास्त्रेणेति। न खलु विधिवत गुरुमुखानुगृ
ह्यमाणो देवैः फलवत् कर्मब्रह्मावबोधहेतुः अपि त्वध्ययनोत्तरकालं। निगमनिरुक्तव्याकरणादिविदि
तपदतदर्थसंगतेरधिगतशब्दन्यायतत्त्वस्य पुंसः स्मर्यमाणः। स च मनुष्याणामिह जन्मनीव देवानां प्राचि
नवे विधिवदधीताम्नायस्य इह जन्मनि स्मर्यमाणः। अतः स्वयंप्रतिभातो वेदः संभवतीत्यर्थः। ननु च कर्म्मानधि
कारो भवतीत्याह। यद्यपि कर्मस्वनधिकारकारणमिति। वस्वादीनां हि न वस्वाद्यंतरमस्तीति नो भृग्वादी

नांक्षीणाधिकारत्वेनेदानीं देवर्द्धित्वाभावादित्यर्थः। विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। मंत्रादि
पदसमन्वयात् प्रतीयमानोर्थः प्रमाणं तत्राविरोधे सत्यपेतव्यो न तु विरोधे प्रमाणं तत्र विरुद्धत्वे दृढवि
ग्रहवत्त्वादि देवतायाः तस्मात् यजमानः प्रस्तर इत्यादिवदुपचरितार्थो मंत्रादिर्व्याख्येयः तथा च वि
हाद्यभावाद्यागोपहितोर्थो पहितो वा शब्दो देवते त्यसे तन्नत्वान्नास्याः क्वचिदप्यधिकार इति शंकार्थः।
निराकरोति न कस्मादनेकस्यानेकक[illegible]रूपप्रतिपत्तेः सैवाकुत इत्यत आह दर्शना
श्रुतिषु च स्मृतिषु च। तथा ह्येकस्यानेककायनिर्माणं अदर्शनाद्वा न युज्यते। बाधदर्शनाद्वा। तत्रादर्शन
मसिद्धं श्रुतिस्मृतिभ्यां दर्शनात्। न हि लौकिकेन प्रमाणेनादृष्टत्वादागमेन दृष्टमदृष्टं भवति। मा भू
द्यागादीनामपि स्वर्गादिसाधनत्वमदृष्टमिति। मनुष्यशरीरस्य मातापितृसंयोगजत्वनियमादस्माते
पित्रोः संयोगे कुतः संभवतः। संभवे वा अनग्नितोपि धूमः स्यादिति बाधदर्शनमिति चेत्। हंत किं शरी
रत्वेन हेतुना देवादिशरीरमपि मातापितृसंयोगजं सिसाधयिषसि। तथा चानैकान्तो हेत्वाभासः। स्वेदजोद्भि
ज्जादीनां शरीराणामतद्धेतुत्वात्। इच्छामात्रनिर्माणत्वं देहानामदृष्टचरमिति चेत्। न भूतोपादानत्वे
नेच्छामात्रनिर्माणत्वासिद्धेः। भूतवशिनां हि देवादीनां नानाकायचिकीर्षावशात् भूतेषु क्रियोत्पत्तौ
भूतानां परस्परसंयोगेन नानाकायसमुत्पादात् दृष्टचरी। न इच्छावशानुवर्त्ये क्रियोत्पादः पयादिवि

विद्यादिदृष्टमात्रेण विप्रकृष्टप्रेरणं । न च विविध्यादि देवदर्शने नार्थज्ञानदर्शनात् व्यवहितविप्रकृष्ट
भूतादर्शिनां देवादीनां कथमर्थज्ञानमिति वाच्यं । काचाभ्रपटलपिहितस्य विप्रकृष्टस्य च भौमशनैश्च
रादेर्दर्शने नाति व्यभिचारात् । असंस्कारस्य दृष्टयोर्देवादीनां काचाभ्रपटलादिवत् महीमहीधरादि
भिर्न व्यवधीयते । न चास्मदादिवत्तेषां शारीरित्वेन व्यवहितविप्रकृष्टादिदर्शनासंभवोऽनुमीयत
इति वाच्यं । आगमविरोधिनोऽनुमानस्योत्थानायोगात् । अंतर्द्धानं चां ज्ञानामनुज्ञानामिव तेषां प्रत्यक्षतामु
पपद्यते । तेन संनिहितानामपि न क्रतुदेशे दर्शनं भविष्यति । तस्मात् स्मृतक्रमनेकप्रतिपत्तेरिति । तथाहि
६१५१। कति देवा इत्युपक्रम्येति । वैश्वदेवशास्त्रस्य निविदि कति देवा इत्युपक्रम्य निविद्दैवोत्तरं दत्तं शाक ति१५१।
ल्येन यथा त्रयश्च त्रीच शता त्रयश्च त्रीच सहस्रेति । विनिगमशास्यमानदेवता संख्या वा
चकानि मंत्रपदानि । एतदुक्तं भवति । वैश्वदेवशास्त्रस्य निविदि कति देवाः शस्यमानाः प्रसंख्याता इति
शाकल्येन पृष्टे याज्ञवल्क्यो स्या उत्तरं त्रयश्च त्री च शते त्यादि । यावत्संख्याका वैश्वदेवनिविदि संख्या
ता देवाः एतावंत इति । पुनश्च शाकल्येन कतमे त इति संख्ये येषु पृष्टेषु याज्ञवल्क्यस्योत्तरं।
महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति । अष्टौ वसव एकादश रुद्रा द्वादशादित्या इंद्रश्च
प्रजापतिश्चेति त्रयस्त्रिंशद्देवाः । तत्राग्निश्च पृथिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्चंद्रमाश्च न

क्षत्राणि चेते वसवः। एते हि प्राणिनां कर्मफलाश्रयेण कार्यकरणसंघातरूपेण परिणमंतो जगदिदं
सर्वं वासयंति। तस्माद्वसवः। बुद्धिकर्मेंद्रियाणि दश। एकादशं च मन इति। तदेतानि प्राणाः तदु
त्क्रम्य तु ते हि प्राणमणकाले उत्क्रामंतः पुरुषं रोदयंती। ति रुद्राः। द्वादश मासाः संवत्सरस्य यैवे वा पु
नपुनः परिवर्तमानाः। प्राणभृतामायूंषि च कर्मफलोपभोगं च। दापयंतीत्यादित्याः। अशनिरिंद्रः। स
हि वलं। स हींद्रस्य परमा ईशना। तथा हि सर्वान् प्राणिनः प्रमापयति। ते न स्तनयित्नुरशनिरिंद्रः।
यज्ञः प्रजापतिरिति। यज्ञसाधनं च यज्ञरूपं च पशवः प्रजापतिः। एत एव त्रयस्त्रिंशद्देवाः षण्णां प्रा
ग्नि पृथिवी वाय्वंतरिक्षादित्य द्यावो महिमानो। न ततोऽतिरिच्यंते। षडेव तु देवाः। ते तु षड ग्निं पृथिवीं
चैकीकृत्य अंतरिक्षं वायुं चैकीकृत्य त्रयो लोकाः। यत्र एव देवा भवंति। एत एव त्रयो अन्नप्राणयोरंत
र्भवंतो ऽन्नप्राणौ द्वौ देवौ भवतः। तावप्यध्यर्ध एकः। कतमोऽध्यर्ध इति। यदयमस्मिन् सति सर्वमिदं अध्या
र्द्धोन् वृद्धिं प्राप्नोतीति। तेनाध्यर्ध इति। कतम एक इति। स एवाध्यर्धः प्राण एको ब्रह्म। सर्वदेवता
त्मकत्वेन बृहत्वाद्ब्रह्म। तदेव त्यदित्याचक्षते परोक्षाभिधायकेन शब्देन। तस्मादेकस्यैव देवस्य महिम व
शान् युगपदनेकदेवतारूपता माहात्म्यतिः। स्मृतिश्च निगद आख्याता। अपि च पृथग्जनानामप्युपा
नुष्ठानवशात् प्राप्ताणिमाद्यैश्वर्याणां युगपदनेकानेकायनिर्माणं श्रूयते। तत्रैकैव कथा देवानां

...सिद्धानामित्याह अणिमाद्यैश्वर्याणां योगिनामिति। अणिमा लघिमा प्राप्तिः प्राकाम्यमीशि
[illegible] कामावसायित्वमित्यैश्वर्याणि। अपराख्यास्येति। अनेकत्र कर्मणि युगपद्भावप्रतिपत्तिरेग
[illegible] स्फुटं द्वेशीति तु व्यतिरेकं तावद्दाह। क्वचिद्देकरतीन खलु वद्रुष
[illegible] गन्तुमर्हति। एकस्यानेकत्र युगपद्गमनाभावमाह क्वचिदेकत्रेति
लोके ब्राह्मणा[illegible] नमस्कारः क्रियते तत्र कुत्रापि। तथा स्वस्थानास्थिता मे कां देवतामुद्दिश्य कु
[illegible] देशावस्थितेर्युगपद्वृत्तिः स्यादिति। तस्याश्च तत्रासंनिहितायाः अपेक्षाभावादिति। [illegible]
[illegible] समर्थ्यमित्यपपादितं। शब्द इति चेन्नातः प्रत्ययात् प्रत्ययः [illegible] २०॥
[illegible] यां समशब्दाभावात्। अपरो शब्दस्य प्रतीतिः पावकादिवत्। आकाशादिवत्
[illegible] तस्याश्चानित्यत्वात्तस्मात्सहसंबन्धोनित्यो न भवेत्। विग्रहादि
योगेतु [illegible] नित्यात्। ततः पूर्वं वस्त्रादिशब्देन स्यान्यैन संबन्ध आसीत् स्याचेसौ
[illegible] तत्पश्चोत्पन्ने वस्त्रादौ वस्त्रादिशब्दसंबन्धः प्रादुर्भवन् देवदत्तादिशब्दसंबन्धवत् पुरुष
बुद्धिप्रभवः इति तत्स्यदैको नाम्यर्थः प्रत्ययोपि पुरुषबुद्ध्यधीनः स्यात्। पुरुषबुद्धिप्रभवानां तदधीनत्वे

वाक्योगेन तत्र वर्तयितव्यः तत्र किं स्वतंत्रं प्रधानमनेन मंत्रवर्णेनानूद्यतामुत पारमेश्वरी माया शक्तिस्ते
जोबन्नव्याक्रियाकारणमुच्यतां। किं तावत्प्राप्तं प्रधानमेवेति तथा हि यादृशं प्रधानं सांख्यैः स्मर्यते तादृशमे
वास्मिन्मंत्रे नानातिरिक्तं प्रतीयते तथा हि प्रधानलक्षणा प्रकृतिर्न जायत इत्यजा एकावलोहितशुक्लकृष्णा
वा। यद्यपि लोहितत्वादयो वर्णा न रजःप्रभृतिषु संति तथापि लोहितं कुसुंभादि रंजयति रजोपि रंजयतीति लोहितं
एवं प्रसन्नं पाथः शुक्लं। सत्त्वमपि प्रसन्नमिति शुक्लं एवमावरकं मेघादि कृष्णं तमोप्यावरकमिति कृष्णं परेणा
पि नाम्नाकृतस्य स्वरूपेण लोहितत्वादियोग उत्प्रेक्ष्यः किंतु तत्कार्यस्य तेजोबन्नस्य रोहितत्वादि कारणमु
पचरणीयं कार्यस्य रूप्येण वा कारणे कल्पनीयं। तदस्माकमपि तुल्यं अजो ह्येको जुषमाणोनुशेते जहात्ये
नां भुक्तभोगामजोन्य इति त्वात्मभेदश्रवणात्सांख्यस्मृतेरेवामंत्रवर्णे प्रत्यभिज्ञानं न त्वव्याकृतप्रक्रियायाः आ
त्मस्यामैकात्म्याभ्युपगमेनात्मभेदाभावात्। तस्मात्स्वतंत्रं प्रधानं नानाशब्दमिति प्राप्तं। तेषां सामान्यवच्छ अ
वृषवधर्मैरिति। अवयवाः प्रधानस्यैकस्य सत्त्वरजस्तमांसि तेषां धर्मा लोहितत्वादयस्तैरिति। प्रजास्त्रैगुण्या
न्विता इति। सुखदुःखमोहात्मिकाः तथा हि मैत्रदारेषु नर्मदायां मैत्रस्य सुखं तत्कस्य हेतोस्तां प्रति सत्त्वस
मुद्भवात्। नर्मदाया वस सर्वभावाख्याताः तदिदं त्रैगुण्यान्वितत्वं प्रजानां। अनुशेत इति व्याचष्टे तामेवा
विद्यये ति। विषया हि शब्दादयः प्रकृतिविकारास्त्रैगुण्येन सुखदुःखमोहात्मानः इंद्रियमनोहंकारप्रणालि
कया बुद्धिसत्त्वमुपसंक्रामंति तेन तद्बुद्धिसत्त्वं प्रधानैर्विकारः सुखदुःखमोहात्मकशब्दादिरूपेण परिणमते

चितिशक्तिरत्वपरिणामिन्यप्रतिसंक्रमापि बुद्धिसत्त्वादात्मनो विवेकमबुध्यमाना बुद्धिवृत्त्यैव विपर्यासे
नाविद्यया बुद्धिस्थान्सुखादीनात्मन्यभिमन्यमाना सुखादिमतीव भवति तदिदमुक्तं सुखी दुःखी
मूढोहमिति । अविवेकितया संसरत्येकः सत्त्वपुरुषान्यताख्यातिसमुन्मूलिताखिलवासनावि
द्यानुबंधस्त्वन्यो जहात्येनां प्रकृतिं तदिदमुक्तमन्यः पुनरिति । भुक्तभोगामिति व्याचष्टे कृतभोगापव
र्गां शब्दाद्युपलब्धिर्भोगः गुणपुरुषान्यताख्यातिरपवर्गः अपवृज्यते हि तया पुरुष इति एवं प्राप्ते
भिधीयते न तावदजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति एतदात्मभेदप्रति
पादनपरमपि तु सिद्धमात्मभेदमनूद्य बंधमोक्षौ प्रतिपादयति सिद्धवानूदितो भेद एको देवः सर्वभूते
॥१९४४॥ षु गूढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादिश्रुतिभिरात्मैकत्वप्रतिपादनपराभिः । विरोधात्काल्पनिको ॥१९४४॥
वा तेषु तेन तथा च न सांख्यप्रसिद्धा मा प्रसक्ता । निरूपणमिति अजावाक्यं चमसेमैवाकथ त्वपरिप्लवमानं न स्वतं
त्रप्रधाननिश्चयायपर्याप्तं तदिदमुक्तं सूत्रकृता चमसवदविशेषादिति । उत्तरसूत्रमवतारयितुं शंक
ते तत्रात्विदं तच्छिर इति । सूत्रमवतारयति अत्र ब्रूमः । ज्योतिरूपक्रमा तु तथा ह्यधीयत एके । सर्वशा
खाप्रत्ययमेकं ब्रह्मेति स्थितौ शाखान्तरोक्तरोहितादिगुणयोगिनी तेजोबन्नलक्षणाजा रापुजां उजस्वे
दजोद्भिज्जचतुर्विधभूतग्रामप्रकृतिभूतेयमजा प्रतिपत्तव्या रोहितशुक्लकृष्णामिति रोहितादिरूप

तया तस्याः स्वशक्त्यात्मना तु न तु सांख्यपरिकल्पितेन प्रकृतिः तस्याः अप्रमाणिकत्वात् श्रुतहान्यश्रुतकल्प
नाप्रसंगात्। रंजनादिना च रोहितादिरूपं चारस्य सति मुख्यार्थसंभवेऽयोगात् तदिदमुक्तं रोहितादीनां शब्दा
नामिति। अजापदस्य समुदायप्रसिद्धिपरित्यागेन न जायत इत्यवयवप्रसिद्ध्याश्रयणे दोषप्रसंगात् अत्र
तु रूपककल्पनया समुदायप्रसिद्धेरेवानपेक्षायाः स्वीकारात्। अपि वा प्रमादिश्रुतिकल्पनेऽस्य दृष्टान्तानुगु
णो न सांख्यस्मृत्यनुगुण इत्याह तथेहापीति किं कारणं ब्रह्मोपक्रम्येति। ब्रह्मस्वरूपं तावज्जगत्कारणं न भ
वति विशुद्धत्वात् तस्येति यथा दुःपुरुषस्य चक्षुष्टस्य नासु द्राविकृतिर्भवेत् इत्याशयवती श्रुतिप्रच्छ[illegible]कि
कारणं यस्य ब्रह्मणो जगदुत्पत्तौ तत् किं कारणं ब्रह्मेत्यर्थः। ते ब्रह्मवादिनो ध्यानयोगेनात्मानं गताः प्राप्ता अ[illegible]
न्विति योऽजना। यो योनिं योनिमिति अविद्याशक्तिं योनिः सा च प्रातिजीवं नीनेत्युक्रमतो वीप्सोपपन्ना। शेषमति
रोहितार्थं। सूत्रान्तरमवतारयितुं शंकते कथं पुनरिति। अजाकृतिर्जातिः तेजोबन्नेषु नास्ति न चैते जोबन्ना
नां जन्मश्रवणादजन्मनिमित्तोऽप्यजाशब्दः संभवतीत्याह न च तेजोबन्नानामपीति सूत्रमवतारयति अन्त उ
तरं पठति। कल्पनोपदेशात् मध्वादिवदविरोधः। ननु किं छागाद्यो हितशुक्लकृष्णो वान्यादृशीनामपि छागा
मुपलंभादित्यत आह यथेति। बहुवर्करा बहुशावा शेषं निगदव्याख्यातं। न संख्योपसंग्रहादपि नाना
भावादतिरेकाच्च। अवान्तरसंगतिमाह एवं परिहृतेऽपीति। पंचजना इति सप्तम्यार्थः पंचसंख्याविषयाः संबध्यते रव्य

ननु द्विकल्पं रूपेसंख्यायामिति समासविधानात् मनुजेषु निरूढोयं पंचजनशब्द इति वाच्यं। तथाहि सति पंचम
नुजा इति स्यात्। एवं चात्मनि पंच मनुष्याणामाकाशस्य च प्रतिष्ठानमिति तन्निस्तात्पर्यां। सर्वस्यैव प्रतिष्ठाना
तू। तस्माद्रूढेरसंक्तत्वादु एवं वान्यानि पंच मनुष्याणां त्यागेनात्र योग आस्थेयः। जनशब्दश्च कत्यं वि
न्नत्वेषु मार्थ्येयुः। तत्रापि किं वे पंच प्राणाद्यो वाक्यशेषगतावि वक्ष्यतां। उत तद्द्व्यतिरिक्ता। अन्य एव वा केचित्।
तत्र पौर्वापर्य्याभावेन याकाण्वमाध्यंदिनवाक्ययोर्विरोधादेकत्राज्योतिषा पंचत्वमन्येनेतरत्र न तबोड
शीग्रहणाग्रहणवद्विकल्पसंभवो नुष्ठानं हि विकल्प्यते। न च वस्तु वस्तुतत्त्वकथा सेयं। नानुष्ठानकथा
॥१४५॥ विध्यभावात्। तस्मात्कानि विद्वेव तत्त्वानीह पंचप्रत्येकं पंचसंख्यायोगीनि पंचविंशतितत्वानि भवंतः सतो ॥१४५॥
रव्येश्वप्रकृत्यादीनि पंचविंशतिस्तत्वानि स्मर्यंत इति तान्येवानेन मंत्रेणोच्यंत इति नाशंक्यं प्रधानं जनेव
धारत्वेनात्मनोव्यवस्थानात्। आत्मनि वाधाराधेयभावस्य विरोधात्। आकाशस्य च व्यतिरेचनात्। अत्र यो विंशति
र्जना इति स्यात्। पंच पंचजना इति वाच्यं सत्याप्याकाशात्मनोर्व्यतिरेचने मूलप्रकृतिभागैः सत्वरजस्तमोभिः
पंचविंशतिसंख्योपपत्तेस्तथा सत्यात्माकाशाभ्यां सप्तविंशतिसंख्यापात् पंचविंशतितत्वानि निरवासिद्धांतव्या
कोप इति चेन्न मूलप्रकृतित्वमात्रेणैकीकृत्य सत्वरजस्तमांसि पंचविंशतित्वोपपत्तेः। हिरूपावेन तु तेषां सप्तविंशा
ति त्वाविरोधस्तस्मान्नाशास्त्रीसांख्यस्मृतिरिति प्राप्तं। मूलप्रकृतिः प्रधानं नान्यस्य विकृतिरपि तु प्रकृतिरेव

तदिदमुक्तं मूलेति। महदहंकारतन्मात्राणि प्रकृतिश्च विकृतिश्च तथा हि महत्तत्वमहंकारस्य तत्वांतरस्य प्रकृतिः
मूलप्रकृतेस्तु विकृतिरेवमहंकारतत्वं महतो विकृतिः प्रकृतिश्च देवतामससत्वं च तन्मात्राणां तदेव सात्विकं
सत् प्रकृतिरेकादशेंद्रियाणां एवं तन्मात्राणि चाहंकारतत्वस्य विकृतिराकाशादीनां पंचानां प्रकृतिस्तदिद
मुक्तं महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च षोडशसंख्यावच्छिन्नो गणो विकार एव पंचभूतान्[illegible]न्मा
त्राणि एकादशेंद्रियाणि। तिषोडशको गणः। यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्य
स्तत्वांतरमिति न प्रकृतिः तत्वांतरोपादानत्वं चेह प्रकृतित्वमभिमतं नोपादानमात्रत्वमिति विशेषः पुरुषस्तु
कूट[illegible]नित्यो परिणामी न कस्यचित्प्रकृतिर्नापि विकृतिरिति। एवं प्रा[illegible]थीयते नेन संख्योपसंग्रह[illegible]पप्रथा
[illegible]श्रुतिमत्वाशंका कर्त्तव्या कस्मान्नानाभावान्नानात्वेतीनि पंचविंशति तत्वानि नैषां पंचदशः [illegible] साथ
रजोथ मोक्षिन खलु सत्वरजस्तमो महदहंकाराणामेकः क्रियाका गुणो वा द्रव्यं वा जाति वा धर्मः पंच[illegible]मात्रादि
भ्यो व्यावृत्तः सत्वादिष्वनुगतः कश्चिदस्ति नापि पृथिव्यप्तेजोवायुघ्राणानां नापि रसनचक्षुस्त्वक्छ्रोत्रवाचां नापि
पाणिपादपायूपस्थमनसां चैनैकेनासाधारणेनोपगृहीताः पंचकाजविंतुमर्हतीति। पूर्वपक्षे कोटेशेन
मुत्थापयति अन्योन्येत पंचविंशति संख्यैवेयमिति। यद्यपि परस्यां संख्यायामवांतरसंख्यादित्वा[illegible]कानास्ति
तथापि तत्पूर्वं तस्याः संख्यावान्तर्भावविवक्षणया प्रत्यासत्त्या परसंख्यालक्षणार्थं पूर्वसंख्योपन्यस्यत
नव इति। दूषयति अयमेवास्मिन्नपक्षे दोष इति। एवशब्दो जनशब्देन समस्तो ऽसमस्तः शक्योऽवक्तुमित्याह परस्यात्र

बा°पं°

१

128/3

पंचजना इति। ननु भवतु समासेस्मिन्नपि किमित्यत आह समस्तत्वाच्चेति। अपि च वीरणानां पंचकद्वयग्र
हणे द्विर्वचनत्वानि न सांख्यप्रवृत्तिप्रत्ययनिमित्तानि। मित्यसमासमभ्युपेत्याह पंचैव कद्वयग्रहणं पंचपंचेति।
न चैका पंचसंख्या च पंचसंख्यांतरेण शाकपार्थिवादित्वेपि पंचशब्दस्य संख्योपसर्जनद्रव्यवचनत्वेन संख्या
या उपसर्जनतया विशेषणेनासंयोगादित्याह न च पंचसंख्यापाए कस्या इति। तदेवं पूर्वपक्षैकदे
शिनि दूषिते परमपूर्वपक्षिणमुत्थापयति नत्वापपन्नपंचसंख्याकाजनाएवेति। अत्र तावद्द्वौ संप्रत्ययां
न योगः संभवतीति वक्ष्यते तथापि योगिकं पंचजनशब्दमभ्युपेत्य द्विजपति मुक्तं पंचपूली शब्दस्येति। पं
११४६ चपूली त्यत्र यद्यपि पृथक्के कार्यसमवायिनी पंचसंख्यावच्छेदिका स्थित थापीयं समुदायापि नो वच्छिनत्ति
न समुदायं समासपदं [illegible] तस्मिन्कृति ते समुदायापाइत्यपेक्षत्यां पञ्चं तरान्तिहि तापंचसंख्या सं
लक्ष्यते पंचेति पंचजना इत्यत्र तु पंचसंख्यपोत्पत्तिं [illegible] जनानामवच्छिन्न चात्समुदायस्य [illegible] ली
वदत्राप्रतीते पक्षांतरमाशंकते तासंख्या सर्वद्यते। स्यादेतत् संख्येयानां जनानां मा भूद्विच्छेदांतरवास्य सं
ख्यावच्छेदः पंचसंख्यायास्तु तयावच्छेदोन विप्रतिनाहि [illegible] य वाच्छिन्नेत्यत आह नचेदं पीदं विशेषणमिति
उक्तोत्र दोषः नत्युपसर्जनं विशेषणेन युज्यते पंचशब्दश्च वतावतू संख्येयोपसर्जनसंख्यामाह विशेषतरक्क
पं जंचनाइत्यत्र समासे विशेषणापेक्षायां तु न समासः स्यादसामर्थ्यात् हि जवनिस्त्र द्धस्य राजपुरुष
इति समासः अपितु वृत्तिरेवं ऋद्धस्य राजपुरुषइति सापेक्षत्वे नासामर्थ्यादित्यर्थः। अतिरेकाच्चेत्स